चतुर्दशजगद्भ्योऽथ नतिमाचक्ष्महे वयम् । वञ्चिता भेदजैर्मोहैरेतावन्तमनेहसम् ॥ १ ॥ यद्याख्याता **विद्धसालभञ्जिका** चित्रितार्थके । विद्धे स्तम्भे सालभञ्जिकायिता यत्र नायिका ॥२॥ तनुरुचि यो न श्यामः कविः कवीनां स यदि **घनश्यामः** । कवते कमनश्यामः किमसूयाभिर्मुधैव नश्यामः ॥३॥ इति यमुद्दिश्य रहसि निजात्मानमतिविनन्दन्ति मनसि संजातविविधवैकल्यानि कुकविसाकल्यानि ॥ लग्ने कीटे झषेष्वासनदलनिलयौ भूर्जकेतू धनुर्हर्यंशे काव्योऽथ नक्रे कियघटकटकांशेषु सौम्येनचन्द्राः । सौरिर्मेषे तुलांशे वृषमिथुनदले सैंहिकेयोऽथ जीवः कौलीरे सिंहभागेष्यलियननवमांशे यदीयोऽवतारः ॥ ४ ॥ आत्मा यद्दिशवयोश्चिदम्बरमहायोगीन्द्रशाकम्भरिभ्राता श्रीद्वयसुन्दरीकमलजः काशीमहादेवजः । वद्धाञ्जल्यखिलप्रयोगसमयः कोशावलीवल्लभो नम्रः सत्पदि वावदीति स **घनश्यामः** कवीनां कविः ॥ ५ ॥ पत्रं पुष्पं वर्तते यद्गृहे मे तत्ते वृद्धै लेखकेभ्यो ददामि । योगक्षेमे संस्कृतेर्ग्रन्थकीर्तौ चाचन्द्रार्कं देवि वाचे जय त्वम् ॥ ६ ॥ मद्ग्रन्थवैरिषु महाकाली मद्वाङ्नुतिषु महालक्ष्मीः । मत्कृतिपाटीषु च महासरस्वती वसतु तरुणि मत्कविते ॥ ७ ॥ धन्ये चतुष्षष्टिनिबन्धिकन्ये निर्मातुमन्या भगिनीर्मुहुस्ते । जीवामि शुकामि मृकण्डुजामि श्रीदाम्यहं सौभरीतापसामि ॥ ८ ॥ नमस्सद्भ्यो महान्तो ये भस्मच्छन्नानला इव । नमोऽसद्भ्यो महान्तो ये भस्मच्छन्ना नला इव ॥ ९ ॥ निश्शेषं भुवनं सशेषमपि हा विष्णुस्तदन्तर्गता हे लोकाः शृणुतार्थिचातकमनस्कारे घनश्याम्यहम् । उन्मार्गा कलिदायिकद्रूदमृगव्यूहाङ्गदंशे पुनः श्यामाम्याग्रहभागतः किल घनश्यामोऽस्मि भूमण्डले

---

१ 'गुरुभ्यः' इति क–घ. २ 'वन्देमहि च तां वाणीम्' इति न–टी.

॥१०॥ त्वं चेत् किंपच दक्षसे पठ कृतिं नोचेद्गृहाणायुधं व्यापारं कुरु पाशुपाल्यमथवा धिक्केरलान्वा व्रज। मां नो चेत्परिभाषसेऽस्मि फणितो भक्त्या त्वया मत्कृते सृष्टो गुग्गुलुधूपजः परिमलो न स्यात्समासो यदि ॥११॥ चोलेन्दोस्सचिवोद्वहे मयि चतुष्षष्टिप्रतीवन्धकौ द्विन्त्रिश्लोकजगत्प्रजापतिगणो हा दुष्कवीनां जनः। अन्धोपस्थनयान्नरस्तुतिधनैः खद्योतवद्द्योतते मन्ये जाग्रति चन्द्रचूडसुरते के ताम्रचूडारते ॥१२॥ युक्त्या जीवितविद्धसालतनवस्सार्थप्रवन्धद्वयीकन्याकुञ्चवभूतिगीर्विवरणे सङ्कोचभाजोऽप्यमी। कीर्तौ दत्तदृशः शिरोधृतजयस्वा...सुमाः कुर्महे खेलेनोत्तरमेव रामचरितं टीकाकृतार्थोत्तरम् ॥१३॥ इतरपूर्वकविग्रथनाधिकाः सपुनरुक्तपदा भवभूतिजाः। अति हि नाम्रयति स्म तु चापयोर्मनसि सह्यतरास्सघृणैर्बुधैः ॥१४॥ ग्रन्थो मे मित इह विस्तरे वृथा स्यात् गायन्त्र्यष्टकपठने वुधोऽलसो यत्। यल्लेखेष्वपि शिवरामकृष्णनाम्नां यच्चायं वटुगणपाठने धनेच्छुः ॥१५॥ वृत्तोक्तिसालंकृतिभावफक्किकारसार्थसूत्राद्यनुवादचातुरीम्। पश्यन्तु सन्तोऽनुपमानमत्कृतप्रचण्डराहूदयदीपिकादिषु ॥ १६ ॥ अथैतन्नाटकस्थायिसंविधानाववोधने। वस्तुपात्रादिनिर्देशः संग्रहात्क्रियते मया ॥ इदं कविभ्य इत्यस्मिन्पद्ये प्रामाणिकेरितः। वन्द्यो गणेशः पूर्वार्धे उत्तरार्धे सरस्वती ॥ श्रीमान्कालप्रियानाथो देवस्सूत्रधरो नटः। पारिपार्श्विकपर्याय उभौ प्रस्तावनेरितौ ॥ रामस्सीता ततः कञ्चुक्यष्टावक्रोऽथ लक्ष्मणः। प्रतिहारी दुर्मुखोऽमी प्रथमाङ्के प्रवेशिताः ॥ आत्रेयी तापसी नाम्ना वासंन्ती वनदेवता। रामश्च दिव्यपुरुषश्शम्बूकोऽङ्के द्वितीयके ॥ तमसा मुरला सीता रामो वासन्तिकेत्यमी। तृतीयेऽङ्के ततो दाण्डायनिस्सौधानकिर्मुनिः ॥ जनकोऽरुन्धती देवी कौसल्या गृष्टिकञ्चुकी। लवश्च वटवः क्रुद्धपुरुषोऽङ्के चतुर्थके ॥ सुमन्त्रश्चन्द्रकेतुश्च लवोऽप्यङ्के च पञ्चके। अथ विद्याधरी विद्याधरो रामो लवस्तथा। चन्द्रकेतुः कुशः षष्ठे सप्तमेऽङ्के तु लक्ष्मणः। रामोऽत्र सूत्रधारस्तु गर्भनाटककौतुके॥ उत्सङ्गितौ दारकौ द्वौ सीता गङ्गा पृथिव्यपि। इदमन्तं नाटकीयमित्यूह्यं पात्रपञ्चकम्॥ ज्ञेया नाटकसीता सा याऽरुन्धत्या सहागता। नाटकीयौ कुशलवौ प्राप्तौ वाल्मीकिना सह॥ भ्रमं विनावधातव्यं मन्त्रज्ञैस्सूक्ष्मदृष्टिभिः। शिष्योक्तेन पथानेन नाटकं परिशील्यताम्॥ अथ कालिदासादिसमानकालिकः, भोजराजाश्रयः श्रीकण्ठनामा, 'साम्बा पुनातु भवभूतिपवित्रमूर्तिः' इति श्लोकनिर्माणवेलागुणवशादानन्दभरितेन राज्ञैव भवभूतिरिति ख्यापितः कविः, 'नामानि तव गोविन्द यानि लोके महान्ति च। तान्येव मम नामानि नात्र कार्या विचारणा ॥' 'आवयोरन्तरं नास्ति' इत्यादिवचनसिद्धान्तेन शिवरामकृष्णादिनाम्नां एकार्थतैव प्रामाणिकसंमता इत्यवगच्छन्नतितुच्छबौद्धकुलशासनपूर्वकं गोब्राह्मणवेदशास्त्रोद्धरणाय भगवत्पादावतारो भवीति (? भवतीति) स्वप्न ... यामाज्ञापयतः साम्बशिवस्य प्रसादादद्वैतमेव

जगदवलोकयन्नेप तदा मतान्तरग्रन्थाभावादवैरबुद्धि (द्धिः ?) यथातथायं स परब्रह्मणोऽपि, 'संभवामि युगे युगे' इति प्रतिज्ञया लीलामानुपविग्रहस्य श्रीरामस्य चरितं चिकीर्षुः अविघ्नपरिपूरणाय प्रतिभाविशेपाय च पूर्वार्धोत्तरार्धाभ्यां गजाननसरस्वतीप्रणामात्मकं मङ्गलं चरीकर्ति इदं कविभ्यः पूर्वेभ्य इति ॥ १ ॥ इदमिति सामान्ये नपुंसकम् । अत एव 'शक्यमञ्जलिभिः पातुं वाताः केतकगन्धिनः ।' इति **वाल्मीकिः** । 'शक्यमरविन्दसुरभिः' इति **भर्तृमीढश्च** । **इदं नमोवाकं नम** इत्युक्तिम् । 'नमउक्तौ नमोवाकः' इत्यगस्त्यः । **पूर्वेभ्यः** पुरातनेभ्यः अलौकिकेभ्य इत्यर्थः । वैदिकेभ्य इति यावत् । वेदानां लोकपूर्वत्वादिति भावः । 'यस्य निश्वसितं वेदाः' इति स्मरणात् । **कविभ्यः** कवये गणपतये इत्यर्थः । 'गणपतिं हवामहे कविं कवीनाम्' इत्यादिश्रुतेः । 'कविश्शुक्रगजाननौ' इति **जयः** । कविभ्य इति पूजायां बहुत्वम् । तथा च 'स्मरन्ति ताता अपि माम्' इति **विक्रमार्कचरिते श्रीनाथः** । **प्रशास्महे** ब्रूमहे । 'प्रशासनं तु निर्देशव्याहाराचरणादिषु' इति **लिङ्गानुशासनम्** । आशास्महे इति वार्थः । केचित्तु—इमे च ते कवय इति एकपदमाहुः, तन्न । पूर्वेभ्य इति विशेपणापेक्षया इदं कविभ्य इति विशेष्यस्य बहुवर्णघटितत्वान्नान्दीप्रारम्भ एव क्लिष्टकल्पनाया अन्याय्यत्वाच्च । पूर्वेभ्यः प्राचेतसादिभ्य इत्यन्ये प्राहुः । तदपि न साधीयः, अनुग्राहकवाण्यपेक्षया अनुग्राह्यप्राचेतसादिभ्यः प्रथमं प्रणामकथनस्यायुक्तत्वात् ॥ न च —'कवीन्द्राः कल्पन्ते कथमपि विरिञ्चिप्रभृतयः' इति **भगवत्पादै**रभिधानात् पूर्वेभ्य इत्यर्थ इति वाच्यम् । हंसीभूतविष्णुविधात्रादि (?) केतकीकुसुमसाक्षिणो विरिञ्चस्य परमेश्वररुपा चक्रादिदानप्रसादपात्रनारायणसमक्षमेव प्रणामादिप्रतिष्ठायां दूरीकृतत्वात् । 'या ब्रह्माच्युतशङ्करप्रभृतिभिः' इति वचसा वाण्यपेक्षयाऽनभ्यर्हितत्वाच्च । एवमालोच्य पूर्वार्धस्य गणपतिपरत्वमेव सङ्गतमिति विशेपज्ञा इति दिक् ॥ **अमृतां** शाश्वतीम्, यज्ञशेपसुधामोक्षस्वरूपाम् । भीमो भीमसेन इत्यादिवन्नामैकदेशे नामग्रहणम् । 'यज्ञशेषसुधामोक्षेष्वमृतं शाश्वते त्रिषु' इति **विक्रमार्कः** । **आत्मनः** परब्रह्मणः । 'परब्रह्मणि चात्मा' इति **संसारावर्तः** । **कलां** शक्तिम् । 'विद्यायां कालभेदे च शक्तौ शिल्पे कला' इति **शाश्वतः** । **तां** प्रसिद्धाम्, अनिर्वाच्यां वा । **वाणीं** सरस्वतीं च **वन्देमहि** इत्येकपदो बहुवचनो धातुः । 'प्रसिद्धेनाप्रसिद्धं बोधयेत्' इति न्यायेन वन्देमहीत्यस्य प्रणमाम इत्यर्थो बोध्यः । वयमिति शेपः । 'वन्देमहि महादेवं मन्देतरधियो वयम्' इति **हास्यमिश्रः** । नान्दीपदनियमं न खलु कवयो गणयन्ति । अर्थादत्र द्वादशपदी नान्दी संवृत्ता । कलात्मशब्दाभ्यां सीतारामौ सूच्येते ॥ 'अर्थतः शब्दतो वापि मनाक्काव्यार्थसूचनम् ।' इति लक्षणात् ॥१॥ अथ कविः, 'कविकाव्यनटादीनां प्रशंसा तु प्ररोचना' इति, 'प्ररोचना चाङ्गतया प्रयुज्यते' इति च लक्षणावश्यकत्वादा·

नान्द्यन्ते। **सूत्रधारः**—अलमतिविस्तरेण। अद्य खलु भगवतः कालप्रियानाथस्य[1] यात्रायामार्यमिश्रान्विज्ञापयामि—एवमत्रभवन्तो विदांकुर्वन्तु। अस्ति खलु[2] तत्रभवान्काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञो[3] भवभूतिर्नाम जातूकर्णीपुत्रः[4]।

यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते[5]।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते[6] ॥ २ ॥

त्मानं वर्णयन् नाटकीयेतिवृत्तसंक्षेपादिकं संग्रहेणोपक्रमते—**नान्द्यन्त** इत्यादि। **भगवतः** षाड्गुण्यपरिपूर्णस्य। **कालप्रिये**ति तत्रत्यदेव्या नाम। पुराणगम्येयं कथा। **यात्रा** महोत्सवप्रयुक्तेति भावः। **आर्येषु** ज्ञानवृद्धेषु। **मिश्रान्** पूज्यान्। **एवं** वक्ष्यमाणप्रकारेण। **अत्र** रूपके। **विदाङ्कुर्वन्तु** जानन्तु। **भगवान्** कीर्तिमान्। **काश्यपः** कश्यपवंशभवः काश्यपः। **मल्लिनाथ**प्रयोगात् **श्रीकण्ठ** इति **पदं** नाम **लाञ्छनं** व्यवहारः यस्य श्रीकण्ठाख्य इत्यर्थः। **श्रीकण्ठस्य** शिवस्य **पदे** पादावेव **लाञ्छनं** विरुदं यस्येति वार्थः। शिवपादाब्जनिरत इति यावत्। 'पदं स्थानाङ्किनामादौ' इति, 'लाञ्छनं व्यवहाराङ्कविरुदेषु' इति **रुद्रकेशवौ** ॥ 'शम्भो कालप्रियानाथ श्रीकण्ठ' इति **शशिशेखरे पुष्पदन्तस्तवे**। प्रमाणानि कोशादयः। 'कोशवानाचार्यः' इति स्मरणात्। **भवात्** शिवात् **भूतिः** भस्म संपत् यस्य ईश्वरेणैव जातु द्विजरूपेण विभूतिर्दत्ता, तदाप्रभृति भवभूतिरिति प्रसिद्धो जात इति च परावरविदो विदन्ति ॥ **यं ब्रह्माणमियं देवी**ति ॥२॥ ब्राह्मणं षट्कर्मनिरतम्। अनेनान्तर्मुखेऽप्युच्छृङ्खलप्रवृत्तौ **कालिदास**कवावसूयादोषः प्रकृतकविना...अनुसन्धेयम्। **अन्ववर्तत** इति प्रचुरं पाठमङ्गीकृत्य केचिद्व्याचक्रुः। तन्न, अस्ति खल्विति वाक्यविरोधात्, **अनुवर्तत** इत्येव पाठः। **तत्प्रणीत**मित्यविचारितरमणीयः पाठः। कविरस्ति यमिति तत्प्रणीतमिति च पूर्वोत्तरवाक्यानां परस्परासङ्गतत्वात्। **यत्प्रणीत**मिति युक्तः पाठः। पूर्ववाक्ये कविरस्तीति कथनेन उत्तरवाक्ययोः यमिति यत्प्रणीतमिति कथनस्य सामीचीन्यात्। अत एव, 'अम्भोजभूराविरासीत्। आभाति यत्कृतिः' इत्यसम्याख्यात**भोजचम्पौ**। शिष्यविज्ञापने विशेषज्ञाः प्रमाणम्। **प्रयोक्ष्यते** मयेति शेषः ॥ अत्र पुनः—'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इति **विक्रमार्क**वचनविश्वासिनः केचिदलङ्कारविद्यार्थिनः वदन्ति। तत्र विशेषज्ञ-

---

१ 'कालप्रियनाथस्य' इति व-घ-क. २ 'खलु' इति नास्ति व-पुस्तके. ३ '०प्रमाणतत्त्वज्ञः' इति व. ४ 'जतुकर्णीपुत्रः' इति न. ५ 'अन्ववर्तत' इति न. ६ 'प्रयुज्यते' इति व-घ.

एषोऽस्मि[1] कार्यवशादायोध्यकस्तदानींतनश्च संवृत्तः[2] । (समन्तादवलोक्य ।) भो भो यदा तावदत्रभवतः[3] पौलस्त्यकुलधूमकेतोर्महाराजरामस्यायमभिषेकसमयो[4] रात्रिंदिवमसंहृतानन्दनान्दीकस्तत्किमिदानीं[5] विश्रान्तचारणानि चत्वरस्थानानि ।

प्रविश्य । **नटः**—भाव प्रेषिता हीतः[6] स्वगृहान्महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्गमराक्षसाः सभाजनोपस्थायिनश्च[7] नानादिगन्तागता[8] ब्रह्मर्षयो राजर्षयश्च यत्समाराधनायैतावतो दिवसानुत्सवे[9] आसीत् ।

हृदयङ्गमम् । यतः—'कनिष्ठिकाधिष्ठितकालिदासा' इति, 'घटानां निर्मातुः' इति, 'जानीते **जयदेव** एव' इति, 'जानीते नितरामसौ' इति, 'योहि (धोयी ?) कविक्ष्मापतिः' इति, '**दण्डिनः** पदलालित्यं **भारवे**रर्थगौरवम् । उपमा **कालिदासस्य माघे** सन्ति त्रयो गुणाः......॥'...को धनञ्जयः' इति, 'सूक्तिः सुधास्यन्दिनी' इत्यादिभिर्गीर्भिरात्मस्तुतिपरनिन्दावर्षाकालाकलापिनः सर्व एव कवयो गर्वनिधयोऽमीषु के...निरङ्कुशा एते तूष्णींशीलैः सस्मितविनयाभिनन्दनीयगद्यगुम्फाः । अत एव, 'सर्वं विनश्यति विहाय कवित्वमेकं...कायेन साकम्' इति, 'कल्प...स्ते काव्यम्' इति प्राञ्चश्च, इत्यलमतिविस्तरेण ॥ ननु तदेतन्नाटकमेव न भवति शृङ्गारवीरयोरन्यतरस्य रसस्य प्राधान्यमिति नियमात्, करुणारसस्यैव भूयस्तरत्वादिति चेत्, सत्यम् । शृङ्गारवीरान्यतरस्याङ्गित्वं, अन्येषामङ्गत्वेन प्रवेशो यद्यपि, तथापि, 'प्रधानं यो...वमुच्यता । अन्ये त्वङ्गानि शृङ्गारवीरौ तु प्रायिकौ क्वचित् ॥' इति रूपकादशो...नाटकमित्येवानुग्राह्यमालङ्कारिकैः ॥ २ ॥ **वशात्** अधीनत्वात् । अयोध्यासंबन्धी **आयोध्यिकः** । तदानीम्भवश्च । एतेन पुराय...व्यावृत्तं तथैव प्रयोक्ष्यत इति तत्तत्पात्राभिनय...यो व्यज्यते । अये आश्चर्ये । 'मङ्गलेऽपि च **नान्दी**' इति **रत्नमाला** । विशेषेण **श्रान्तानि चरणानि** संचारा येषु । 'संचारचरणं...**चत्वरं** राजाङ्गणम् । 'हजारी' इति **महाराष्ट्राः** । **स्थानानि** तदन्यस्थलानि । **नटो** मारिषः पारिपार्श्वकः । इति नाट्यपद्धतिः । भावस्तु...रिति **हैमः** । 'भावुजी' इति **महाराष्ट्राः** । 'गृहाः पुंसि च भूम्न्येव' **इत्यमरः** । यमेति मध्येति च ध्वनी । **सभाजने** आनन्दनविषये । उपस्थायिनः उप...एव सेवातत्परा इति यावत् । **दिवसा**निति काला-

---

१ 'एषोऽहं' इति **घ.**　२ 'कविवशात्' इति **न.**　३ 'तत्रभवतः' इति **व.**　४ 'पट्टाभिषेक' इति **न.**　५ 'असंहृतनान्दीकः' इति **न.**　६ 'प्रेषिता हि स्व०' **न—व.**　७ 'समाजोपस्थायिनो' इति **घ.**　८ 'दिगन्तपावना' इति **न—व.**　९ 'प्रमोद' इति **न.**

सूत्रधारः—आँ अस्त्येतन्निमित्तम्।

नटः—अन्यच्च[1]।

वसिष्ठाधिष्ठिता देव्यो गता राघवमातरः।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम्॥ ३॥

सूत्रधारः—वैदेशिकोऽस्मीति पृच्छामि। कः पुनरसौ जामाता[2]।

नटः—कन्यां दशरथो राजा शान्तां नाम व्यजीजनत्।
अपत्यकृतिकां राज्ञे रोमपादाय[3] यां[4] ददौ॥ ४॥

विभाण्डकसुतस्तामृष्यशृङ्ग उपयेमे। तेन च सांप्रतं द्वादशवार्षिकं सत्रमारब्धम्। तदनुरोधात्कठोरगर्भामपि जानकीं विमुच्य गुरुजनस्तत्र गतः।

सूत्रधारः—तत्किमनेन। एहि राजद्वारमेव स्वजातिसमयेनोपतिष्ठावः।

नटः—तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्रपद्धतिं भावः।

सूत्रधारः—मारिष

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः॥ ५॥

नटः—अतिदुर्जन इति वक्तव्यम्।

ध्वनोरिति द्वितीया। **आः** कोपपीडयोः॥ **वसिष्ठाधिष्ठिता** इति॥३॥ **वसिष्ठः अधिष्ठितः** पुरस्कृतः याभिः। **यज्ञे** सति॥ ३॥ **वैदेशिकः** विदेशस्थः। पारदेशिको विदेशस्थः॥ **कन्यां दशरथो राजेति**॥४॥ **व्यजीजनत्** जनयामास **अपत्यकृतिकां** दुहितृप्रायां तदुदरजातामिव स्थितामिति यावत्। क... **त्यमरमाला**। शान्ता दशरथस्यापत्यं इत्येतत्पुस्तकान्तरपाठाभिप्रायकं युगान्तरविषयकं वा। अत एव शतमुखसहस्रमुखरावणकथेत्यौत्तराः। पृथक् कुम्भकर्णघातिनौ रामलक्ष्मणौ, इति रामायणभारतयोश्च इति दिक्॥ ४॥ **उपयेमे** विवहति स्म। द्वादशवर्षैक्रियमाणं **द्वादशवार्षिकम्। तदनुरोधात्** ऋष्यशृङ्गानुवर्तनात्। **कठोरः** पूर्ण इति यावत्। **राजद्वार**मिति ध्वनिः। राजगृहद्वारमिति भावः। **समयेन** मर्यादया। अत्र तुहिचादयः प्रायेण पादपूरणे वाक्यालङ्कारे वा यथोचितं ज्ञेयाः॥ **सर्वथा व्यवहर्तव्य** इति॥५॥ **सर्वथा** सर्वप्रकारेण। **कुतः** कस्मात्। **साधुत्वे** शुद्धौ। 'साधु शुद्धौ रम्ये च' इति **हलायुधः। जनः** लोकः॥ ५॥ **दुर्मति**रिति अतिदुर्मतिरिति चौत्तराः पठन्ति॥

---

१ एतद्वाक्यं नास्ति न–घ–पुस्तकयोः. २ 'पुनर्जामाता' इति न–घ. ३ 'लोमपादाय' इति–ख–घ. ४ 'ताम्' इति न.

देव्यामपि हि वैदेह्यां सापवादो यतो जनः।
रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ॥ ६ ॥

सूत्रधारः—यदि पुनरियं किंवदन्ती महाराजं प्रति स्यन्देत[1] ततः कष्टं स्यात्।

नटः—सर्वथा ऋषयो देवताश्च श्रेयो[2] विधास्यन्ति। (परिक्रम्य) भो भोः क्वेदानीं महाराजः। (आकर्ण्य) एवं जनाः कथयन्ति—

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान्।
देव्यास्ततो विमनसः परिसान्त्वनाय
धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥ ७ ॥

(निष्क्रान्तौ।)

प्रस्तावना।

(ततः प्रविशत्युपविष्टो रामः सीता च।)

रामः—देवि वैदेहि, समाश्वसिहि। ते हि गुरवो न शक्नुवन्ति विहातुमस्मान्।

किं त्वनुष्ठाननित्यत्वं[4] स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥ ८ ॥

दुर्जनत्वं दुर्मतित्वं वा क्रियातो वर्णयति—**देव्या अपि हीति**॥६॥**वैदेह्याः** कृते इति शेषः। 'देव्यां वैदेह्यां' इति च पाठः। **हि** प्रसिद्धौ। अपवादे अतिदुर्जनत्वं अतिदुर्मतित्वं वा उपपादयति—**रक्ष** इति। **अग्नीति**, पुरा युद्धकाण्डकृतायामित्यर्थः ॥ ६ ॥ **प्रतिष्ठते** प्राप्नोति इति यावत्। **एवं** वक्ष्यमाणोऽनुवाद इत्यर्थः ॥ **स्नेहात्सभाजयितुमिति** ॥ ७ ॥ **सभाजयितुं** रामं इति शेषः। **विदेहान्** देशान्। ध्वनिश्च। **धर्मासनात्** न्यायविचारसिंहासनात्। **नरेन्द्रः** रामः। एतेन कथोपक्षेपपात्रप्रवेशौ सूचितौ ॥ 'स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम्। प्रस्तावना वा तत्र स्यात्' इति, 'नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि वा' इति लक्षणात् ॥७॥ इति प्रस्तावना ॥ **किन्त्वनुष्ठाननित्यत्वमिति** ॥८॥ **नित्यत्वं** नियमेन करणम्। **स्वातन्त्र्यं** स्वच्छन्दविहारम्। **प्रत्यवायैः** अकरणे प्रायश्चित्तैः। **गृहस्थता** गार्हस्थ्यम्। गृहपतित्वमिति यावत्। अग्निमन्त्र

---

१ 'रक्षोगृहे' इति ग. २ 'महाराजं प्रति स्पृशेत्' इति ग; 'महाराज न्पृशेत' इति च. ३ 'स्वस्ति करिष्यन्ति' इति ग. ४ 'नित्यत्वात्' इति ग.

सीता—जाणामि अज्जउत्त जाणामि । किंदु संदावआरिणो बन्धुअणविप्पओआ होन्ति । जानामि आर्यपुत्र जानामि । किं तु सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति ।

रामः—एवमेतत् । एते हि हृदयमर्मच्छिदः संसारभावा येभ्यो बीभत्समानाः संत्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः ।

प्रविश्य । **कञ्चुकी**—रामभद्र-(इत्यर्धोक्ते साशङ्कम्) महाराज ।

रामः—(सस्मितम् ।) आर्य ननु रामभद्र इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य । तद्यथाभ्यस्तमभिधीयताम् ।

कञ्चुकी—देव ऋष्यशृङ्गाश्रमादष्टावक्रः संप्राप्तः ।

सीता—अज्ज तदो किं विलम्बीअदि । आर्य ततः किं विलम्ब्यते ।

रामः—त्वरितं प्रवेशय ।

(कञ्चुकी निष्क्रान्तः ।)

प्रविश्य । **अष्टावक्रः**—स्वस्ति वाम् ।

रामः—भगवन्, अभिवादये । इत आस्यताम् ।

सीता—भअवं णमो दे । अवि कुसलं सजामातुअस्स गुरुअणस्स अज्जाए सन्ताए अ । भगवन् नमस्ते । अपि कुशलं सजामातृकस्य गुरुजनस्यार्यायाः शान्तायाश्च ।

रामः—निर्विघ्नः सोमपीथी[1] आवुत्तो[2] मे भगवानृष्यशृङ्ग आर्या च शान्ता ।

सीता—अह्मे वि[3] सुमरदि । अस्मान् वा स्मरति ।

अष्टावक्रः—(उपविश्य) अथ किम् । देवि कुलगुरुर्भगवान्वसिष्ठस्त्वामिदमाह—

गृहस्थस्य मुख्यो धर्म इति भावः । तथा च 'अग्निहोत्रफला वेदाः' इति भारते । अनुष्ठानेति ध्वनिः । 'अनुष्ठितानन्तरजे'ति भर्तृमीढ (प्र ?) योगवत् क्षन्तव्यः ॥ ८ ॥ जानाम्यार्यपुत्र किन्तु सन्तापकारिणो भवन्ति गुरुजनविप्रयोगाः । अय्यउत्तेत्यत्र 'सर्वत्र लवराणं' इति रलोपः 'कगचजतदपयवानां प्रायो लोपः' इति पलोपश्च । अज्जउत्तेति पाठे 'यस्य जः' इति जत्वम् । येभ्यः भोगेभ्यः । सर्वान् भोगान् ॥ प्रविश्य इति प्रवेशासूचनं प्रमादः ॥ किं विलम्ब्यते । नमस्ते। अपि कुशलं मे सजामातृकाय गुरुजनाय । जामाता ऋष्यशृङ्गः । जामादुअस्सेति कथनं कवेः प्रमादः । 'पितृभ्रातृजामातॄणामरः' इत्यरादेशात्

---

१ 'सोमपीती' इति च-घ. २ 'आवुको' इति न. ३ 'वि' इति न-म.

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते ।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां कुलेषु[1] सविता च गुरुर्वयं च ॥ ९ ॥

तत्किमन्यदाशास्महे । केवलं वीरप्रसवा भूयाः ।

रामः—अनुगृहीताः स्मः ।

लौकिकानां हि साधूनामर्थं वागनुवर्तते[2] ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ १० ॥

अष्टावक्रः—इदं च भगवत्यारुन्धत्या देवीभिः शान्तया च भूयो भूयः सन्दिष्टम् । यः कश्चिद्गर्भदोहदो[3] भवत्यस्याः सोऽवश्यमचिरात्सम्पादयितव्य इति ।

रामः—क्रियते यद्येषा[4] कथयति ।

अष्टावक्रः—ननान्दुः पत्या च देव्याः सन्दिष्टमृष्यश्रृङ्गेण—वत्से कठोरगर्भेति नानीतासि । वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः । तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्याम इति ।

रामः—(सहर्षलज्जास्मितम् ।) तथास्तु । भगवता वसिष्ठेन न किंचिदादिष्टोऽस्मि ।

अष्टावक्रः—श्रूयताम् ।

जामाअरस्सेति कथनं युक्तम् । 'चतुर्थ्याः षष्ठीति' षष्ठीनिर्देशः । 'सोमपीथी तु सोमपाः' **इत्यमरः** । **भगवान्** माहात्म्यवान् । 'कीर्तिमाहात्म्ययोर्भगः' इति **पदार्थमाला** । **आर्या च शान्तेति** ध्वनिः । **अस्मानपि स्मरति** । **अथ किं** अङ्गीकारे । **आह** स्मेति शेषः ॥ **विश्वम्भरा भगवतीति** ॥ ९ ॥ **वधूः** स्नुषा, **सविता** सूर्यः । **गुरुः** आदिकारणम् । **वयं च** गुरव इत्यूह्यम् । पुरोहिता इत्यर्थः । 'गुरुर्गीष्पतिपित्रादौ' **इत्यमरः** । कुलेषु वयमिति च पूजायां बहुत्वम् । भगवती प्रजापतिरिति च ध्वनिः ॥ ' ध्रुवार्थे केवलं त्रिषु' इति **नाममाला** ॥९॥ **वीरस्य** पुत्रस्य **प्रसवः** प्रसूतिः यस्याः । 'वीरः पुत्रः' इति **वेदनिघण्टुः** ॥ **लौकिकानां हि** इति ॥ १० ॥ **लौकिकानां** अवैदिकानाम् । **वाक्**, आशीरूपा । **आद्यानां** मुख्यानाम् । 'ऋषयस्सत्यवचसः' इति, 'आद्यः प्रथममुख्ययोः' **इत्यमरसारस्वतौ** ॥ **अनुवर्तते** प्रतीक्षत इति **माठरः** ॥१०॥ **इदं**

---

१ 'गृहेषु' इति ख. २ 'अनुवर्तते' इति न. ३ 'गर्भदौर्हृदोदयो' इति न. ४ 'यदेषा' इति क–घ.

जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवं च राज्यम् ।
युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः ॥११॥

रामः—यथा समादिशति[1] भगवान्मैत्रावरुणिः ।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकानां[2] मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

सीता—अदो जेव्व राहवकुलधुरंधरो अज्जउत्तो । अत एव राघवकुलधुरंधर आर्यपुत्रः ।

रामः—कः कोऽत्र भोः । विश्राम्यतामष्टावक्रः ।

अष्टावक्रः—(उत्थाय परिक्रम्य च ।) अये कुमारलक्ष्मणः प्राप्तः । (इति निष्क्रान्तः)

प्रविश्य । लक्ष्मणः—जयति जयत्यार्यः । आर्य तेन चित्रकारेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथिकायामभिलिखितम्[3] । तत्पश्यत्वार्यः ।

वक्ष्यमाणम् । **देवीभिः** कौसल्यादिभिरित्यर्थः । **भूयोभूयः** पुनः पुनः । 'पुनर्भृशार्थयोर्भूयः' इति **संसारावर्तः** 'भूयोभूयो नमाम्यहम्' इति प्राञ्चः । '**दौहदं** दोहदेऽपि स्यादिच्छायां गर्भकौतुके' इति **विक्रमार्कः** । **यदि** चेदित्यर्थः । ननान्दुः रामभगिनीत्वाच्छान्तायाः । **पत्या** भर्त्रा ॥ 'ननान्दा तु स्वसा पत्युः' इत्यमरः । ननान्दुरिति यथोक्तं **तथे**त्यर्थः ॥ **जामातृयज्ञेन वय**मिति ॥ ११ ॥ **यज्ञेने**ति तृतीया । **वय**मिति मातरोऽहमरुन्धती च सर्वे वयमित्यर्थः । **बालः** कुमारः युवैवेत्यर्थः । अत एव 'कौमारहरः शचीदेव्याः' इति **नीलकण्ठः** । 'बालः कुमारे च' इति **शब्दमञ्जरी** । युवा त्वमेवासि इति च पाठः । **यत्** यस्मात्कारणात् । **वः** रघूणां युष्माकम् । **स्वस्मात्** आत्मनोऽपि । **यशः** प्रजानुरञ्जनरूपम् । **परमं** शाश्वतम् । **धनं** तद्युक्तः स्याः इत्यर्थः । तथा च—'यौवनं धनसंपत्तिः प्रभुत्वम्' इति विषयत्रयं त्वयि जागर्ति । तस्मादविवेकता मास्तु, सावधानेन पथा संचरस्वेति भावः ॥११॥ 'वसिष्ठे च मैत्रावरुणिः' इति **हारावली** । अगस्त्य इति पूर्वोत्तरसन्दर्भमूढः कोऽपि बभ्राम ॥ **स्नेहं दयां चे**ति ॥ १२ ॥ **यदि वा** अथवा 'आहो उताहो यदिवा' इति **रत्नमाला** । **जानकीमपी**त्यादीनि वचनानि रामस्य भाव्यर्थसूचकानीति तत्र तत्र सूक्ष्मबुद्धिभिरवगन्तव्यम् ॥१२॥ **अत एव राघवकुलधुरन्धरः** । राहवेत्यत्र 'अनादिनामसंयुक्तानां ख-घ-थ-ध-फ-भां हः' इति हत्वम् । 'श्रेष्ठौ धुर्यौ धुरन्धरौ' इति **मेदिनी** । 'आलेख्यं वीथिका

---

१ 'यथाह भगवान्' इति ब–घ. २ 'लोकस्य' इति न–ब–घ. ३ 'वीथ्याम्' इति क–न.

रामः—जानामि वत्स दुर्मनायमानां देवीं विनोदयितुम् । तत्कियन्त-मवधिं यावत् ।

लक्ष्मणः—यावदार्याया हुताशने विशुद्धिः ।

रामः—शान्तं पापम् । (ससान्त्ववचनम्)

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥ १३ ॥

देवि देवयजनसम्भवे प्रसीद । एष ते जीविताबधिः प्रवादः ।

कष्टो जनः कुलधनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशिवं न हि तत्क्षमं ते ।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥ १४ ॥

सीता—होदु अज्जउत्त होदु । एहि । पेक्खह्य दाव दे चरिदम् । भव-त्वार्यपुत्र भवतु । एहि । प्रेक्षामहे तावत्ते चरितम् । (इत्युत्थाय परिक्रामति ।)

लक्ष्मणः—इदं तदालेख्यम् ।

सीता—(निर्वर्ण्य ।) के एदे उवरि णिरन्तरट्ठिदा उवत्थुवन्ति विअ अज्जउत्तम् । क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम् ।

लक्ष्मणः—देवि, एतानि तानि सरहस्यानि जृम्भकास्त्राणि यानि भगवतः कृशाश्वात्कौशिकमृषिमुपसंक्रान्तानि तेन च ताटकावधे प्रसादीकृता-न्यार्यस्य ।

चित्रपटिका' इति **त्रिकाण्डशेषः** । **अवधिः** अवसानम् ॥ **उत्पत्तिपरिपूतायाः** इति ॥ १३ ॥ **पावनान्तरैः** पवित्रतापादकवस्तुभेदैः ॥१३॥ देवानां यजनं यत्र । यज्ञभूमिरित्यर्थः । **जीवितं अवधौ** अवसाने यस्य यावज्जीवमित्यर्थः ॥ **कष्टो जन** इति ॥ १४ ॥ 'स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत्' **इत्यमरः** । **कुलधनैः** कुलीनैः । **नः** अस्माकम् । **यत् अशिवं** निष्ठुरम्, **उक्तं** हुताशनशुद्धिरिति भाषितम् । **तत् ते** तव **न क्षमं** न योग्यम् । तुशब्दः पादपूरणे ॥ अत्र दृष्टान्तमाह—**नैसर्गिकी** स्वभावसिद्धा ॥१४॥ **आर्यपुत्र पश्यामस्ते चरितम्** । चरिदं इत्यत्र 'तो दः' इति दत्वम् । **निर्वर्ण्य** दृष्ट्वा । क इदानीमेते उपरि निरन्तरस्थिताः उपस्तुवन्तीवार्यपुत्रम् । **ठिदा** इत्यत्र 'स्थस्य ठः' इति ठत्वम् । थु(थु)वन्तीत्यत्र 'स्तस्य थः' इति थत्वं च ।

---

१ 'कियानवधिः' इति न. २ 'पापम् (ससान्त्ववचनम्)' इत्येतन्नास्ति च–पुस्तके; 'शान्तं शान्तम्' इति घ. ३ 'कष्टं' इति क, 'क्लिष्टो' इति न. ४ 'तन्मे' इति च; 'तन्मे दुरुक्तम्' इति घ. ५ 'अशुभं च न' इति न. ६ 'क्रामतः' इति च–घ. ७ 'कृशाश्वात्' इति न. ८ 'ऋषिं विश्वस्य मित्रं विश्वामित्रम्' इति च.

रामः—वन्दस्व देवि दिव्यास्त्राणि ।

ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि ।
एतान्यपश्यन्गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥१५॥

सीता—णमो एदाणं । नम एतेभ्यः ।

रामः—सर्वथेदानीं[1] त्वत्प्रसूतिमुपस्थास्यन्ति ।

सीता—अणुग्गहिदह्मि । अनुगृहीतास्मि ।

लक्ष्मणः—एष मिथिलावृत्तान्तः ।

सीता—अम्महे दलन्तणवणीलुप्पलसामलसिणिद्धमसिणसोहमाणमंसलेण देहसोहग्गेण विम्हअत्थिमिदतादवीसन्तसोम्मसुन्दरसिरी अणादरखंडिदे[2]संकरसरासणो सिहण्डमुद्धमुहमण्डलो अज्जउत्तो आलिहिदो । अहो दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरखण्डितशङ्करशरासनः शिखण्डमुग्धमुखमण्डल आर्यपुत्र आलिखितः ।

लक्ष्मणः—आर्ये पश्य पश्य ।

सम्बन्धिनो वसिष्ठादीनेष तातस्तवार्चति ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

तानि प्रसिद्धानि । **रहस्यैः** शरसन्धानमोक्षणोपसंहारादिमन्त्रैः **सहितानि जृम्भकानामस्त्राणि** । **मित्रं** सखायम् । **उपसंक्रान्तानि** प्राप्तानीति यावत् । **तेन** विश्वामित्रेण ॥ **ब्रह्मादय** इति॥१५॥**ब्रह्महिताय** ब्राह्मणसौख्याय । **स्वानि** स्वकीयानि ॥१५॥ **नम एतेभ्यः** । **त्वत्प्रसवं** त्वत्पुत्रम् । अनुगृहीतास्मि । **अम्हो** आश्चर्ये ॥ दलितनवनीलोत्पलश्यामलस्निग्धमसृणमांसलदेहसौभाग्येन विस्मयस्तिमिततातनगरजनदृश्यमानसोमसुन्दरश्रीः अनायासखण्डितशङ्करशरासनः शिखण्डमुग्धमण्डनः आर्यपुत्र आलिखितः । 'मसृणं स्निग्धं' **इत्यमरो**क्तेः स्निग्धमसृणयोरेकार्थता, तदपि अस्मद्याकृत**विद्धसालभञ्जिका**प्रथमाङ्कोक्तप्रणयप्ररूढप्रेमादीनामिव स्निग्धमसृणयोस्तत्तद्धातुमहिम्नाऽवान्तरभेदो दयया कल्पनीयः । सर्वत्रैवमूह्यम् । **मांसलं** सान्द्रम् । **सोमवत् श्रीः शोभा** 'सोमवत्प्रियदर्शनः' इति **रामायणे** । **अनायासेन** लीलया । 'शिखण्डो बर्हचूडयोः' **इत्यमरः** । **खण्डिते**त्यत्र केचन शिवद्रोहिणः पाषण्डाः परिहसन्तो दन्तान् दर्शयन्ति, तत्तुच्छम् ॥ रावणदुर्वहोऽपि शक्त्या हतो लक्ष्मणः यथा भक्ताय हनूमते लघुरभवत् तथा शिवलिङ्गप्रतिष्ठातेति 'अत्र पूर्वं महादेवः प्रसादमकरोत्प्रभुः' इत्यादिवचनेन **शिवगीतो**क्तविरजादीक्षानुग्रहेण च शिष्य-

---

१ 'सर्वथैतानि' इति क. २ 'खुटित' इति घ-च; 'त्थुडिद' इति न.

रामः—सुश्लिष्टमेतत्।

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥

सीता—एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहदिक्खिदा तुह्मे। अम्मो जाणामि तस्सिं जेव्व पदेसे तस्सिं जेव्व काले वत्तामि। एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। अहो जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्ते।

रामः—एवम्।

समयः स वर्तत इवैष यत्र मां
समनन्दयत्सुमुखि गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्तिमानिव महोत्सवः करः ॥ १८ ॥

लक्ष्मणः—इयमार्या। इयमप्यार्या माण्डवी। इयमपि वधूः श्रुतकीर्तिः।

सीता—वच्छ इअं वि अवरा का। वत्स इयमप्यपरा का।

लक्ष्मणः—(सलज्जस्मितम्। अपवार्य) अये ऊर्मिलां पृच्छत्यार्या। भवतु। अन्यतः सञ्चारयामि। (प्रकाशम्) आर्ये दृश्यतां द्रष्टव्यमेतत्। अयं च भगवान्भार्गवः।

भक्तवात्सल्य रामस्य दयानिधिर्जगदीश्वरः खण्डनार्हविष्णुब्रह्माद्यवध्यरावणदुर्वहशरासनोऽभूदिति प्रामाणिकाः। अत एव 'बालक्रीडनमिन्दुशेखरधनुर्भङ्गावधि' इति भगवान् बोधायनः। 'श्रीमतः शितिकण्ठस्य कृत्यं हि दुरतिक्रमम्' इत्युत्तररामायणे च विग्रहवद्धर्मस्य रामस्यैव वाक्यं इति दिक्। सुतरां श्लिष्टं युक्तमित्यर्थः ॥ जनकानां रघूणामिति ॥१७॥ यत्र संबन्धे। तथा च 'जनक देहि कन्यां गृहाण राम' इति वक्तुं कारयितुं च स्वयं स एष एव सर्वस्वतन्त्र इति भावः ॥१७॥ एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारोऽपि भ्रातरो विवाहदीक्षिता यूयम्। कालकृतेति ध्वनिः। अम्हो जानामि तस्मिन्नेव काले वर्ते इति। एवं बाढमित्यर्थः ॥ समयस्स वर्तत इति ॥१८॥ यत्र समये। आदराद्गृहीतश्चासौ कमनीयकङ्कण इति विवेकः। अयमागृहीतेति ध्वनिः ॥ ॥ १८ ॥ आर्या सीता। माण्डवी भरतपत्नी श्रुतकीर्तिः शत्रुघ्नपत्नी। इयमपरा का। 'रहोऽन्येन सहोक्तौ स्यादपवार्य जनान्तिकम्' इति लक्षणात् प्रकृते अन्येन सह भाषणाभावात् कवेः प्रमादः। अथापि 'स्वमनसा

---

१ ०द्रव्यमेतत्' न—च; 'दृष्टमेतत्' इति घ. २ '०मुद्गृहीत' इति च—घ. ३ 'सञ्चरामि' इति घ.

सीता—(ससंभ्रमम्) कंम्पिदह्मि । कम्पितास्मि ।

रामः—ऋषे नमस्ते ।

लक्ष्मणः—आर्ये पश्य पश्य । अयमसावार्येण (इत्यर्धोक्ते)

रामः—(साधिक्षपम्) अयि वत्स बहुतरं द्रष्टव्यम् । अन्यतो दर्शय ।

सीता—(सस्नेहबहुमानं निर्वर्ण्य ।) सुट्ठु सोहसि अज्जउत्त एदिणा विणअमाहप्पेणं । सुष्ठु शोभसे आर्यपुत्र एतेन विनयमाहात्म्येन ।

लक्ष्मणः—एते वयमयोध्यां प्राप्ताः ।

रामः—(सास्रम्) स्मरामि हन्त स्मरामि ।

जीवत्सु तातपादेषु नवे दारपरिग्रहे ।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ १९ ॥

इयमपि तदा जानकी

पतनविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-
र्दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखम् ।
ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः ॥ २० ॥

लक्ष्मणः—एषा मन्थरा ।

रामः—(सत्वरमन्यतो दर्शयन् ।) देवि वैदेहि

सह’ इति दयया समाधेयम् । ‘आत्मगतं स्वगतं’ इति वा पाठः साधुः । **ऊर्मिला** लक्ष्मणस्य पत्नी । **भार्गवः** जामदग्न्यः । **कम्पितास्मि । साधिक्षेपमिति**—स्वोत्कर्षः परानुत्कर्षश्च न श्रोतव्य इति भावः । शोभते आर्यपुत्र एतेन विनयमाहात्म्येन । ‘पाल्यमानानां’ इति पाठः साधुः ॥ **जीवत्सु तातपादेष्विति** ॥ १९ ॥ नः अस्माकम् ॥ १९ ॥ **पतनविरलैरिति** ॥ २० ॥ मध्ये मध्ये दन्तानां **पतनेन विरलैः** गर्तसामन्तैरिति भावः । **मन्दः** स्वल्पः **आलोकः** द्योतः यस्मिन्मुखे । **ललितललितैरिति** वीप्सायां द्विरुक्तिः भृशं ललितैरित्यर्थः । **ज्योत्स्नाप्रायैः** चन्द्रिकाप्रचुरैः तद्वच्छीतलैः सुखकरैश्चेति भावः । **विभ्रमो** विलासः । **अकृत** चकार । **मधुरैः** मनोज्ञैः । **मुग्धा** सुन्दरीति **परिभाषः** । मूढेत्यर्थः । ‘मुग्धस्तु-

---

१ ‘मादम्हि’ इति ख–घ. २ ‘माहप्पेण’ इति क. ३ ‘नूतने दारसंग्रहे न.
४ ‘पतनु. इति ख–घ–ङ. ५ ‘कच्छलैः’ इति न. ६ ‘अङ्गानाम्’ इति न.
७ ‘अनुत्तरमन्यतो गत्वा’ इति ख–घ.

इङ्गुदीपादपः सोयं शृङ्गबेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत्समागमः ॥ २१ ॥

लक्ष्मणः—(विहस्य। स्वगतम्।) अये मध्यमाम्बावृत्तमन्तरितमार्येण।

सीता—अम्मो एसो जडासंजमणवुत्तन्तो । अहो एष जटासंयमनवृत्तान्तः।

लक्ष्मणः—पुत्रसंक्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिर्धृतम्।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम् ॥ २२ ॥

सीता—एसा पसण्णपुण्णसलिला भअवदी भाईरही। एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।

रामः—देवि रघुकुलदेवते नमस्ते।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसामर्षात्प्लुष्टान्पितुश्च पितामहान्।
अगणिततनूतापं तप्त्वा तपांसि भगीरथो
भगवति तव स्पृष्टानद्भिश्चिरादुदतीतरत् ॥ २३ ॥

सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव।

न्दरमूढयोः' इति **यादवः** ॥ २० ॥ **इङ्गुदीपादप** इति ॥ २१ ॥ 'इङ्गुदी तापसतरुः' **इत्यमरः**। **यत्र** पादपे पादपप्रदेशे इत्यर्थः । यत्र शृङ्गिबेरपुरे इति केचित्। तन्न। सोऽयं पादप इति वाक्यविरोधात् । 'स्निग्धस्सुहृत्' इति **वामनः** ॥ २१ ॥ **मध्यमाम्बा** कैकेयी । उत्तमाम्बा नेति व्यज्यते। **वृत्तं**। वृत्तान्तं इति भ्रान्तः पाठः । वृत्तान्त **इत्यमरः**। **अन्तर्हितमिति**–मातृनिन्दा मा भूदिति भावः। एष जटासंयमनवृत्तान्तः ॥ **पुत्रसंक्रान्तेति** ॥ २२ ॥ यद्वृद्धेक्ष्वाकुभिरित्यादि सन्धिसङ्कटम् । अन्तर्ज्वलन्निटिलेति ग्राव्णृङ्गासरेति च अस्मद्व्याख्यात**विद्धसालभञ्जिकाभारतचम्पू**प्रयोगवद्द्रष्टव्यम्। **बाल्ये** कौमारदशायाम् । **आरण्यका** वनवासिनः ॥ २२ ॥ एषा प्रसन्नपुण्यसलिला भगवती भागीरथी ॥ **तुरगविचयव्यग्रेति** ॥ २३ ॥ **विचये** अन्वेषणे । **कपिल एव महः** तेजः । तेन कर्त्रा । **रोषाद्धेतोः**।

---

१ 'वृत्तान्तमन्तरितम्' इति न; 'वृत्तान्तोऽन्तरितः' इति क. २ 'कृतम्' इति घ. ३ 'आरण्यकं व्रतम्' इति घ–च. ४ 'रोषात्' इति न. ५ 'पुरा प्रपितामहान्' इति ब–क; 'पितुः प्रपितामहान्' इति घ. ६ '°तनूतापः' इति न; 'तनूपातं' इति ब–घ. ७ 'उददीधरत्' इति ब–ब; 'उदवीधरत्' इति क.

लक्ष्मणः—अयमसौ भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम ।

रामः—(सस्पृहमवलोकयति ।)[1]

सीता—सुमरदि वा एदं पदेसं अज्जउत्तो । स्मरति वैतं प्रदेशमार्यपुत्रः।

रामः—अयि कथं विस्मर्यते ।

अलसललितमुग्धान्यध्वसम्पात[2]खेदा-
दशिथिलपरिरम्भैर्दत्तसंवाहनानि ।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥ २४ ॥

लक्ष्मणः—एष विन्ध्याटवीमुखे विराधसंरोधः[3] ।

सीता—अलं दाव एदिणा । पेक्खामि दाव अज्जउत्तस[4]हत्तधरिदतालव-न्तादवत्तनिवारिदादपं अत्तणो[5] दक्खिणारण्णप्पवेसारम्भम्[6] । अलं तावदेतेन । प्रेक्षे तावदार्यपुत्रस्वहस्तधृततालवृन्तातपत्रनिवारितातपमात्मनो दक्षिणारण्य-प्रवेशारम्भम् ।

प्लुष्टान् दग्धान् । **पितुः** भगीरथजनकस्य । **प्रपितामहान्** सगरपुत्रान् । **उदतीतरत्** उत्तारयामास ॥ २३ ॥ **अरुन्धतीव** स्थिता **सा** प्रसिद्धा त्वमिति ॥ अथवा—यथा अरुन्धती तथा सा त्वमित्यर्थः । **शिवं** मङ्गलं **अनुध्यानं** अनुचिन्तनं यस्याः । 'वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः' इत्यमरः ॥ स्मरति वा एनं प्रदेशमार्यपुत्रः । **अलसललितेति** ॥ २४ ॥ **यत्र** प्रदेशे **अध्वसम्पातखेदात् अलसानि** आलस्ययुक्तानि जडानीति यावत् । स्वभावतस्तु **ललितेन** विलासेन मुग्धानि मनोज्ञानीत्यर्थः ॥ 'संपाते चातिपतनगतिपातोऽप्यतिक्रमः ।' इति **त्रिरूपः** । **अशिथिलपरिरम्भैः** दृढालिङ्गनैः । **संवाहनं** मर्दनम् । अन्योन्यसंघट्टनवशादिति भावः । **परि-मृदिताः** क्लिष्टाश्च ताः । 'मृणालं त्रिषु' इति **विक्रमार्कः** । 'पाणौ मृणा-लीलता' इत्यसध्याख्यात**विद्धसालभञ्जिकायाम्** । तस्मादितरविस्मरणेऽपि नेदं विस्मर्यत इति भावः ॥ २४ ॥ **अटवीमुखे** वनपुरःप्रदेशे ॥ अलमेतेन पश्यामि तावदार्यपुत्रस्वहस्तधारिततालवृन्तातप(त्र ?)निवारितातपं आत्मन अक्षिभ्यां दक्षिणारण्यपथिकत्वम् ॥ **तालवन्तेति** कवेः प्रमादः । 'ता-

---

१ एतन्नास्ति व–घ–पुस्तकयोः. २ 'सञ्जात' इति व–घ–क. ३ 'संवादः' इति न. ४ 'अज्जउत्तहत्थ' इति व–घ. ५ 'तालवेण्टा०' इति घ; 'तालवे-ण्टादवत्तं' इति व; 'तालवुन्तादवत्तं' इति न. ६ 'अत्तणो अच्चाहिदं दक्खिणार-ण्णपहिअत्तणम्' इति न.

रामः—एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि ।
येष्वातिथेयपरमा यमिनो[1] भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥ २५ ॥

लक्ष्मणः—अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः[2] सततमभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो गिरिः प्रस्रवणो नाम ।

रामः—स्मरसि सुतनु तस्मिन्पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि ।
स्मरसि सरसनीरां[3] तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि ॥ २६ ॥

किं च । किमपि किमपि मन्दं मन्दमासक्तियोगा-[4]
दविरलितकपोलं जल्पतोरक्रमेण ।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् ॥ २७ ॥

लक्ष्मणः—एषा पञ्चवट्यां शूर्पणखा[5] ।

लन्तेऽथ' इत्यनुशासनात् 'तालओण्डे'ति कथनस्यैव न्याय्यत्वात् । 'अच्छिहिं' इति 'द्विवचने बहुवचनं' इति बहुत्वं 'अक्खिहिं' इति च प्रमादः । 'अक्ष्यादिषु छः' इति छत्वविधानात् 'अच्छिहिं' इति साधीयान् पाठः ॥ **एतानि तानीति** ॥ २५ ॥ **निर्झरिणीनां** गिरिनदीनाम् । **येषु** तपोवनेषु ॥ 'क्रमादातिथ्यातिथेयातिथ्यर्थेऽत्र साधुनि ।' इत्यमरः । **यमिनः** नियमवन्तः । **गृहिणः** गृहस्थाः ॥ २५ ॥ **अनोकहनिवहाः** तरुसङ्घाः । तैः **निरन्तरं** सान्द्रं यथा तथा, **स्निग्धनीलानि** मसृणानि श्यामलानि च तानि **परिसरारण्यानि** तैः परिसरारण्यायां सान्द्रायां **गोदावर्यां मुखराः** यस्य पूर्वानुभवस्मरणात् चित्रे मुखरकन्दरत्वोपचारः इति बोध्यम् । **अभिष्यन्दमानाः** प्रस्रवन्तः ये **मेघाः तैर्मेदुरितः** निबिडीकृतः **नीलिमा** नैल्यं यस्य ॥ **स्मरसि सुतन्विति** ॥ २६ ॥ **लक्ष्मणेन प्रतिविहितेत्या**दिकं 'रतेर्गृहीतानुनयेन' इतिवत्समाधेयम् । **वर्तितानि** वर्तनानीत्यर्थः । द्वितीयपादादौ यमकभङ्गः । सरसीति द्विः पुनरुक्तं च ॥ २६ ॥ **किमपि किमपीति** ॥ २७ ॥ **किमपि** अनिर्वाच्यं यथा तथा, **किमपि** किञ्चिद् ।

---

१ 'शमिनो' इति ख-ग-क. २ 'मुखकन्दरः' इति न. ३ 'सरसवीराम्' इति ख-घ. ४ 'आसत्ति' इति क-घ. ५ 'एषः...शूर्पणखाविवादः' इति न.

सीता—हा अज्जउत्त एत्तिअं दे दंसणम् । हा आर्यपुत्र एतावत्ते दर्शनम् ।

रामः—अयि विप्रयोगत्रस्ते चित्रमेतत् ।

सीता—जहा तहा होदु । दुज्जणो असुहं उप्पादेइ । यथा तथा भवतु । दुर्जनोऽसुखमुत्पादयति ।

रामः—हन्त वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति ।

लक्ष्मणः—अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥ २८ ॥

सीता—(सास्रमात्मगतम् ।) अयि देव रहुकुलाणन्द एव्वं मम कारणादो किलन्तो[1] आसि । अयि देव रघुकुलानन्द एवं मम कारणात्क्लान्त आसीः ।

लक्ष्मणः—(रामं निर्वर्ण्य साकूतम् ।) आर्य किमेतत् ।

ईषदिति यावत् । मन्दं मन्दं शनैः शनैः । आसक्तियोगात् अभिनिवेशसङ्गतेः । अविरलितौ मिथो नीरन्ध्रीकृतौ कपोलौ यस्मिन् कर्मणि । अक्रमेण मदनावेशपारवश्यात्पूर्वोत्तरसम्बन्धाभावेनेत्यर्थः । एकैकदोष्णोः परस्परभुजयोः । अविदिताः गतयामाः अतिक्रान्तप्रहराः यस्याः । रात्रिरेव व्यरंसीत् विरराम । न तु संलापैकदेशोऽपीति भावः ॥ २७ ॥ आर्यपुत्र एतावत्ते दर्शनम् । यथा तथा वा भवतु । दुर्जनः असुखमुत्पादयति ॥ अथेदं रक्षोभिरिति ॥ २८ ॥ यथानन्तरं इदमेतत् । अथेदमिति वाक्यखण्डः । वृत्तं आचरितम् । 'वृत्तमाचरितातीतपद्यचारित्रवर्तुले' इति केदारः । क्षालितं निश्शेषितमपि वृत्तमित्यनुषज्यते । शून्ये सजातीयरहिते । विकलकरणैः विवशेन्द्रियैः । आर्यस्य रामस्य चरितैः प्ररुदितरूपैरित्यर्थः । अत एव ग्रावा शैलोऽपि रोदिति प्रतिध्वनिव्याजेनेत्यूह्यम् । इतोऽपि..न्येनाह—वज्रस्य कुलिशस्य । हृदयं गर्भः । दलति स्फुटति । अपिः संभावनायाम् । तथा च कदाचिदचलवज्रादीनां मार्दवः (?) स्यात् । न तु तेषां दुरात्मनामासीदिति भावः । 'हृदयं हृदि गर्भे च' इति पद्ममाला ॥ 'हन्त रोदिति शैलोऽपि वज्रगर्भोऽपि दीर्यति । प्रकम्पतेऽपि दिध्नण्डमण्डलं रो..नैव ॥' इति महानाटके मेघनादोत्पत्तौ भगवान् बोधायनः ॥ २८ ॥ अन्हो दिनकरकुलनन्दनः एतावन्मम कारणात् क्लान्त आसीत् । एतावदिति क्रियाविशेषणम् । कारणात् हेतोः । निर्वर्ण्य

---

1. 'करणैः' ग-घ. 2 'कलिदोसि' इति घ—ब क.

अयं तावद्बाष्पस्त्रुटित इव मुक्तामणिसरो
विसर्पन्धाराभिर्लुठति धरणीं जर्जरकणः ।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति च भराध्मातहृदयः ॥ २९ ॥

रामः—वत्स

तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः ।
दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां करोति ॥ ३० ॥

सीता—हद्धी हद्धी । अहं वि अदिभूमिं गदेण रणरणएण अज्जउत्त-सुण्णं विअ अत्ताणं पेक्खामि । हा धिक् हा धिक् । अहमप्यतिभूमिं गतेन रणरणकेनार्यपुत्रशून्यमिवात्मानं पश्यामि ।

लक्ष्मणः—(स्वगतम् ।) भवत्वन्यतः क्षिपामि । (चित्रं विलोक्य प्रकाशम् ।) अथैतन्मन्वन्तरपुराणगृध्रराजस्य तत्रभवतस्तातजटायुषश्चरित्र-विक्रमोदाहरणम् ।

दृष्ट्वा ॥ अयं तावद्बाष्प इति ॥ २९ ॥ तावत् अलङ्कारे । मुक्तामणीनां मौक्तिकरूपरत्नानाम्, सरः एकावली । मुक्तामणीति पुनरुक्तं इति केचित् ॥ तन्न ॥ 'रत्नमणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च' इति अमरसिंहेनाभिधानात् 'मौक्तिकमणिच्छायैः' इत्यसभ्याख्यातविकृत्स्वालभञ्जिकायाम् । धरणी-मुद्दिश्य । धरणौ इति च पाठः । धरणीतनयेति लक्ष्मणः । निरुद्धः आच्छा-दितोऽपि । 'आवेगो भयसंभ्रमः' इति अक्षरमाला । उन्नेतुं योग्यः उन्नेयः । आध्मातं पूरितं विफ(क ?)लीकृतं हृदयं येन ॥ २९ ॥ तत्कालं प्रि-यजनेति ॥ ३० ॥ स चासौ कालः तत्काले प्रियजनस्य सीतायाः तीव्रः तीक्ष्णः प्रतिकृतिः रावणसंहाररूपः प्रतीकारः । विसोढः मर्षितः । वि-श्लेषेण पच्यमानः हृन्मर्मव्रणः हृदयग्रन्थिव्रणः । 'मर्म तु ग्रन्थिदोषयोः' इति रभसः ॥ ३० ॥ हा धिक् हा धिक् अहमप्यतिभूमिं गतेन रणरणकेन आर्यपुत्रशून्यमिवात्मानं पश्यामि । अतिभूमिं आधिक्यम् । रणरणकशब्दो भीतिसंभ्रमवाचको देशीयः । थ(ध)डकीति महाराष्ट्राः । 'चरित्रमपि चारित्रं' इत्युभयरूपः ॥ हा तात निर्व्यूढस्तेऽपत्यस्नेहः । निर्व्यूढः निर्वाहं

---

१ 'हे वाष्पौघः' इति ख-घ. २ 'चिरमाध्मात०' इति न. ९ 'तनोति' ङ.

सीता—हा ताद णिव्वूढो दे अवच्चसिणेहो । हा तात निर्व्यूढस्तेऽपत्यस्नेहः ।

रामः—हा तात काश्यप शकुन्तराज क नु खलु पुनस्त्वादृशस्य महतस्तीर्थभूतस्य साधोः सम्भवः ।

लक्ष्मणः—अयमसौ जनस्थानस्य पश्चिमतः कुञ्जवान्नाम दनुकबन्धाधिष्ठितो दण्डकारण्यभागः । तदिदमृष्यमूकपर्वते मतङ्गस्याश्रमपदम् । इयं च श्रमणा नाम सिद्धा शबरतापसी । तदेतत्पम्पाभिधानं पद्मसरः ।

सीता—एत्थ किल अज्जउत्तेण विच्छिण्णामरिसधीरत्तणं पमुक्ककण्ठं रुण्णं आसि । अत्र किलार्यपुत्रेण विच्छिन्नामर्षधीरत्वं प्रमुक्तकण्ठं रुदितमासीत् ।

रामः—देवि रमणीयमेतत्सरः ।

> एतस्मिन्मदकलमल्लिकाक्षपक्ष-
> व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
> बाष्पाम्भःपरिपतनोद्गमान्तराले
> सन्दृष्टाः कुवलयिनो भुवो विभागाः ॥ ३१ ॥

लक्ष्मणः—अयमार्यो हनूमान् ।

सीता—एसो सो चिरणिव्वूढजीवलोअपच्चुद्धरणगुरुओवआरी महाणुभावो मारुदी । एष स चिरनिर्व्यूढजीवलोकप्रत्युद्धरणगुरुकोपकारी महानुभावो मारुतिः ।

गतः प्राणपर्यन्तमिति शेषः ॥ तीर्थभूतस्य गुरुप्रायस्य । जनस्थानं पश्चिमतः जनस्थानस्य पश्चिमभागे इत्यर्थः । श्रमणेषु तापसी शबरीत्यर्थः ॥ यत्र किल आर्यपुत्रेण विच्छिन्नामर्षधैर्येण प्रमुक्तकण्ठं प्ररुदितमासीत् । धीरमित्यत्र 'ई धैर्ये' इति, 'तुर्यधैर्यसौन्दर्याश्चर्यपर्यन्तेषु रः' इति च ईत्वं रत्वं च । रमणीयं इति ध्वनिः ॥ एतस्मिन्मदकल इति ॥ ३१ ॥ 'मलिना मल्लिकाक्षाः' इत्यमरः । तेषां पक्षैः व्याधूतानि कम्पितानि । स्फुरन्ति शोभमानानि उरुदण्डानि विपुलनालानि पुण्डरीकाणि येषु ते । बाष्पाम्भसां पतनोद्गमयोरन्तराले अवान्तरदशायामित्यर्थः । विभागाः प्रदेशाः ॥ ३१ ॥ अयमार्य इति ध्वनिः ॥ एष स चिरनिर्व्यूढजीवलोकप्रत्युद्धरणगुरुकोपकारो महानुभावः गुरुरेव गुरुकः स्वार्थे कः । प्रत्युद्धरण-

---

१ 'तीर्थस्य' च–घ–क. २ 'जनस्थानपश्चिमः' च–घ. ३ 'कुञ्जवाग्नाम पर्वतो' म. ४ 'तदिदमृष्यमूकपर्वते परिसरे' म. ५ 'सिद्धशबरी' च–घ ६ 'मया' म. ७ 'णिव्विण्ण' क–घ–च.

रामः—दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्धनः ।
यस्य वीर्येण कृतिनो वयं च भुवनानि च ॥ ३२ ॥

सीता—वच्छ एसो कुसुमिदकअम्बतरुतण्डविअबरिहिणो किंणामधेओ गिरि जत्थ अणुभावसोहग्गमेत्तपरिसेसधूसरसिरी मुहुत्तं मुच्छन्दो तुए परुदिएण अवलम्बिदो तरुअले अज्जउत्तो आलिहिदो । वत्स एष कुसुमितकदम्बतरुताण्डवितबर्हिणः किंनामधेयो गिरिर्यत्रानुभावसौभाग्यमात्रपरिशेषधूसरश्रीर्मुहूर्तं मूर्छंस्त्वया प्ररुदितेनावलम्बितस्तरुतल आर्यपुत्र आलिखितः ।

लक्ष्मणः—सोऽयं शैलः ककुभसुरभिर्माल्यवान्नाम यस्मि-
न्नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः ।

आर्येणास्मिन्

रामः—विरम विरमातःपरं न क्षमोऽस्मि
प्रत्यावृत्तः पुनरिव स मे जानकीविप्रयोगः ॥ ३३ ॥

लक्ष्मणः—अतः परमार्यस्य तत्रभवतां कपिराक्षसानां चासंख्याताम्युत्तरोत्तराणि कर्माश्चर्याणि । परिश्रान्ता चेयमार्या । तद्विज्ञापयामि विश्राम्यतामिति ।

सीता—अज्जउत्त एदिणा चित्तदंसणेण पच्चुप्पण्णदोहलाए अत्थि मए विण्णप्पं । आर्यपुत्र एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मम विज्ञाप्यम् ।

रामः—नन्वाज्ञापय ।

मेव गुरुकः विपुलः उपकारः यस्य सोऽयं शोभत इति शेषः ॥ दिष्ट्या सोऽयमित्यादि ॥ ३१ ॥ कृतिनः कुशलाः । कुशलानीति भुवनपक्षे ॥ ३२ ॥ वत्स एष कुसुमितकदम्बताण्डवितमयूरः किन्नामधेयो गिरिः । यत्रानुभावसौभाग्यमात्रपरिशेषधूसरश्रीः मूर्छन् त्वया प्ररुदितेनावलम्बितस्तरुतले आर्यपुत्रः आलिखितः । कदम्बाः नीपवृक्षाः । मोरो इति वक्तव्ये मऊरो इति कथनं कवेः प्रमादः । तथापि शेषस्संस्कृतादि(ति) सूत्रेण दयनीयोऽयं प्रयोगः । प्रकृष्टं रुदितं यस्य ॥ सोऽयं शैल इति ॥ ३३ ॥ अतः आर्येणास्मिन् इति वाक्यात् परं अन्यत् वक्ष्यमाणम् श्रोतुमिति शेषः । सः अनिर्वाच्यः । प्रत्यावृत्तः आगत इवेत्यर्थः । तृतीयचरणे राम इति व्यवधाने सत्यपि नाटकादौ न दोषः इत्यालङ्कारिकाणां समयः । अत एव विक्रमचरिते—'देवाकर्णय' इति शुकवाक्यप्रस्तावान्तरे 'तिष्ठति पतगेति'

---

१ 'सुन्दरसिरी' न. २ एतन्नास्ति क–घ–च–पुस्तकेषु. ३ 'वत्सैतस्माद्विरम' इति क–घ–च. ४ 'पुनरपि' च–ङ. ५ 'विण्णावणिज्जं' क–न.

सीता—जाणे पुणोवि पसण्णगम्भीरासु वणराइसु विहरिस्सं पवित्तणिम्मलसिसिरावगाहं भअवदिं भाईरहिं ओगाहिस्सं त्ति । जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहरिष्यामि पवित्रनिर्मलशिशिरावगाहां भगवतीं भागीरथीमवगाहिष्य इति ।

रामः—वत्स लक्ष्मण ।

लक्ष्मणः—एषोऽस्मि ।

रामः—वत्स अचिरं सम्पादनीयोऽस्या दोहद इति संमत्येव गुरुभिः सन्दिष्टम् । तदस्खलितसुखसम्पातं रथमुपस्थापय ।

सीता—अज्जउत्त तुम्हेहिं वि आअन्दव्वं । आर्यपुत्र युष्माभिरपि आगन्तव्यम् ।

रामः—अयि कठिनहृदये एतदपि वक्तव्यमेव ।

सीता—तेण हि पिअं मे पिअं मे । तेन हि प्रियं मे प्रियं मे ।

लक्ष्मणः—यथाज्ञापयत्यार्यः । (इति निष्क्रान्तः ।)

रामः—प्रिये अत्र वातायनोपकण्ठे मुहूर्तं संविष्टौ भवावः ।

सीता—एवं होदु । ओहरिदम्हि क्खु परिस्समजणिदाए णिद्दाए । एवं भवतु । अपहृतास्मि खलु परिश्रमजनितया निद्रया ।

रामः—तेन हि निरन्तरमवलम्बस्व मामनुगमनाय ।

जीवयन्निव ससाध्वसश्रमस्वेदबिन्दुरधिकण्ठमर्प्यताम् ।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥ २४ ॥

(तथा कारयन्सानन्दम् ।) प्रिये किमेतत् ।

भङ्गिनाभिधानादिति दिक् ॥ ३३ ॥ यमार्येति ध्वनिः ॥ आर्यपुत्र एतेन प्रियदर्शनेन प्रत्युत्पन्नदौहृदायाः विज्ञाप्यं मेऽस्ति । दोहलाए इत्यत्र 'दौहृदे ल' इति लत्वम् ॥ जाने पुनरपि प्रसन्नगभीरासु वनराजिषु विहरिष्यामि । पवित्रनिर्मलां शिशिरावगाहां भगवतीं भागीरथीमवगाहिष्ये इति ॥ तत् तस्मात् । सम्पातः चक्रमज्जनादिना पार्श्वादिषु कुण्ठनमित्यर्थः । उपस्थापयेति ध्वनिः ॥ आर्यपुत्र युष्माभिरप्यागन्तव्यम् । तेन हि प्रियं मे प्रियं मे । एवं भवतु । अपहृतास्मि खलु निद्रया । अनुगमनायेति ध्वनिः ॥ जीवयन्निवेति ॥ ३४ ॥ चन्द्रमणयः चन्द्रकान्ताः । विभ्रमः विन्यासः । बाहुरधिकण्ठमर्प्यताम् अन्धवदिति ध्वनिः ॥ ३४ ॥ तथेति—यथा सीता अधि-

---

१ 'सोम्म' क-घ-च. २ 'इतो वातायनावर्तके' घ-च. २ 'संविष्टा भव' च. ३ 'मामत्र शयनाय' क-घ-च.

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च ॥ ३५ ॥

सीता—थिरप्पसादा तुम्हे इदो दाणिं किं अवरम् । स्थिरप्रसादा यूयमित इदानीं किमपरम् ।

रामः—म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि ।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि ॥ ३६ ॥

सीता—पिअंवद एहि । संविसम्ह । (इति शयनाय समन्ततो निरूपयति) प्रियंवद एहि । संविशावः ।

रामः—अयि किमन्वेष्टव्यम् ।

कण्ठं बाहुमर्पयेत् तथेत्यर्थः ॥ अथ तमेव बाहुस्पर्शे विच्छित्तिविशेषैरुल्लिखति ॥ **विनिश्चेतुं शक्य** इति ॥ ३५ ॥ विगतश्चासौ निश्चय इति व्युत्पत्तिबलाद्विनिश्चयशब्देन निश्चयभिन्नज्ञानं विवक्ष्यते । तथा च **विनिश्चेतुं** ज्ञातुं **न शक्य** इत्यर्थः । प्रथमचरणस्य मोक्ष इति भावः । अत एव सुखदुःखं वस्तु मोक्ष इति प्राञ्चः । **प्रमोहः** मूर्च्छातिशयः । **विसर्पः** व्याप्तिः । **मदो** मत्तता । 'बालोन्मत्तपिशाचवद्' इति स्मृतेः । अनेन द्वितीयचरणस्य ज्ञानाभाव इति भावः । **परि** परितः । **मूढः** स्वस्वकार्यविमुखः **इन्द्रियगणो** यस्मिन् । चेतनस्य भावः **चैतन्यं** जन्म । इदं कर्म ज्ञेयम् । 'प्राणी तु चेतनो जन्मी' इत्यमरः । भ्रमशाली संमोहशाली च करोतीत्यर्थः । भ्रमः भ्रान्तिः । 'आनन्दभ्रमयोस्संमोहः' इति **नाममाला** । उत्तरार्धे **विकारो** ज्ञानाभासात्मक इति भावः । एवमालोच्य अनिर्वचनीयं पारवश्यमनुभवामीति पद्यस्य पर्यवसन्नोऽर्थः । अयमेव कवेर्भावः । एवमादिष्वन्नल्पेषु पद्येषु स्वाज्ञानपराङ्मुखा दुर्विदग्धाः परस्परं शिखां बिभ्रतः कलहायन्ते । शिष्यमितोक्तावनसूयविशेषज्ञाः प्रमाणम् । इति दिक् ॥ ३५ ॥ प्रसन्नो वदसीति पूजाभिप्रायेणाह—**वी(स्थि ?)रेति** । स्थिरप्रसादा यूयमिति किमत्राश्चर्यम् । **अत्र** चाद्रक्तौ । 'तूर्यधैर्यसौन्दर्यपर्यन्तेषु रः' इत्यनेन 'अचेरं' इति

---

१ 'समुन्मीलयति' इति ब. २ 'वीरप्रसादा यूयमत्रेदानीमाश्चर्यम्' न. ३ 'तानि सुवचनानि सरोरुहाक्ष्याः' द. ४ 'सहस्सं' (शयिष्ये) इति च–घ. ५ 'अपि सन्देष्टव्यम्' न.

आ विवाहसमयाद्गृहे वने शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपाश्रितोऽन्यया रामबाहुरुपधानमेष ते ॥ ३७ ॥

सीता—(निद्रां नाटयन्ती ।) अत्थि एदम् । अज्जउत्त अत्थि एदं (इति स्वपिति ।) अस्त्येतदार्यपुत्र अस्त्येतत् ।

रामः—कथं प्रियवचना मे वक्षसि प्रसुप्तैव । (निर्वर्ण्य)

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि[1] परमसह्यस्तु विरहः ॥ ३८ ॥

प्रविश्य । प्रतीहारी—देव उवट्ठिदो । देव उपस्थितः ।

रामः—अयि कः ।

प्रतीहारी—आसण्णपरिआरओ देवस्स दुम्मुहो । आसन्नपरिचारको देवस्य दुर्मुखः ।

रामः—(स्वगतम्) शुद्धान्तचारी दुर्मुखः । स मया पौरजानपदेष्वप-सर्पः[2] प्रहितः । (प्रकाशम्) आगच्छतु ।

(प्रतीहारी निष्क्रान्ता ।)

प्रविश्य । दुर्मुखः—(स्वगतम्) हा कहं दाणिं देविं अन्तरेण ईदिसं अचिन्तणिज्जं जणाववादं देव्वस्स कहइस्सं । अहवा णिओओ क्खु मे एरिसो

वक्तव्ये 'अच्चरिअं' इति प्रमादः ॥ म्लानस्य जीवकुसुमस्येति ॥ ३६ ॥ जीवः असुधारणम् । विकासनानि विकासकराणि । इति यथोचितमूह्यम् । पद्येऽस्मिन् ममेत्यध्याहारः ॥ ३६ ॥ प्रियंवद एहि संविशावः । अपिः संभावनायाम् ॥ आ विवाहसमयादिति ॥ ३७ ॥ वने दण्डकावने । अस्यान्ततोऽन्वयः ॥ ३७ ॥ आर्यपुत्र एतदस्ति । निर्वर्ण्य दृष्ट्वा ॥ इयं गेहे लक्ष्मीरिति ॥ ३८ ॥ अमृतरूपा अञ्जनवर्तिरिति भावः । मसृणः स्निग्धः । अस्याः किं न प्रेयः सर्वं प्रेय इत्यर्थः । तु किन्तु । विरहो यदि विरहश्चेत् परं अत्यन्तम् । असह्यः ॥ ३८ ॥ देव उपस्थितः । विरह इति च पूर्वेणान्वयः । आसन्नपरिचारको देवस्य दुर्मुखः । शुद्धान्तं अन्तःपुरम् । अपसर्पः चरस्सन् ॥ हा कथमिदानीं सीतादेवीमन्तरेणेदृशमचिन्तनीयं जनापवादं देवाय कथयिष्यामि । अथवा नियोगः खलु मे मन्दभाग्यस्यैषः । हा आर्यपुत्र क्वासि । सौजन्यं चिन्तनेति यावत् ॥ सौजन्यं वर्णयति ॥

---

१ 'यदि पुनरसह्यो न' इति क-ग. २ 'जानपदानपसर्पितुं' ख-ङ-व.

मन्दभाग्यस्य । हा कथमिदानीं देवीमन्तरेण ईदृशमचिन्तनीयं जनापवाद देवाय कथयिष्यामि । अथवा नियोगः खल्वीदृशो मे मन्दभाग्यस्य ।

सीता—(उत्स्वप्नायते) हा अज्जउत्त सोम्म कहिं सि । हा आर्यपुत्र सौम्य कुत्रासि ।

रामः—अये सैवेयं[1] रणरणकदायिनी चित्रदर्शनाद्विरहभावना देव्याः स्वप्नोद्वेगं करोति । (सस्नेहमङ्गमस्याः परामृशन् ।)

अद्वैतं सुखदुःखयोरनुगतं[2] सर्वास्ववस्थासु य-
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे[3] स्थितं
भद्रं तस्य[4] सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥ ३९ ॥

दुर्मुखः—(उपसृत्य ।) जेदु देवो । जयतु देवः ।

रामः—ब्रूहि यदुपलब्धम् ।

अद्वैतं सुखदुःखयोरिति ॥ ३९ ॥ **यत्** सुमानुषं सौजन्यम् । **सुख-दुःखयो**र्विषये । **अद्वैतं** द्वैविध्यरहितम् । एकमित्यर्थः । यच्छब्दचतुष्टयं सुमानुषपरामर्शीति बोध्यम् । **अवस्थासु** बाल्यकौमारयौवनजरासु यत् । **अनुगतं** अनुसारि । **विश्रामः** विश्रान्तिः । **यस्मिन्** सति । **जरसा** अपीति शेषः । जरयाऽपि । **रसः** प्रीतिः । शृङ्गारादिर्वा । **अहार्यः** अपरिहार्यः । **आवरणात्ययात्** सङ्केतापगमात् । **सारे** स्थिरांशे । **यत् स्थितं तस्य सुमानुष**स्येति भावप्रधानो निर्देशः । सौजन्यस्येत्यर्थः । कृते इति शेषः। अत एव, 'सुभगमपराद्धं' इत्यस्मद्व्याख्यातशाकुन्तले । 'मलिनं प्रमादि' इत्यस्मद्व्याख्यातविद्धसालभञ्जिकायां च । शोभनो मानुषो जनः येन सौजन्येन । तत् सुमानुषं इति वार्थः । 'मानुषो जनमर्त्ययोः' इति **नामनिधानम् । कथमपि** प्रयासेन । **तत्** प्रसिद्धम् । **एकं** मुख्यम् । **भद्रं** कल्याणम् । **प्राप्यते हि** प्रसिद्धौ ॥ तथा च मदनुरूपाया देव्याः सौजन्याय मङ्गलमाशास्यम् । मया तु दुर्मुखः पौरजानपदेषु विसृष्टः किमागत्य वक्ष्यति चेति भावः । 'विश्रामं भजतां' इति, 'विश्रामशाखिनं' इति च **कालिदास-मुरारि**प्रयोगवदमुष्य कवेः विश्राम इति प्रयोगः प्रामादिक इति प्रामाणिकाः । 'प्रतिसङ्कोचयोरावरणं' इति **संसारावर्तः** ॥ ३९ ॥ जयतु देवः । **उपलब्धं** ज्ञातम् । अनुभूतं वा । उपस्तुवन्ति देवं पौरजानपदाः । यथा विस्मृता वयं महाराजं दशरथं रामदेवेनेति ॥ **जानपदाः** देशवासिनः ।

---

१ 'ममैव' घ. २ 'अनुगुणं' च–घ–क. ३ 'प्रेमसारे' न. ४ 'प्रेम' च–घ.

दुर्मुखः—उवत्थुवन्ति देवं पोरजाणवदा विसुमराविदा अम्हे महाराअं दसरहं रामभद्देणेति । उपस्तुवन्ति देवं पौरजानपदा विस्मारिता वयं महाराजं दशरथं रामभद्रेणेति ।

रामः—अर्थवाद एषः । दोषं तु मे कञ्चित्कथय येन स प्रतिविधीयते ।

दुर्मुखः—(सास्रम् ।) सुणादु देओ । (कर्णे ।) एव्वं विअ । शृणोतु देवः । एवमिव ।

रामः—अहह तीव्रसंवेगो वाग्वज्रः । (इति मूर्छति)

दुर्मुखः—आस्ससदु देवो । आश्वसितु देवः ।

रामः—(आश्वस्य ।) हा हा धिक्परगृहवासदूषणं य-
द्वैदेह्याः प्रशमितमद्भुतैरुपायैः ।
एतत्तत्पुनरपि दैवदुर्विपाका-
दालर्कं विषमिव सर्वतः प्रसृप्तम् ॥ ४० ॥

तत्किमत्र मन्दभाग्यः करोमि । (विमृश्य सकरुणम्) अथवा किमन्यत् ।

सतां केनापि कार्येण लोकस्याराधनं व्रतम् ।
यत्पूरितं हि तातेन मां च प्राणांश्च मुञ्चता ॥ ४१ ॥

संप्रत्येव च भगवता वसिष्ठेन सन्दिष्टम् । अपि च ।

यत्सावित्रैर्दीपितं भूमिपालै-
र्लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्सम्बन्धात्कश्मला किंवदन्ती
स्याच्चेदस्मिन्हन्त धिङ्मामधन्यम् ॥ ४२ ॥

अर्थवादः स्तोत्रपद्धतिः । किञ्चित्किञ्चिदिति च पाठः । **येन** कारणेन । शृणोतु देवः, एवमिव । निष्पेप इति च पाठः । आश्वसितु देवः । 'हा हेति खेदातिशये' इति **रत्नमाला** ॥ **हा हा धिक् परेति** ॥ ४४ ॥ **तदेतत् आलर्कं** रोगिश्वसम्बन्धि । 'अलर्कस्तु सरोगतः' इत्यमरः । **प्रसृप्तं** व्याप्तम् ॥ ४० ॥ **सतां केनापीति** ॥ ४१ ॥ **तातेन** दशरथेन ॥ **सन्दिष्टमिति**—'प्रजानामनुरञ्जने स्याः' इत्यष्टावक्रेण पूर्वोक्तमिति भावः ॥ ४१ ॥ **यत्सावित्रैरिति** ॥ ४२ ॥ तस्य चरित्रस्य । **सम्बन्धाद्धेतोः** । **कश्मला** तुच्छा । अस्मान् सवितृभूपालानुद्दिश्येत्यर्थः ॥ ननु अहमेव पापी न खलु सावित्राः सर्वेऽपि

---

१ 'महाराअदसरहस्स' च-घ-क. २ 'तीव्रोऽयं' न. ३ 'प्रसक्तम्' न. ४ 'किमध' न. ५ 'परम्'. घ. ६ 'तत्प्रतीतम्' न; 'यत्पूजितं' घ. ७ 'चित्रम्' न.

हा देवि देवयजनसम्भवे हा स्वजन्मानुग्रहपवित्रितवसुन्धरे हा निमिजनकनन्दिनि हा पावकवसिष्ठारुन्धतीप्रशस्तशीलशालिनि हा राममयजीविते हा महारण्यवासप्रियसखि हा तातप्रिये हा स्तोकवादिनि कथमेवंविधायास्तवायमीदृशः परिणामः ।

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥ ४३ ॥

(दुर्मुखं प्रति ।) दुर्मुख ब्रूहि लक्ष्मणम् । एष ते नूतनो राजा रामः समाज्ञापयति । (कर्णे ।) एवमेवम् ।

दुर्मुखः—हा कहं दाणिं अग्गिपरिसुद्धाए गब्भट्ठिदपवित्तसंताणाए देईए दुज्जणवअणादो एवं अणज्जं अज्झवसिदं देएण । हा कथमिदानीमग्निपरिशुद्धायै गर्भस्थितपवित्रसन्तानायै देव्यै दुर्जनवचनादेवमनार्यमध्यवसितं देवेन ।

रामः—शान्तम् । कथ दुर्जनाः पौरजानपदाः ।

इक्ष्वाकुवंशोऽभिमतः प्रजानां
जातं च दैवाद्वचनीयवीजम् ।
यच्चाद्भुतं कर्म विशुद्धिकाले
प्रत्येतु कस्तद्यदि दूरवृत्तम् ॥ ४४ ॥

तद्गच्छ ।

दुर्मुखः—हा देई । हा देवि । (इति निष्क्रान्तः ।)

रामः—हा कष्टम् । अतिवीभत्सकर्मा नृशंसोऽस्मि संवृत्तः ।

दूष्या इत्याह—**धिङ्मामिति** ॥ ४२ ॥ 'नमो नमः शङ्करपार्वतीभ्यां' इत्यादिवत् **वसिष्ठारुन्धती**ति प्रयोगः क्षन्तव्यः। **स्तोकवादिनि** मितभाषिणि ॥ **त्वया जगन्ति पुण्यानी**ति ॥ ४३ ॥ **अनाथा** निराधारा । 'आधारप्रिययोर्नाथः' इति **रभसः** ॥ **नूतनः** निर्दय इति यावत् ॥ ४३ ॥ हा कथमग्निपरिशुद्धायै गर्भस्थितपवित्रसन्तानायै देव्यै दुर्जनवचनादिदमध्यवसितं देवेन । **अध्यवसितं** निश्चितम् ॥ **इक्ष्वाकुवंश** इति ॥ ४४ ॥ **वचनीयं** दूषणम् । **प्रत्येति** विश्वसिति । **तत्** अग्निकृतं सीतार्पणमि-

---

१ 'मुनिजनक' न. २ 'प्रियस्तोकवादिनि' व–घ. ३ पवित्तरहुउलसंताणाए' क–घ–व. ४ 'इदं ववसिदं' न. ५ 'शान्तं पापं शान्तं पापम् । दुर्जना नाम' न. ६ 'वंशोद्भवतः' व. ७ 'कस्तद्धयतिदूरवृत्तम्' क–घ–व.

शैशवात्प्रभृति पोषितां प्रियैः[1]
सौहृदादपृथगाश्रयामिमाम्[2]।
छद्मना परिददामि मृत्यवे
सौनिको[3] गृहशकुन्तिकामिव ॥ ४५ ॥

तत्किमस्पर्शनीयः पातकी देवीं दूषयामि । (इति सीतायाः शिरः स्वैर-मुन्नमय्य बाहुमाकर्षन् ।)

अपूर्वकर्मचण्डालमयि मुग्धे विमुञ्च माम् ।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥ ४६ ॥

(उत्थाय ।) हन्त विपर्यस्तः संप्रति जीवलोकः । अद्या[4]वसितं जीवित-प्रयोजनं रामस्य । शून्यमधुना जीर्णारण्यं जगत् । असारः संसारः । कष्ट-प्रायं शरीरम् । अशरणोऽस्मि किं करोमि का गतिः । अथवा हा अस्य

दुःखसंवेदनायैव रामे चैतन्यमाहितम्[5] ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि[6] ॥ ४७ ॥

अरुन्धति हा भगवन्तौ वसिष्ठविश्वामित्रौ हा भगवन्पावक हा देवि भूत-धात्रि हा तात जनक हा तात हा मातः[7] हा प्रियसख सुग्रीव हा सौम्य हनूमन् हा परमोपकारिन् लङ्काधिपते विभीषण हा सखि त्रिजटे परिमु[8]-षिताः स्थ परिभूताः स्थ रामहतकेन । अथवा को नाम तेषामहमिदानी-माह्वाने ।

त्यर्थः । दूरवृत्तं लङ्काद्वीपवृत्तम् । यदि संभावनायाम् ॥ ४४ ॥ शैशवादिति ॥ ४५ ॥ प्रियैः इष्टवस्तुभिः । छद्मना कैतवेन । मृत्यवे परित्यागरूपायेति सीतापक्षे । सौनिकः मृगपक्षिहिंसाशीलः ॥ ४५ ॥ अस्पर्शनीयः नीचः । दूषयामि अङ्गस्पर्शेनेति भावः ॥ अपूर्वकर्मेति ॥ ४६ ॥ अपूर्वं कैरप्येवं न कृतमित्यर्थः ॥ ४६ ॥ विपाकः परिणामः ॥ विपर्यस्तः व्यत्यस्तः । अवसितं अवसानं प्राप्तं शून्यं वस्तुरहितम् । जीर्णं शुष्कम् । अरण्यं वनम् ॥ दुःखसंवेदनायेति ॥ ४७ ॥ यस्मिन् संवेदनं ज्ञानम् । चैतन्यं जन्म । उपघातिभिः प्रहारिभिः कीलवत् शङ्कुवत् आचरितम् । प्राणव्याजाच्छङ्कुवो हृदि निखाता इत्यर्थः । अत एवाद्यापि मयि चैतन्यं वर्तत इति भावः ॥ ४७ ॥ भूतधात्रि वसुधे । तात दशरथ । जनक वैदेह ।

---

१ 'प्रियाम्' व–न–क. २ 'पृथगाशयां प्रियाम्' घ; 'पृथगाश्रयामिमाम्' प. ३ 'सौनिके' न. ४ 'पर्यवसितमद्य' क; 'पर्यवसितं जीवित०' व–घ. ५ 'आगतम्' न. ६ 'स्थिरैः' व–घ. ७ 'मातरः' व–घ–क. ८ 'कश्च' व–घ.

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥ ४८ ॥

योऽहम्

विस्रम्भादुरसि निपत्य लब्धनिद्रा-
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम् ।
आतङ्कस्फुरितकठोरगर्भगुर्वी
क्रव्याद्भ्यो बलिमिव निर्घृणः क्षिपामि ॥ ४९ ॥

(सीतायाः पादौ शिरसि कृत्वा) देवि देवि अयं पश्चिमस्ते रामशिरसा पादपङ्कजस्पर्शः । (रोदिति ।)

(नेपथ्ये) अब्रह्मण्यमब्रह्मण्यम् ।

रामः—ज्ञायतां भोः किमेतत् ।

(पुनर्नेपथ्ये) ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमः शरण्यं त्वामुपस्थितः ॥ ५० ॥

रामः—आः कथमद्यापि राक्षसत्रासः । तद्यावदस्य दुरात्मनो माधुरस्य कुम्भीनसीपुत्रस्योन्मूलनाय शत्रुघ्नं प्रेषयामि । (कतिचित्पदानि गत्वा पुनर्निवृत्य) हा देवि कथमेवंगता भविष्यसि । भगवति वसुन्धरे सुश्लाघ्यां दुहितरमवेक्षस्व जानकीम् ।

जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
यां देवयजने पुण्ये पुण्यशीलामजीजनः ॥ ५१ ॥

मातः कौसल्ये ! अशोकवने पूर्वं शुश (भ ?) स्वप्नकथनात्त्रिजटास्मरणमिति बोध्यम् । परि. परितश्चेत्यर्थः । 'हतको नीचः' इति जयः ॥ ते हि मन्ये इति ॥ ४८ ॥ पाप्मना दुरितेन ॥ ४८ ॥ विस्रम्भादुरसीति ॥ ४९ ॥ विस्रम्भः विश्वासः । प्रिया चासौ गृहिणी ताम् । आतङ्केन आयासेन । स्फुरितः चलितः, कठोरः पूर्णः गर्भः तेन गुर्वी अलघुम् । 'आयासभीत्योरातङ्कः' इति शाश्वतः । क्रव्याद्भ्यः राक्षसेभ्यः । आमिषे पलं इत्यर्थः ॥ ४९ ॥ रोदितीत्यादिकमश्लीलं नाटकाप्रयोज्यमपि 'सर्वं च भक्ष्यं कुलं' इत्यादिवदुपेक्षणीयम् । 'अब्रह्मण्यमवध्योक्तौ' इत्यमरः । लवणः राक्षसभेदः । मधुरायां नगर्यां निवासी तत्सम्बन्धी वा माधुरः ॥ जनकानां रघूणामिति ॥ ५१ ॥ जनकाः जनकवंश्या रघवः रघुवंश्या राजानः । गो-

---

१ 'जातनिद्राम्' न. २ 'लक्ष्मीम्' न. ३ 'शिरसि' न. ४ 'त्रातारम्' न.
५ एतन्नास्ति घ–घ–क–पुस्तकेषु. ६ 'ताम्' घ–घ.

मलाणं नमो अअलगुरुअणाणं । नमस्तपोधनेभ्यो नमो रघुकुलदेवताभ्यो नमो आर्यपुत्रचरणकमलेभ्यो नमः सकलगुरुजनेभ्यः ।

(इति निष्क्रान्ताः सर्वे ।)

इति महाकविश्रीभवभूतिविरचिते उत्तररामचरिते

चित्रदर्शनो नाम प्रथमोऽङ्कः ।

म्माजियाळाजिदौहित्रेण काशीमहादेवतनूजेन शाकम्भरीपरमहंसचिदम्बरब्रह्मानुजेन नवरसभुवातिशायिचतुरचतुरधिकषष्टिप्रबन्धिदशभाषाभव्यकाव्याष्टपदीपदपद्यवर्णविलसदन्यूनाक्षरमालिकार्थस्तवनकवनधौरन्धरीपारीणेन गीतगाथासहस्रचतुष्टयदिव्यदेवीताटङ्कलिपिकल्पकेन दुर्जनातिनिन्द्येन सज्जनाभिनन्द्येन सुन्दरीकमलाजानिना वश्यवचःसर्वज्ञसरस्वतीनामत्रयमण्डितेन रामनवमीनिशीथजागरण एवारब्धपरिपूरिते उत्तररामचरितसंजीवनाख्यटिप्पणे प्रथमोऽङ्कः समाप्तः ॥

॥ इति घनश्यामपण्डितविरचिते व्याख्याने प्रथमोऽङ्कस्सम्पूर्णः शुभमस्तु ॥

॥ द्वितीयोऽङ्कः ॥

नेपथ्ये । स्वागतं तपोधनायाः ।

(ततः प्रविशत्यध्वगवेषा तापसी ।)

तापसी—अये वनदेवतेयं फलकुसुमगर्भेण[1] पल्लवार्घ्येण दूरान्मामुपतिष्ठते ।

प्रविश्य । **वनदेवता**—(अर्घ्यं विकीर्य[2] ।)

यथेच्छं भोग्यं[3] वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं यदपि तपसो योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः ॥ १ ॥

तापसी—किमत्रोच्यते ।

प्रियप्राया वृत्तिर्विनयमधुरो[4] वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।

अथ द्वितीयोऽङ्कः ॥ अथ भूतं भवद्भविष्यदितिवृत्तकथोपक्षेपेण द्वितीयाङ्कार्थं क्रोडीकरिष्यन् कविः शुद्धविष्कम्भं प्रक्रममाणः, 'नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि च' इति लक्षणादुपयुक्तपात्रप्रयुक्तवेशं परम्परासम्बन्धेन सूचयति—**नेपथ्ये** इति ॥ **स्वागत**मिति—वासन्तीनाम्ना वनदेवतया कृतः प्रश्न इत्यूह्यम् । वासन्ती त्वमिति कविनाऽग्रे वक्ष्यते । **तपोधने**ति **तापसी**ति च एकमेव पात्रम् । 'तापसस्तु तपोधनः' इति विक्रमार्कः । **फलकुसुमानि गर्भे** मध्यभागे यस्य । सीताराम इतिवत् पल्लवयुक्तमर्घ्यं **पल्लवार्घ्यम्** तेनेत्यर्थः ॥ 'फलपल्लवपुष्पाढ्यं तापसेष्वर्घ्यमाहरेत्' इति स्मरणात् । 'त्रिष्वर्घ्यमर्घार्थे' इत्यमरः ॥ **यथेच्छाभोग्य**मिति ॥ १ ॥ यथेच्छं आसमन्ताद् भोक्तुं योग्यं **यथेच्छाभोग्यम्** । **वः** इति पूजायां बहुत्वम् । **सतां सद्भि**रिति—सत्यश्च सन्तश्च सन्तः तेषां सताम् । तैः सद्भिः साधुभिरित्यर्थः । प्रकृते सत्याः मम सत्या त्वया सङ्गः सहवास इत्यूह्यम् ॥ 'ज्ञातेर्थे स्यात्कथमपि' इति **नाममाला** । **न पराधीन**मिति स्वाधीनमित्यर्थः । अपिरेकोऽधिकः पक्षाधिक इति केचित् ॥ १ ॥ **अत्र** सत्सङ्गतौ । **प्रियप्राया वृत्ति**रिति ॥ २ ॥ **प्रियस्य** इष्टवस्तुनः **प्रायः** आधिक्यं यस्यां सा । 'प्रियमिष्टं' इति 'प्रायो भूम्नि' इति वै-

---

१ 'फलकुसुमपल्लवार्घ्येण माम्' व—घ—ङ. २ 'वितीर्य' इति न. ३ 'यथेच्छाभोग्यम्' न. ४ 'विनयमसृणः' व.

पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥
(उपविशतः ।)

वनदेवता—कां पुनरत्रभवतीमवगच्छामि ।

तापसी—आत्रेय्यस्मि ।

वनदेवता—आर्ये आत्रेयि कुतः पुनरिहागम्यते । किंप्रयोजनो वा द-ण्डकारण्यप्रवेशः[1] ।

आत्रेयी—अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां
वाल्मीकिपार्श्वादिह पर्यटामि ॥ ३ ॥

जयन्त्यमरौ । 'मर्यादाचरणे वृत्तिः' इति **नामनिधानम्** । **नियमः** व्रतम् । **प्रकृत्या** स्वभावेन । **अनवगीतः** अनिन्द्यः । **अविपर्यासितः** असंजात-विपर्ययः । **रसः** प्रीतिः अभिनिवेशो वा यस्मिन् । **अनुपधि** अकैतवम् । **विशेषेण शुद्धम्** । तदिदं **रहस्यम्** । 'विपर्यासो वैपरीत्ये' इति, 'प्रीताव-भिनिवेशे च रसः' इति, 'रहश्चोपांशु चालिङ्गे रहस्यं तद्भवे त्रिषु' इति च **केश-वमेदिन्यमराः** ॥ २ ॥ **आत्रेयी** अत्रेः शिष्या गोत्रोद्भवा वा । न नाम्नि विप्रतिपत्तिः । **पुनः** वाक्यालङ्कारे । किं प्रयोजनं यस्मिन् प्रवेशे सः **किंप्र-योजनः** ॥ **अस्मिन्नगस्त्य** इति ॥ ३ ॥ भूयांस उद्गीथेति सन्धिसङ्कटं क्वचिदार्षवदनुग्राह्यम् । अत एव 'आद्ये उभे इत्यपि' इत्यस्वव्याख्यात**भार-चम्पौ** । **उद्गीथो** नाम साम्नो द्वितीया भक्तिः । **तद्विद** इत्यर्थः । 'ओमि-त्येतदक्षरं उद्गीथमुपासीत' इति **छान्दोग्ये** । **अधिगन्तुं** प्राप्तुम् । **निग-मान्तः** वेदान्तः । **पर्यटामि** संचरामि ॥ **यदा** यस्मादिति च पाठः । **पु-राणं** पुरातनं च तद् ब्रह्मेति पुराणेषु यद्ब्रह्म वा तद्वादीति कश्चिदाह तन्न भवत्यगस्त्येऽनुग्राहके सति वाल्मीकिमधिकृत्य पुराणब्रह्मवादीति कथनस्यानौ-चित्यात् । तच्चानुग्राहकत्वं रामाय कृतधनुरर्पणप्रसादस्य 'ततो युद्धपरिश्रान्तं' इत्यादिनोपदिष्टवतो भगवतोऽगस्त्यस्याश्रमवर्णने हृदयवसतेरुपास्यपदाब्जस्य शिवस्य स्थानं विना विष्णोः स्थानं इति विष्ण्वादिस्थानानां व्यवस्थापितत्वेन रामायणे सुप्रसिद्धम् । प्रकृते कथाप्रपञ्चाय कविना वाल्मीकिप्रस्तावः कृत इति

---

१ 'प्रचारः' क–ख; '°रण्योपवनप्रचारः' न; 'किं प्रयोजनं वा दण्डका-रण्यप्रवेशस्य' घ.

वनदेवता—यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते तत्कोऽयमार्याया दीर्घप्रवासप्रयासः।

आत्रेयी—तत्र महानध्ययनप्रत्यूह इत्येष दीर्घप्रवासोऽङ्गीकृतः।

वनदेवता—कीदृशः।

आत्रेयी—तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम्। तत्खलु न केवलमृषीणामपि तु चराचराणां भूतानामान्तराणि तत्त्वान्युपस्नेहयति[1]।

वनदेवता—अपि तयोर्नामसंविज्ञानमस्ति।

आत्रेयी—तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः।

वनदेवता—कीदृशः प्रभावः।

आत्रेयी—तयोः किल सरहस्यानि जृम्भकास्त्राण्याजन्मसिद्धानीति।

वनदेवता—अहो नु भोश्चित्रमेतत्।

आत्रेयी—तौ च भगवता वाल्मीकिना धात्रीकर्मतः[2] परिगृह्य पोषितौ

बोध्यम्। **प्राचेतसं** वाल्मीकिम्। **उपासते** उपासनां कुर्वन्ति। **तदिति** ततस्तदा इति च पाठेऽपि तस्मादित्येवार्थः। यमेति ध्वनिः। **प्रत्यूहः** विघ्नः। **दीर्घप्रवास** इति ध्वनिः। **तत्रभगवतः** वाल्मीकेः। **देवताविशेषेण**। गङ्गयेत्यर्थः। इदं च तृतीयाङ्कविष्कम्भे स्पष्टीभविष्यति। 'प्रकारो लक्षणेऽपि च' इति **यादवः**। **स्तनयोः त्यागमात्रं** यस्मिन् **वयसि**। 'कार्त्स्न्ये मात्रेऽवधारणे' इत्यमरः। मात्रक इति स्वार्थे कः। अत एव 'उपवासादिपुण्यकः' इति **चतुर्वर्गः**। 'संमोक्षकैः' इति च **अमरसिंहेनोक्तम्**। **दारकौ** पुत्रौ। **उपनीतं** समीपे आनीतमिति यावत्। समीपे तत्रभवत इति पूर्वेणान्वयः। **अपि तु** किन्तु इत्यर्थः। **भूतानां** प्राणिनाम्। **आन्तराणि** वाह्येतराणि। **तत्त्वानि** करणानि अङ्गानि वा। तथा च अन्तःकरणानि अन्तरङ्गानि वेत्यर्थः॥ 'तत्त्वं तु करणाङ्गयोः' इति **संसारावर्तः**। स्नेहयुक्तानि करोति **स्नेहयति**। 'चित्ते संज्ञानं' इति **नामनिधानम्**। 'रहस्यं तु मन्त्रे च' इति **केदारः**। अति भृशम्। **चित्रं** आश्चर्यम्॥ 'अत्यतीवातीवतराम्' इति **त्रिरूपः**। हिशब्दो वाक्यालङ्कारे। **भो** इति स्वमनः प्रति संबोधनम्। 'संबोधने तु हे हं भोः' इति **रत्नमाला**।

---

१ 'केवलं तस्य अपि तु तिरश्चामप्यन्तःकरणानि तत्त्वानि' न. २ °'कर्मवस्तुतः' च; 'कर्म वस्ततः' घ-क.

रक्षितौ च। निर्वृत्तचौलकर्मणोश्च तयोस्त्रयीवर्जमितरास्तिस्रो विद्याः सावधानेन परिनिष्ठापिताः। समनन्तरं च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयीविद्यामध्यापितौ। न ह्येताभ्यामतिप्रदीप्तप्रज्ञामेधाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति। यतः।

> वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
> न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
> भवति च तयोर्भूयान्भेदः फलं प्रति तद्यथा
> प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः ॥ ४ ॥

वनदेवता—अयमसावध्ययनप्रत्यूहः।

आत्रेयी—अपरश्च।

वनदेवता—अथापरः कः।

आत्रेयी—अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुप्रपन्नः। तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श। आकस्मिकप्रत्यवभासां च देवीं वाचमव्यतिकीर्णामानुष्टुभेन छन्दसा परिणतामभ्युदैरयत्।

धात्रीकर्मतः उपमातृकृत्यादितो। अन्नपानादिभिः **पोषितौ** हिंस्रजन्तुभ्यो **रक्षिता**वित्यर्थः। त्रयी वेदत्रयी वर्ज्या यस्मिन् कर्मणि तत् **त्रयीवर्ज्यं** यथा तथा। **तिस्रो विद्याः** अक्षराभ्यासः, धुरलीविहारः, वाहनायुधशिक्षा चेति। **परिनिष्ठापिताः** परि परितः, निष्ठां विद्यानामन्तं प्रापिता इत्यर्थः। 'निष्ठा निष्पत्तिनाशान्ताः' इत्यमरः। **दीप्तता** प्रकाशः। योगः सुगतिः युक्तिर्वा ॥ **वितरति गुरु**रिति ॥ ४ ॥ **तयोः** प्राज्ञजडयोः। **फलं** सिद्धिम्। **प्रति** उद्दिश्य। तदेवोपपादयति—**तद्यथे**ति ॥ **शुचिः** निर्मलः। 'विम्बमाकृतौ' इति हैमः। **मणिः** दर्पणः। आदिशब्देन काष्ठादीनि गृह्यन्ते। अत्र तुहिशब्दौ पादपूरकौ। हि प्रसिद्धाविति केचित् ॥ ४ ॥ **तमसा** नदीविशेषः। तत्र तमसायाम्। तमसातीरे इति यावत्। गङ्गायां घोष इत्यादिवद्भ्रम्। युग्मेन द्वन्द्वेन चरतोः **युग्मचारिणोः**। अकस्मात् अवशात् भवः **आकस्मिकः**। **प्रत्यवभासः** स्फूर्तिः यस्याः ताम्। **अव्यतिकीर्णां** विशेषेणासंकीर्णाम्। सुविभक्तामित्यर्थः। शय्यासन्दर्भादिभिः असन्नामिति यावत्।

---

१ 'वृत्तचूडौ च त्रयी०' ब; 'वृत्तचौटकर्मणोश्च तयोस्त्रयी०' घ. २ 'परिपाठितौ' ब. ३ 'तदनन्तरं भगवतैकादशे' ग. ४ 'पुनर्' इति न–क. ५ 'बिम्बोद्ग्राहे' ब–घ. ६ 'मृदां चयः' क–ख–ब. ७ पतन्नास्ति न–पुस्तके; '°कीर्णवर्णाम्' क–घ.

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥ ५॥

वनदेवता—चित्रमाम्नायादन्यो नूतनश्छन्दसामवतारः।

आत्रेयी—तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपसङ्गम्य भगवान् भूतभावनः पद्मयोनिरवोचत्—'ऋषे प्रबुद्धोऽसि वागात्मनि ब्रह्मणि तद्ब्रूहि रामचरितम्। अव्याहतज्योतिरार्षं ते[२] प्रतिभाचक्षुः। आद्यः कविरसि' इत्युक्त्वा तत्रैवान्तर्हितः। अथ स भगवान्प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय।

अभ्युदैरयत् उदीरयामास॥ **मा निषाद प्रतिष्ठा**मिति॥ ५॥ **निषादः** व्याधः। **शाश्वतीः** ध्रुवाः। **समाः** संवत्सरान् वर्षशतमित्यर्थः। 'कालाध्वनोः' इति द्वितीया। **प्रतिष्ठां** स्थितिम्। **मा गमः** मा गच्छः॥ ननु 'न माङ्योगे' इति अडागमप्रतिषेधात् कथं अगमः इति चेन्न। 'मा देवि दैन्यमगमः शुभचिह्नमेतत्त्वां पुष्पकं वहति यत्' इति **दण्डिकाव्ये** प्रयोगदर्शनान्न दोषः॥ अथवा—अगम इत्यत्र अ इति च पदद्वयम्। तथा च मा निषाद भो व्याधेत्यर्थः। 'आहो भो हे किमप्यङ्गमुखाः सम्बोधनार्थकाः' इति **केदारः**। केचित्तु—मागमः नागम इत्यर्थः। 'न ना नो मेत्यभावे स्युः' इत्यगस्त्यः इत्याहुः। आर्षं तु नाक्षेपमर्हतीत्यन्ये पेठुः। जीवतामेव कवने दौष्पाण्डित्यं दुर्जना उरीकुर्वन्ति। अन्येषां तु पुष्पोत्पाटनमपि कर्तुं नालममीति साधवो निगदन्तीति दिक्॥ ५॥ **आम्नायात्** वेदात्। **तेन** प्रसिद्धेन। **समयेन** संविदा। छन्दोरूपया चिदेत्यर्थः। उपलक्षितम्। 'समयः कालसंविदोः' इति **रुद्रः**। **भगवन्तं** माहात्म्यशालिनं कीर्तिमन्तं वा, **भगवान्** षाड्गुण्यपरिपूर्णः। भूतान् चराचरान् भावयति जनयतीति वा, भूतानां भावना भक्तिः यस्मिन्निति वा **भूतभावनः**। 'भावस्सत्तात्मजन्तुषु' इति **हेमचन्द्रः**। 'भावना भक्तौ' इति **धरणिः**। यादृशी भावनेति वस्तुनिर्णयः। प्रकृष्टं बुद्धं बोधः यस्य। **वागात्मनि** शब्दरूपे **ब्रह्मणि** इत्यनेन परं ब्रह्माऽधिगमिष्यसीति भावः॥ 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति' इति स्मरणात्। **अव्याहतं** अप्रतिहतं **ज्योतिः** तेजःप्रसरः यस्य तत्। **प्रतिभैव चक्षुः**। 'प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः' इति प्राञ्चः। **आद्यः** अद्य भव इत्यर्थः। अद्यैव देव्या प्रसादपात्रीकृतत्वादिति भावः। आद्यः वरो वा। 'वराद्यतनयोराद्यः' 'प्रथमज्येष्ठयोर्गुरौ' इत्यगस्त्यः॥ प्रथम इति केचित्॥ तन्न॥ वाल्मीकेरद्यैव कवितायां प्रत्यक्षविरोधात्, इदं कविभ्य इति नान्दी-

---

१ 'आम्नायादन्यन्न' न. २ 'ते प्रातिभं चक्षुः' क-ध-द; 'ते चक्षुः प्रतिभातु' न.

वनदेवता—हन्त तर्हि मण्डितः[1] संसारः ।

आत्रेयी—तस्मादवोचं[2] तत्र हि महानध्ययनप्रत्यूह इति ।

वनदेवता—युज्यते ।

आत्रेयी—विश्रान्तास्मि भद्रे । संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि ।

वनदेवता—इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण ।

आत्रेयी—(सास्रम्) अप्येतत्तपोवनम् । अप्येषा पञ्चवटी । अपि सरिदियं गोदावरी । अप्ययं गिरिः प्रस्रवणः । अपि जनस्थानवनदेवता वासन्ती त्वम् ।

वनदेवता—तथैव[3] तत्सर्वम् ।

आत्रेयी—हा वत्से जानकि ।

> **स एष ते वल्लभशाखिवर्गः[4]**
> **प्रासङ्गिकीनां विषयः कथानाम् ।**
> **त्वां नामशेषामपि दृश्यमानः**
> **प्रत्यक्षदृष्टामिव[5] नः करोति ॥ ६ ॥**

पद्यस्य गणपत्यर्थताविच्छेदापत्तेश्च ॥ न च वाच्यं—'आदिकाव्यमिदं प्रोक्तं पुरा वाल्मीकिना कृतम् । वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥' इत्यादिवचनानां का गतिरिति, 'नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्' इति प्रश्नेनैव आद्यकवित्वोच्छेदात् तेषां वचनानामर्थवादपरत्वमनुसन्धेयम् । किञ्च वाल्मीकिवन्नारदस्याप्याद्यकवित्वं न संबोभवीति, 'श्रुणु वक्ष्याम्यहं बुद्ध्वा' इति तेनैव कथनात् । तस्माद् 'वाल्मीकिना कृतम्' इत्यादीनां 'अष्टादशपुराणानां कर्ता सत्यवतीसुतः' इत्यन्तानां वचनानां पूर्वपक्षतया दौर्बल्यात्, 'यस्य निश्वसितं वेदाः सेतिहासाः सहागमाः' इति सिद्धान्तवचनप्राबल्येन वाल्मीकिव्यासादयः सर्वेऽपि प्रवचनकर्तार इति महान्तो निगदन्ति । शिष्यडिम्भाः किञ्चिदपि न जानीमहे वयम् । विशेषज्ञा एवात्र प्रमाणम् । इति दिक् ॥ **तत्रैवेति**–यत्र प्रदेशे अवोचत् तत्रैवेत्यर्थः । **प्रथमं** आदौ । **तादृशं** अनिर्वाच्यम् । **विवर्तः** परिणामः । 'इतिहासः पुरावृत्तं' इत्यमरः । **अवोचं** अब्रवम् । अर्थादहमिति सिद्धम् । **भद्रे** इति संबोधनम् । 'अपि प्रश्ने च' इति **हलायुधः** । **तदिति**–त्वया यथा तर्कितं तदेतत्**सर्वं तथैवेति** यावत् । अथ किमिति बाढमिति च पाठौ ॥ **स एष ते** इति ॥ ६ ॥ **वल्लभाः** प्रियाश्च ते **शाखिनः** वृक्षाः । यद्यपि व्यस्तं

---

१ 'पण्डितः' ख–घ–न. २ 'तस्मादवोचं तदनुरोधान्नस्तत्र' घ. ३ 'अस्त्येतद् सर्वम्' क–ख–च. ४ 'बन्धुवर्गः' क–ख–च. ५ 'प्रत्यक्षदृश्याम्' क–ख–च.

वासन्ती—(सभयम् । स्वगतम्) कथं नामशेषामित्याह ।
(प्रकाशम् ।) आर्ये किमत्याहितं सीतादेव्याः ।

आत्रेयी—न केवलमत्याहितं सापवादमपि । (कर्णे ।) एवमेवम् ।

वासन्ती—अहह दारुणो दैवनिर्घातः । (इति मूर्च्छति ।)

आत्रेयी—भद्रे समाश्वसिहि समाश्वसिहि ।

वासन्ती—हा प्रियसखि हा महाभागे ईदृशस्ते निर्माणभागः । हा रामभद्र । अथवा अलं त्वया । आर्ये आत्रेयि अथ तस्मादरण्यात्परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः ।

आत्रेयी—नहि नहि ।

वासन्ती—हा कष्टम् । आर्यारुन्धतीवसिष्ठाधिष्ठितेषु रघुकुदम्बकेषु[1] जीवन्तीषु च प्रवृद्धासु राज्ञीषु कथमिदं जातम् ।

आत्रेयी—ऋष्यशृङ्गाश्रमे गुरुजनस्तदासीत् । संप्रति तु परिसमाप्तं तद्द्वादशवार्षिकं सत्रम् । ऋष्यशृङ्गेण च सम्पूज्य विसर्जिता गुरवः । ततो भगवत्यरुन्धती नाहं वधूविरहितामयोध्यां गमिष्यामीत्याह । तदेव रामभमातृभिरनुमोदितम् । तदनुरोधाद्भगवतो वसिष्ठस्य परिशुद्धा[2] वाचो वाल्मीकितपोवनं गत्वा तत्र वत्स्याम इति ।

विशेषणं चारु, तथापि सर्वे शैलाः इत्यादिवदिदं समाधेयम् ॥ स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः । प्रसङ्गभवः प्रासङ्गिकः । नाम्ना नाम्नि विशेषं (वा शेषाम् ?) **दृश्यमानः** । मयेति शेषः । **मे** मह्यम् । **त्वां प्रत्यक्षदृष्टामिव करोति** । मे इत्यत्र **न** इति पाठे अस्मभ्यमित्यर्थः । अत्र निर्वेदाद्बहुवचनत्वम् । अत एव । 'वयं तत्त्वान्वेषात्' इत्यस्मद्व्याख्यातशाकुन्तले । **वल्लभः** रामो वा । **ते वल्लभे**त्यत्र 'रतेर्गृहीतानुनयेन' इतिवदुपपत्तिः ॥ वनदेवतानामपरिज्ञानेन **वासन्तीति** व्यवहारः कृतः इति बोध्यम् ॥ ६ ॥ **अत्याहितं** महाभीतिः । **अपवादः** कौलीनम् । **एवमिवेति**—रामेण सीता परित्यक्तेत्यादिवृत्तमुक्तमिति बोध्यम् । **दैवमेव निर्घातः** वज्रनिर्घोषः । **भागः** अंशः । **अलमिति** कृतमित्यर्थः । कोपखेदाभ्यामलमित्युक्तमिति भावः । 'वृत्तं चरित्रे' इत्यमरः । **प्रवृत्तिः** वार्ता ध्वनिश्च । **आर्यौ** च तौ **अरुन्धतीवसिष्ठौ** ताभ्याम् । **कुलेष्विति** पूजायां बहुत्वम् । **गुरवः** वसिष्ठादयः । **अनुरोधः** अनुवर्तनम् । 'श्रद्धा त्वासक्तिः' इति **पदमाला** । ध्वनिश्च । कः आचारः आचरणं यस्य **किमाचारः** । **क्रतुराजः** यज्ञश्रेष्ठः । **प्रक्रान्तः** प्रारब्धः ।

---

१ 'रघुकुलकदम्बकेषु' ब. २ 'वसिष्ठस्यापि श्रद्धा' म.

वासन्ती—अथ स राजा किमाचारः सम्प्रति।

आत्रेयी—तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः।

वासन्ती—हा धिक् परिणीतमपि।

आत्रेयी—शान्तं पापम्। नहि नहि।

वासन्ती—का तर्हि यज्ञे सहधर्मचारिणी।

आत्रेयी—हिरण्मयी सीताप्रतिकृतिः।

वासन्ती—हन्त भोः।

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति॥ ७॥

आत्रेयी—विसृष्टश्च वामदेवाभिमन्त्रितो मेध्योऽश्वः। उपकल्पिताश्च तस्य यथाशास्त्रं रक्षितारः। तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुरवाप्त-दिव्यास्त्रसंप्रदायश्चतुरङ्गसाधनान्वितोऽनुप्रहितः।

वासन्ती—(सस्नेहकौतुकास्रम्।) कुमारलक्ष्मणस्यापि पुत्रः। हन्त मातर्जीवामि।

आत्रेयी—अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडम-ब्रह्मण्यमुद्घोषितम्। ततो न राजापचारमन्तरेण प्रजास्वकालमृत्युः सञ्चरती-त्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्—

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम्॥ ८॥

भो इति मनः प्रति संबोधनम्॥ **वज्रादपि कठोराणीति** ॥ ७॥ **लोको-त्तराणां** भुवनश्रेष्ठानाम्। 'सर्वं कृत्यं साधु सर्वोत्तराणाम्' इति **भारविः**। सीतापरित्यागेन रामचेतसः कठोरत्वं अपुनःपरिणयेन मृदुत्वं चेति भावः ॥७॥ **मेध्यः** पवित्रः। **प्रयुक्ताः** प्रयोजिताः। **शास्त्रं** श्रौतपद्धतिः। **अधिष्ठाता** प्रमुखः। **प्रहितः** प्रेषितः। **मातर्जीवामीति** द्राविडस्त्रीस्वभावोक्तिः। एवं वदता कविना निजं द्राविडत्वं प्रकटितमित्यूह्यम्। **उत्क्षिप्य** उद्धृत्य। उरस्ता-डेन सहितं **सोरस्ताडं** यथा तथा। 'तडस्ताडनम्' इति **द्विरूपः**। 'अब्र-ह्मण्यमवध्योक्तिः'। **आत्मनः** रामस्येत्यर्थः। (**वा**) **गुदेति** ध्वनिः। उद्भ-वदिति च पाठः॥ **शम्बूको नाम वृषल** इति॥ ८॥ **वृषलः** शूद्रः। **शीर्षच्छेद्यः** वध्यः। **एनं** शम्बूकम्। **द्विजं जीवय** इति कथनमहिम्ना शम्बूके

---

१ 'स रामभद्रः' न. २ 'शान्तम्' न; 'शान्तं शान्तं' घ-व. ३ 'दत्त°' इति न. ४ 'पुत्रमारोप्य' घ-व. ५ 'प्रजानाम्' न; 'प्रजायाम्' घ-व. ६ 'चरति' व-घ.

इत्युपश्रुत्यैवाकृष्टकृपाणपाणिः पुष्पकं विमानमारुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः सञ्चरितुमारब्धवान्[१]।

वासन्ती—शम्बूको नाम धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति। तदपि नाम रामभद्रः पुनरपीदं वनमलङ्कुर्यात्।

आत्रेयी—भद्रे आगम्यतेऽधुना।

वासन्ती—आर्ये आत्रेयि एवमस्तु। कठोरीभूतस्तु[२] दिवसः।

> कण्डूलद्विपगण्डपिण्डकषणाकम्पेन[३] सम्पातिभि-
> र्घर्मस्रंसितबन्धनैः स्वकुसुमैरर्चन्ति गोदावरीम्।
> छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
> कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ॥ ९ ॥

(इति परिक्रम्य निष्क्रान्ते।)

इति शुद्धविष्कम्भकः।

इते पुत्रजीवनेन द्विजोऽपि जीविष्यति। अन्यथा न जीविष्यतीति भावस्सूच्यते ॥८॥ **दिशः** इन्द्रादिदिशः। **विदिशः** अग्न्यादिदिशः। 'दिशोर्मध्ये विदिक् स्त्रियाम्' इत्यमरः। **शूद्रश्चासौ तापसश्च**। **तत्** तस्मात्। **अपि नाम** इति सम्भावनाप्रसिद्धौ। रमयतीति रामः। रम क्रीडायाम्। रामश्चासौ भद्रः मङ्गलकरः **रामभद्रः**। **वनमल**मिति ध्वनिः। गम्यत इत्यर्थे **आगम्यते** इति व्यवहारः सार्वलौकिकः। अनुभवसिद्धश्च। **कठोरः** दुस्सहः सूर्यकिरण इति यावत्। तदेवोपपादयति तथाहीति ॥ **कण्डूलद्विपगण्डेति** ॥ ९ ॥ **कण्डूलाः** कण्डूयुक्ताश्च ते **द्विपाः** गजाः। तेषां **गण्डाः** कपोलाः। त एव **पिण्डाः** गोलाः तेषां **कषणं** घर्षणम्। तस्माद्धेतोः। **आकम्पेन** समन्तात्कम्पनेन। **सम्पातिभिः** पतनवद्भिः। **घर्मेण** निदाघेन। **स्रंसितं** संजातस्रंसनं **वृन्तं** येषां तानि 'स्रंसस्तु गलनं च्युतिः' इति 'वृन्तं प्रसवबन्धनम्' इति च **हारावल्यमरौ**। **छायासु अवस्किरमाणाः** मेहन्तश्च ते **विष्किराः** पक्षिणः। **तैर्मुखेन** त्रोट्या। **व्याकृष्टाः** विशेषेण आकृष्टाः। **कीटानां त्वचः** चर्माणि येषु ते। अपस्किरेति पाठे भक्षणाय भुवि विदारयन्तश्च ते विष्किरा इति योज्यम्। विदारयन्तः 'विकरिते' इति **महाराष्ट्राः**। **कूले** तीरे। कुलाययुक्ता वृक्षाः। 'कुलायो नीडमस्त्रियाम्' इत्यमरः। गण्डपिण्डेति ध्वनिः। 'गलद्दानगण्डं' इति **भगवत्पादाः**। 'कूलनीत इव कुङ्कुमपिण्डः' इति **कुङ्कुमकविः**। गण्डमण्डलकपेति च पाठः। क्षणक्षणं इति द्विरूपः। छायेत्यत्र शाखेत्यपि च पाठः ॥ ९ ॥ शुद्धविष्कम्भ इति ॥ आत्रेयीवनदेवतयोरुदात्तपात्रत्वात्

---

१ 'सञ्चारं समारब्धवान्' न. २ 'कठोरश्च' न. ३ 'कषणोत्कम्पेन' क-घ-ञ.

(ततः प्रविशति पुष्पकस्थः सदयोत्खातखड्गो रामः ।)

रामः—हे[1] हस्त दक्षिण मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य गात्रमसि[2] निर्भर[3]गर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते ॥ १० ॥

(कथंचित्प्रहृत्य ।) कृतं रामसदृशं कर्म । अपि जीवेत्स ब्राह्मणपुत्रः ।

(प्रविश्य) **दिव्यपुरुषः**—जयतु जयतु देवः ।

दत्ताभये त्वयि यमादपि दण्डधारे
सञ्जीवितः शिशुरसौ मम चेयमृद्धिः ।
शम्बूक एष शिरसा चरणौ नतस्ते
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ ११ ॥

रामः—द्वयमपि प्रियं नः । तदनुभूयतामुग्रस्य तपसः परिपाकः[4] ।

यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च[5] सम्पदः ।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते शिवाः[6] ॥ १२ ॥

कविना प्राकृतभाषा परिहृतेति बोध्यम् ॥ **सदयं** यथा तथा **उत्खातः** कोशादाकृष्टः खड्गः येन ॥ **हे हस्त दक्षिणेति** ॥ १० ॥ **द्विजस्य शिशोः** ब्राह्मणपुत्रस्येति विवेकः । **जीवातवे** जीवनौषधाय ॥ ननु तपस्विनि कथं खड्गं विसृजामि इत्याशङ्क्याह-**रामस्येति** । **गात्रं** अङ्गम् । 'अङ्गं च गात्रम्' इति **त्रिकाण्डी** । **निर्भरं** भृशम् । **पटोरिति** रामस्य विशेषणम् ॥ १० ॥ **सदृशं** योग्यं निर्दयमिति यावत् ॥ **दत्ताभये त्वयीति** ॥ ११ ॥ **दण्डधारे** शिक्षके । 'दण्डधारो महीपतिः' इति **कामन्दकः** । **समृद्धिः** दिव्या संपदित्यर्थः । **एषः** अहमिति शेषः । 'मरणं निधनोऽस्त्रियाम्' इत्यमरः ॥ ११ ॥ **द्वयं** द्विजपुत्रजीवनं तव सङ्गतिश्चेत्यर्थः । **तत्** तस्मात् । **परिपाकः** फलमिति यावत् ॥ **यत्रानन्दाश्चेति** ॥ १२ ॥ **यत्र** येषु लोकेषु । अत्र दयया धातुभेदादानन्दमोदानामवान्तरभेद ऊह्यः । 'मनोज्ञापूतयोः पुण्यम्' इति **नामनिधानम्** । विराड्क्ष ... तत्संबन्धिनो **वैराजाः ते** प्रथमाबहुवचनम् । **तैजसाः** तेजोमयाः । **शिवाः** मङ्गलकराः । **ते** तुभ्यम् । **सन्त्विति** योज्यम् । पादपूरकाविति केचित् ॥ १२ ॥ **युष्मत्प्रसाद एव उपादानं**

---

१ 'रे' क-घ-व. २ 'बाहु' न. ३ 'दुर्वह' क-घ-व. ४ 'फलम्' क-घ-व. ५ 'पुण्याभिसम्भवाः' व-घ. ६ 'ध्रुवाः' घ-व.

शम्बूकः—युष्मत्प्रसादोपादान[1] एवैष महिमा । किमत्र तपसा । अथवा महदुपकृतं तपसा ।

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो
मामन्विष्यन्निह वृषलकं योजनानां शतानि ।
क्रान्त्वा प्राप्तः स इह तपसां संप्रसादोऽन्यथा चेत्
क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः ॥ १३ ॥

रामः—किं नाम दण्डकेयम् । (सर्वतोऽवलोक्य ।) हा कथम् ।

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः
स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम् ।
एते तीर्थाश्रमगिरिसरिद्गर्त[2]कान्तारमिश्राः
सन्दृश्यन्ते परिचितभुवो दण्डकारण्यभागाः ॥ १४ ॥

शम्बूकः—दण्डकैवैषा । अत्र किल पूर्वं निवसता देवेन

कारणं यस्य महिमासाधक इति भावः । अत्र वैराजनामलोकलाभे । **महदुपकृतं** महानुपकारः कृत इति यावत् ॥ **अन्वेष्टव्यो यदसीति** ॥ १३ ॥ **वृषलकं** अल्पशूद्रम् । **प्राप्तोऽसीति यत्** इह प्राप्तौ । **स** इति संप्रदाया-(संप्रसादा ?) नुगुण्येन पुल्लिङ्गतानिर्देशः । **अन्यथा चेत्** एवं न चेदित्यर्थः । **अयोध्याया** इति पञ्चमी । नित्यस्त्रीलिङ्गतया **दण्डकायां** इत्युक्तम् । अस्मिन्वने तथा च दण्डकावने इति फलितोऽर्थः । अत एव । 'तदुपमा कुसुमान्यखिलाः शराः' इति **श्रीहर्षः । पुनरुपगमः** पुनरागमनं त्वित्यर्थः। तस्मान्मम तप एव साधकतमं इति भावः । स इहेतिकथनविलम्बसङ्कटं कवेश्चातुर्यमिति संप्रदायज्ञाः ॥ १३ ॥ आश्चर्यादाह—**किन्नामेति** ॥ **स्निग्धश्यामा** इति । ॥ १४ ॥ **स्निग्धाः** मसृणाः । **अपरतः** अन्यतः । **आभोगेन** परिपूर्णतया । **रूक्षाः** क्षवो (?) दुष्प्रवेशा इति यावत् । **झाङ्कृतैः** शब्दानुकारैः । **मुखराः** शब्दायमानाः **ककुभः** दिशः येषां येषु वा । 'तीर्थमृषिजुष्टजले गुरौ' इत्यमरः । **गर्ताः** अवटाः । 'कान्तारं वर्त्म दुर्गमम्' इत्यमरः, तैः **सान्द्राः** निबिडाः । **परिचिताः** अनुभूताः **भुवः** स्थलानि येषाम्, 'भूः क्षितौ च स्थलेऽङ्गणे' इति **रभसः । भागाः** प्रदेशाः । कान्तारं अरण्यम् । इति केचित् । तन्न ॥ वर्ण्यमानस्य दण्डकारण्यस्य पन्धशैथिल्यापत्तेः ॥ १४ ॥

---

१ 'युष्मत्प्रसादादेव' न–क; 'युष्मत्पादप्रसादोपाय एष' व–च. २ 'गर्भ' घ–च.

चतुर्दश सहस्राणि चतुर्दश च राक्षसाः ।
त्रयश्च दूषणखरत्रिमूर्धानो रणे हताः ॥ १५ ॥

येन सिद्धक्षेत्रेऽस्मिञ्जनस्थाने मादृशामपि जानपदानामकुतोभयः सञ्चारो जातः ।

रामः—न केवलं दण्डका जनस्थानमपि ।

शम्बूकः—बाढम् । एतानि खलु सर्वभूतरोमहर्षणान्युन्मत्तचण्डश्वापदकुलसङ्कुलगिरिगह्वराणि जनस्थानपर्यन्तदीर्घारण्यानि दक्षिणां दिशमभिवर्तन्ते । तथाहि ।

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः ।
सीमानः प्रदरोदरेषु विरलस्वच्छाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥ १६ ॥

रामः—पश्यामि च जनस्थानं भूतपूर्वखरालयम् ।
प्रत्यक्षानिव वृत्तान्तान्पूर्वाननुभवामि च ॥ १७ ॥

चतुर्दश सहस्राणीति ॥ १५ ॥ **त्रिमूर्धान** इति–अत्र 'द्वित्रिभ्यां ष मूर्ध्नः' इति षप्रत्ययेन समासान्तविधेरनित्यत्वात् ॥ १५ ॥ **येन** राक्षसानां हननेनेत्यर्थः । **जानपदानां** देशवासिनाम् । न विद्यते कुतः कस्मादपि भयं यस्मिन् **अकुतोभय** । दण्डकेति भिन्नं पदम् । **बाढं** इत्यङ्गीकारे । **भूतानां** प्राणिनाम् **रोमहर्षणं** रोमाञ्चः येभ्यो येषु वा । 'रोमाञ्चो भयहर्षाद्यैः' इति **समयपद्धतिः** । 'चण्डस्त्वत्यन्तकोपनः' इत्यमरः । **अभिवर्तन्ते** आभिमुख्येन वर्तन्ते ॥ भङ्ग्यन्तरेणाह ॥ **निष्कूजस्तिमिता** इति ॥ १६ ॥ **निष्कूजाः** निर्गतकूजिताश्च ताः **स्तिमिताः** निश्चलाः । 'कूजितं कूजनं कूजः' इति **द्विरूपः** । **भोगाः** फणिकायाः **श्वासैः** श्वसितानिलैः । प्रकर्षेण **दीप्ताः अग्नयः** वनवह्नयः यासु । **सीमान** इति नान्तः शब्दः । 'सीमसीमे स्त्रियामुभे' इत्यमरः । अत्र बहवो भ्रमन्ति । **प्रदराः** अवटाः । **विरलानि** अनिबिडानि **स्वच्छाम्भांसि** यासु ताः । सीमासु **तृष्यद्भिः** तृषावद्भिः । **प्रतिसूर्यकैः** । 'सरटाविशेषे प्रतिसूर्यकः' **इत्यगस्त्यः** । अयमसौ 'तिलित्सः स्यादजगरः' इत्यमरः । गजावळा (?) महासर्पा अजगर इति **महाराष्ट्राः** ॥ १६ ॥ **पश्यामि च जनस्थानं** इति ॥ १७ ॥ पूर्वं भूतः **भूतपूर्वः** । भूतपूर्वखरालयमिति जनस्थानविशेषणम् । 'निलयालयाः' इत्यमरोक्त्या नित्यपुल्लिङ्गत्वेऽपि

---

१ 'रक्षसां भीमकर्मणाम्' क–ख–ग. २ 'सिद्धिक्षेत्रे' घ. ३ 'भीरुजनानाम्' ख–ग. ४ 'कुलाक्रान्तविकटगिरि०' ग. ५ 'घोर' क–ख; 'घोष' ग.

(सर्वतोऽवलोक्य) प्रियारामा हि सर्वथा वैदेह्यासीत् । एतानि तानि नाम कान्ताराणि । किमतः परं भयानकं[1] स्यात् । (सास्रम् ।)

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु ।
इतीहारमतैवासौ[2] स्नेहस्तस्याः स तादृशः ॥ १८ ॥
न[3] किंचिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥ १९ ॥

विशेषणविशेष्यभावे बाधकं नेति व्युत्पन्नविशेषज्ञाः । अत एव 'भटान्तहेतुर्वैरम्' इत्यसह्याख्यातभारतचम्पौ । रीतिरियं पूर्वं दण्डकायामित्यत्र दर्शितप्राया ॥ अथवा—खरस्यालयो यस्मिन्निति व्युत्पत्त्या नपुंसकमपि जनस्थानविशेषणमेतत् । 'तुहिचसहवै पादपूरणे' इत्यमरः ॥ केचित्तु—जनस्थानं खरालयं च पश्यामि, इत्याहुः । तन्न ॥ भूतपूर्वमिति, 'निवेशः शैलानां' इति च, कच्युक्तवक्ष्यमाणवाक्यविरोधात् । 'त्रिषु प्रत्यक्षं' इति, 'इवोपमायां चालीके' इत्यगस्त्यकेदारौ ॥ वृत्तान्तांस्तास्त तति (?) शास्त्रे सिद्धमपि सन्धिसङ्कटं कविजनासंमतमिति अलमतिविस्तरेण ॥ १७ ॥ आरामः उपवनम् । त्वया सह इति ॥ १८ ॥ इह कान्तारेषु ॥ यद्यपि अरमत सेति वक्तव्ये, अरमतासावित्युक्तम् भूतार्थत्वात् । तथापि सर्वदा हृदि स्थिततया असाविति पुरःस्थिततया तस्या इति च निर्देशः ॥ ननु द्रयमप्युच्यते, क एषन्य...(?) किमेषां राजाज्ञेति चेन्मैवम् । ततोऽप्यधिकैव कवीनां वाग्वैखरी । अत एव—'मानशुद्धतनृपाः कस्तैस्सह स्पर्धते' इति भर्तृहरिः ॥ 'यद्यद्यथा यथा ब्रूयुः कवयो रवयो नवाः । तत्तत्तथा तथावयमत एव निरङ्कुशाः ॥' इति मण्डनमिश्राश्च । तस्मान्मूकतैव शरणम् । तादृश इति षष्ठी, तादृक्छब्दः । अनिर्वाच्याया इत्यर्थः । सः प्रसिद्धः । स्नेहः तादृशः अनिर्वाच्य इत्यर्थः । अदन्तोऽयं शब्दः । 'इति सारमतैवेह' इति वा तृतीयः पादः पठनीय इति ॥ १८ ॥ न किञ्चिदपि कुर्वाण इति ॥ १९ ॥ तत्किञ्चित् न किञ्चिदिति च पाठः । अपोहति दूरीकरोतीति यावत् । सामान्यत उक्त्वा विशेषतश्चाह—तदिति । यः जनः यस्य प्रियः इष्टम् । तत् स जनः प्रतिकर्तेत्यर्थः । द्रव्यानुगुण्येन तदिति नपुंसकत्वनिर्देशः । भिन्नलिङ्गत्वेपि न दोष इति दण्डी व्याजहार । अत एव । 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इति भर्तृमीढः । तस्य प्रीतिपात्रभूतस्य । किमपि अनिर्वाच्यम् ।

---

१ 'भयानकस्य' ब–घ. २ 'इतीवारमते ह्यासौ' न; 'इति चारमतेवासौ' ब; 'इवीवारमतीवासौ' घ. ३ 'अकिञ्चित्' ब–घ.

शम्बूकः—चदलमेभिर्दुस्सहैः। अथैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्वतै[1]रविरलनिविष्टनीलबहल[2]च्छायतरुगतरुषण्डमण्डितान्यसंभ्रान्तविविधमृगयूथानि पश्यतु महाभागः प्रशान्तगम्भीराणि मध्यमारण्य[3]कानि ।

इह समदशकुन्ताक्रान्तवानीरवीरुत्[4]-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥ २० ॥

अपि च ।

दधति कुहरभाजामत्र मल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते सल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्द[5]गन्धः ॥ २१ ॥

उपकारादिभिः प्रत्युपकारादिर्लौकिकव्यवहारलक्षणपरिहीणं वा द्रव्यं वस्तु । 'द्रव्यं भव्ये गुणाश्रये' इत्यमरः । वनमिति वार्थः । हि प्रसिद्धौ । अक्रुते तस्येति स्थाने राम इति तद्रव्यमिति स्वरे भवेति भावो बोध्यः ॥ दुस्सहैः खेदैरिति शेषः । अथेत्यानन्तर्ये । प्रश्ने वा । 'कोमलं मृदुरम्ययोः' इति रुद्रः । अवकीर्णानि संवलितानि । सान्द्रं यथा तथा निविष्टाः निवेशं प्राप्ताः । भगानां समूहो भागम् । महत् भागं यस्य । 'भगः श्रीकाममाहात्म्यप्रभावोत्साहकीर्तिषु' इति संसारावर्तः । महान्तो भागाः प्रदेशाः यस्येति वा । प्रकर्षेण शान्ताः शान्तिनिष्ठाः तैः गम्भीराणि ॥ इह समदशकुन्तेति ॥ २० ॥ आक्रान्ताः आरूढाः । 'वानीरो देवपुन्नागः' इति धन्वन्तरिः । प्रसवाः पुष्पाणि । परिणामः पक्वता । जम्बूनिकुञ्जेषु जम्बूमयकुञ्जेषु । स्खलनेन प्रतिघातेन मुखराणि शब्दायमानानि । भूरीणि भूयांसि स्रोतांसि यासाम् 'स्रोतोऽम्बुसरणं स्वतः' इत्यमरः । 'पाझर' इति महाराष्ट्राः । निर्झरिण्यः नद्यः । वहन्ति प्रवहन्तीति यावत् । स्खलनेति ध्वनिः ॥ २० ॥ दधति कुहरभाजामिति ॥ २१ ॥ कुहरभाजां बिलसेविनाम् । भल्लूकेषु ऋक्षेषु । यूनां तरुणानाम् । अनुरसितैः प्रतिध्वनिभिः । गुरूणि पुष्टतराणि । अम्बूकृतानि ष्ठेम्मनि-

---

१ 'पर्वन्तैः' व–ब–क. २ 'बहुलच्छायातरु' न. ३ 'महारण्यानि' न.
४ 'गुल्म' ५ 'निस्यन्द' ब.

रामः—(सबाष्पस्तम्भम् ।) भद्र शिवास्ते पन्थानो देवयानाः । प्रलीयस्व पुण्येभ्यो लोकेभ्यः ।

शम्बूकः—यावत्पुराणब्रह्मवादिनमगस्त्यमृषिमभिवाद्य शाश्वतं पदमनुप्रविशामि । (इति निष्क्रान्तः ।)

रामः—एतत्पुनर्वनमहो कथमद्य दृष्टं
यस्मिन्नभूम चिरमेव पुरा वसन्तः ।
आरण्यकाश्च गृहिणश्च रताः स्वधर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ २२ ॥

एते त एव गिरयो विरुवन्मयूरा-
स्तान्येव मत्तहरिणानि वनस्थलानि ।
आमञ्जुवञ्जुललतानि च तान्यमूनि
नीरन्ध्रनीरनिचुलानि सरित्तटानि ॥ २३ ॥

गेलहितकरध्वनयः इत्यर्थः । 'अम्वूकृतं सनिष्ठीवम्' इत्यमरः । 'स्त्यानमभिवृद्धौ' इति रत्नकोशः । दधति बिभ्रति । शिशिरस्सन् कटुश्चासौ कषाय इति विवेकः । शिशिरः शीतलः । कटुः मरीच्यादिरसजातीयः । कषायः तुवरः । सल्लकीनां गजभक्ष्यवृक्षविशेषाणाम् । विकीर्णाः । पतिताः ये ग्रन्थयः पर्वाणि । 'काण्डी'इति महाराष्ट्राः । तेषां ग्रन्थीनां निष्यन्दस्य गन्धः 'समौ निर्यासौ' इति शब्दार्णवः । स्त्यायते अभिवर्धते, 'उपचीयत' इति माठरः । अत्र चतुर्थचरणे विशेषणविशेष्ययोरभिन्नपदत्वं मध्यमम् । 'व्यस्तं विशेषणं चारु' इति न्यायात् ॥ २१ ॥ वाक्स्तम्भेन खेदवशात् प्रतिवाक्याभावेन सहितं यथा तथा शम्बूकमाह—भद्रेति—ते तुभ्यम् । देवानां यानं संचारः येषु । 'तृप्ता यात पथिभिर्देवयानैः' इति श्रुतेः । यावदनुप्रविशामि प्रवेक्ष्यामीत्यर्थः ॥ एतत्पुनर्वनमिति ॥ २२ ॥ दृष्टं अस्माभिरिति शेषः । पुरा पूर्वम् । वयं वसन्तः निवसन्तः अभूम स्थिता इति यावत् स्वधर्मे रताः आरण्यकाः । सांसारिकेषु सुखेषु रसज्ञाः गृहिणश्चेति विशेषणे योज्ये । चद्वयं पादपूरणे ॥ २२ ॥ एते त एवेति ॥ ॥ २३ ॥ विरुवन्तः नदन्तः मयूरा येषु । आ समन्तात् । मन्द्राणि मञ्जुलानि रुतानि येषु । नीरन्ध्रनीराणि निबिडजलान्येव निचुलाः विधा-

---

१ 'देवयानं प्रतिपद्यस्व' क-घ-च. २ 'ब्रह्मर्षिमगस्त्यमभिवाद्य' ग. ३ 'तदेव हि पुनर्वनमद्य' क-घ-च. ४ 'वञ्जुलरुतानि' ग. ५ 'नील' क-ङ-च; 'नीप' ग.

मेघमालेव यश्चायमारादिव विभाव्यते ।
गिरिः प्रस्रवणः सोयं यत्र गोदावरी नदी ॥ २४ ॥
अस्यैवासीन्महति शिखरे गृध्रराजस्य वास-
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु ।
गोदावर्याः पयसि विततश्यामलानोकहश्री-
रन्तःकूजन्मुखरशकुनो यत्र रम्यो वनान्तः ॥ २५ ॥

तदत्रैव सा पञ्चवटी यत्र चिरनिवासेन विविधविस्रम्भातिप्रसङ्गसाक्षिणः प्रदेशाः प्रियायाः प्रियसखी च वासन्ती नाम वनदेवता । किमिदमापतितमद्य रामस्य । संप्रति हि :

चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः
कुतश्चित्संवेगात्प्रचल इव शल्यस्य शकलः ।

नसाधनानि येषाम् । 'मन्द्रस्तु गम्भीरे' इति, 'मञ्जु मञ्जुलं' इति, 'तिरश्चां वाशितं रुतं' इति, 'निचुलः प्रच्छदपटः' इति चामरः ॥ २३ ॥ **मेघमालेवेति** ॥ २४ ॥ 'माला स्यात्पङ्क्तिमाल्ययोः' इति, 'आराद्दूरसमीपयोः' इति **मेदिन्यमरौ** । **आरादिवेत्यत्र** इवशब्दो वाक्यालङ्कारे । इहेति च पाठः । अत्र गुणज्ञैरन्वये तुर्यः पादः प्रथमं योज्यः । तेन चकारस्य सार्थक्यम् । प्रथमपादे अयमिति शब्दो व्यर्थः ॥ न च वाच्यं योऽयं वायौ वाति सति इत्यादिन्यायशास्त्रवाक्यवदुपपत्तिरिति ॥ सत्यम्, तत्र सगुणत्वादित्येवोक्तः । प्रकृते यथाकथञ्चित् प्रथमतृतीयचरणान्तोक्तयोरयमितिशब्दयोरन्यतरोऽजागलस्तनायते इति दिक् ॥ २४ ॥ **अस्यैवासीन्महतीति** ॥२५॥ अस्य प्रस्रवणगिरेः । **तस्य** शिखरस्य । 'अधोऽधस्तादि'ति **द्विरूपः** । **वयमिति** सीतालक्ष्मणसमेता इति भावः । **रताः** स्थिताः इति यावत् । **तेषु** प्रसिद्धेषु लक्ष्मणवृद्धेषु वा । **यत्र** उटजेषु सत्स्विति शेषः । **वितता** विस्तृता **श्यामला** च **अनोकहश्रीः** वृक्षशोभा यस्मिन् । 'श्रीर्वेषरचना शोभा संपत्सरलशाखिषु । वाणीलक्ष्मीलवङ्गेषु विषविल्वे च' इति **विश्वः** । मधुरशकुन इति विश्वः । मधुरशकुन इति सुपाठः । मुखरेति कश्चित् । तन्न, पौनरुक्त्यापत्तेः । **वनान्तः** । वनस्यान्तः उद्देशः आसीदित्यनुषङ्गः । 'अन्तोप्रनिधनोद्देशावसानेषु' इति **पदार्थमाला** । श्रीरन्त इति ध्वनिः ॥ **वासन्तिकेति**–आत्रेय्या सह संवादं या कृतवती सैवेति बोध्यम् । **किमापतित**मिति । अत्र प्रियसखी वर्तते कुतो वर्तते कुतो वयं समागता इति, अस्यावर्तनेन संप्रत्यस्माकं किं फलमिति वा भावः । तदित्यत्र तावतेति च पाठः । मद्य रामस्येति ध्वनिः ॥ **चिराद्वेगा-**

---

१ 'आरादपि' क–घ–ब. २ 'प्रतिवसति' इत्यधिकं घ–ब–पुस्तकयोः, ३ 'चिरोद्वेगा०' च–घ.

व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुन-
र्घनीभूतः शोको विकलयति मां नूतन इव ॥ २६ ॥

तथापि तान्पूर्वसुहृदो भूमिभागान्पश्यामि । (निरूप्य ।) अहो अनव-स्थितो भूतसंनिवेशः । तथाहि ।

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ २७ ॥

हन्त परिहरन्तमपि मामितः पञ्चवटीस्नेहो बलादाकर्षतीव (सकरुणम्)

यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत ।
एकः संप्रति नाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा गच्छत्वसम्भाव्य वा ॥२८॥

दम्भीति ॥ २६ ॥ **चिरात्** बहुकालानन्तरम् । **वेगः** कौटिल्यम् । **प्रसृतः** व्याप्तः । **कुतश्चित्** कस्मादपि **संवेगात्** संभ्रमात् । अङ्गसन्धिबन्धचलनादिति यावत् । **प्रचलः** चञ्चलः । शल्यस्य बाणादिमुखवर्तिनः अयोग्य (ग्र?) स्येत्यर्थः । 'शल्यं शङ्कुः' इत्यमरः । **शकलः** खण्डः । 'अनुकणीति' (?) **महाराष्ट्राः** । **रूढः** आनुकूल्याय संजातः ग्रन्थिः यस्मिन् सः **व्रणः स्फुटितः** विदीर्णः । **हृन्मर्मणी**ति बाधातिशयद्योतनायोक्तम् । 'भूतः प्राप्ते च जाते च' इति **शब्दमाला** । विदलयति शकलयति विफलयतीति च चत्वारः पाठाः ॥ २६ ॥ **पूर्वसुहृद** इति भूमिभागानां विशेषणम् । इदं द्वितीयाबहुवचनम् । पुरातनमित्राणीत्यर्थः । **निरूप्य** विभाव्य । **भूतानां सन्निवेशः** अवस्थानम् । 'भूतं क्ष्मादौ' इत्यगस्त्यः । सरितां प्रदेश इति शेषः ॥ **पुरा यत्र स्रोत** इति ॥ २७ ॥ **विपर्यासं** वैपरीत्यम् । **घनविरलभावः** सान्द्रपेलवत्वम् । 'पेलवं विरलम्' इत्यमरः । **क्षितिरुहां** वृक्षाणाम् । **अपरं** इतरत् । ध्वनिश्च । **तदिदं** अवस्थानमिति शेषः । अर्थाच्छैलानामित्यनुषङ्गः । तथा च पुरा ये स्थिताः त एवैते शैलाः इति बुद्धिं **द्रढयति** दृढीकरोतीत्यर्थः ॥ २७ ॥ **सकरुणमि**ति 'करुणस्तु रसे वृक्षे कारुण्येऽपि च' इति **विश्वः** ॥ **यस्यां ते दिवसा** इति ॥ २८ ॥ **यस्या**मिति यच्छब्देन

---

१ 'पुराभूतः' न. २ 'मूर्छयति च' क–घ. ३ 'तथाविधानपि' न. ४ 'भूमि' क–घ–च. ५ 'पञ्चवटीस्नेहात्' न. ६ 'पुनः' च. ७ 'सम्बन्ध' न. ८ 'तामेव' न.

शम्बूकः—जयतु जयतु देवः । देव भगवानगस्त्यो मत्तः श्रुतभवत्संनिधानस्त्वामाह—'परिकल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा सर्वे च महर्षयः । तदेहि सम्भावयास्मान् । अथ प्रजविना पुष्पकेण स्वदेशमुपगम्याश्वमेधाय सज्जो भविष्यसि' इति ।

रामः—यथाज्ञापयति भगवान् ।

शम्बूकः—इतस्तर्हि देवः प्रवर्तयतु पुष्पकम् ।

रामः—(पुष्पकं प्रवर्तयन्) भगवति पञ्चवटि गुरुजनोपरोधात्क्षणं क्षम्यतामयमतिक्रमो रामस्य ।

शम्बूकः—देव पश्य पश्य ।

> **गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारवत्कीचक-**
> **स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः ।**
> **एतस्मिन्प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-**
> **रुद्वेल्लन्ति पुराणरोहिणतरुस्कन्धेषु कुम्भीनसाः ॥ २९ ॥**

अपि च ।

पञ्चवटी गृह्यते । ते सुखमया इति भावः । **नाशिता** त्यक्तेति यावत् । सांप्रतं उज्झितेति युक्तः पाठः । यस्यां ते इति ध्वनिः ॥ २८ ॥ **मत्तः** पञ्चमी, ध्वनिश्च । **लोपामुद्रा** अगस्त्यस्य पत्नी । **अथ** आनन्तर्ये । **प्रवर्तयन्** अभिमुखीकुर्वन् इति यावत् ॥ **गुञ्जत्कुञ्जकुटीरे**ति ॥ २९ ॥ **गुञ्जन्तः कुञ्जकुटीरे** ये **कौशिकाः** घूकाः तेषां **घटाः** समूहाः तेषां **घूत्कारः** घूत्करणम् । तद्वन्तः ये **कीचकाः** वंशाः । तेषां **स्तम्बाः** गुल्माः । तेषु **आडम्बराः** गर्वरहिताः । अत एव **मूकाश्च** ते **मौकिलाः** काकाः । तेषां **कुलं** सङ्घः यस्मिन् । कलापिनां मयूराणाम् । **कूजितैः** केकाभिः, **उद्वेल्लन्ति** कम्पन्ते । तेषां भुजङ्गभक्षकत्वादिति भावः । **पुराणाः** पुरातनाश्च ते **रोहिणतरवः** चन्दनवृक्षाः । **कुम्भीनसाः** सर्पा इत्यर्थः । कुञ्ज एव कुटीरं पर्णशाला । प्रकृते नीडमिति दयनीयोऽर्थः । 'करिणां घटना घटा' इत्यमरः । प्रकृते औपचारिकः प्रयोगः । फूत्कारः शब्दानुकारः । 'डम्बरो रुचिगर्वयोः' इति **कपिलः** । 'हैरम्बमम्बुरुहडम्बर' इति असख्याख्यातभोजचम्पौ ॥ आडम्बरेति कश्चित् । तन्न । मूकपदविरोधात् ॥ एतस्मिंश्चेति ॥ एतस्मिंश्चेति सन्धिसङ्कटं कवेरचातुर्यम् । प्रचलाकिनां इति पाठे न बाधकम् । 'प्रचलाकिकलापिनौ' इति त्रिकाण्ड-

---

१ 'परिकल्पितावरण' न. २ 'चागस्त्यायनाः' व–घ. ३ 'गुरुजनादेशोप°' न. ४ 'कूजत्' क. ५ 'क्रौञ्चाभिधोऽयं' न.

एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो
मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दक्षिणाः।
अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः ॥३०॥

(निष्क्रान्तौ ।)

पञ्चवटीप्रवेशो नाम द्वितीयोऽङ्कः ।

षडङ्गोषः । उद्वेजिताः उद्वेगं प्रापिताः इत्यर्थः ॥ २९ ॥ अपि चेति ॥ एते ते कुहरेष्विति ॥ ३० ॥ ते प्रसिद्धाः कुहरेषु गुहाविलेषु । गद्गदं यथा तथा नदन्ति गोदावरीवारीणि येषाम् । मेघैः आलम्बिताः मौलयः शिखराधोभागाः येषाम् अत एव ते च ते नीलशिखराः । 'दाक्षिणात्ये च दक्षिणः' इति शब्दकोशः । अन्योन्यं परस्परम् । प्रतिघातैः प्रहारैः । संकुलं संकीर्णं यथा तथा चलन्तः गच्छन्तश्च ते कल्लोलाः महातरङ्गाः तेषां कलकलैः । 'उत्तालमुखरौ समौ' इति वैजयन्ती । गभीराणि पयांसि येषु । 'पुण्य पूतमनोज्ञयोः' इति विक्रमार्कः । सरित्सङ्गमाः नदीसङ्गमाः। गद्गदमिति शब्दानुकारः । 'सकीर्णे सङ्कुले' इति, 'निम्न गभीरं गम्भीरम्' इति चामरः । अत्र पूर्वेनवर्णनादस्य वनस्य महारण्यत्वं सूचितम् ॥ 'सरितो यत्र शैलाश्च तन्महारण्यमुच्यते ।' इति लीलाशुकोक्तेरित्यलमतिविस्तरेण ॥३०॥ इति महाराजपद + उत्तररामचरितसञ्जीवनाख्यटिप्पणे द्वितीयोऽङ्कः समाप्तः ॥

॥ इति द्वितीयोऽङ्कः ॥

---

१ 'मेघालङ्कृत' व. २ 'दाक्षिणाः' क—न. + पञ्चमाङ्कटीकासमाप्तौ टीकाकारेण प्रमादादयं कथित तत्सदमयाप्यनुसन्धातव्यम्.

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशति नदीद्वयम् ।)

एका—सखि मुरले किमसि संभ्रान्तेव ।

मुरला—सखि तमसे प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम् । जानास्येव यथा वधूपरित्यागात्प्रभृति

अनिर्भिन्नो[1] गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥ १ ॥

तन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रकृष्टतां[2] गतेन दीर्घशोकसन्तानेन[3] संप्रत्यतितरां परिक्षीणो रामभद्रः । तमवलोक्य कम्पितमिव सबन्धनं[4] मे हृदयम् । अधुना च प्रतिनिवर्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः । तेषु च निसर्गधीरस्याप्येवंविधायामवस्थायामतिगम्भीराभोगशोकक्षोभसंवेगात्पदे पदे महान्ति[5] प्रमादस्थानानि शङ्कनीयानि रामभद्रस्य । तद्भगवति गोदावरि तत्र त्वया सावधानया भवितव्यम् ।

वीचीवातैः शीकरक्षोदशीतै-
राकर्षद्भिः पद्मकिञ्जल्कगन्धान् ।
मोहे मोहे रामभद्रस्य जीवं
स्वैरं स्वैरं प्रेरितैस्तर्पयेति[6] ॥ २ ॥

अथ तृतीयोऽङ्कः ॥ अथ वरप्रसादात्प्रत्यक्षसीताकरस्पर्शसुखं रामाय वर्णयिषिष्यन् नदीद्वयसंलापेन विष्कम्भकथामुट्टङ्कयति—तत इति ॥ **अनिर्भिन्नो गभीरत्वादिति** ॥ १ ॥ **अनिर्भिन्नः** अप्रकाशः । **गुरुः** गुर्वी । **पुटपाकस्य** प्रतीकाशः उपमा यस्य । **करुणः** खेदमय इत्यर्थः ॥ १ ॥ **इष्टजनः** सीता । 'विनिपातः विनियोगे च' इति **रत्नकोशः** । **प्रकृष्टतां** आधिक्यम् । **सन्तानेन** विस्तारेण । बन्धनेन सहितं **सबन्धनम्** । 'बन्धनं ग्रन्थौ' इति **संसारावर्तः** । 'उराचि गाठ' इति **महाराष्ट्राः** । **तेन** दर्शनेनेत्यर्थः । **आभोगः** परिपूर्णता । तत्रभवत्याः पूज्यायाः ॥ **वीचीवातैरिति** ॥ २ ॥

---

१ 'अनिर्भिन्नगभीरत्वात्' ख–छ. २ 'प्रकर्षगतेन' क–घ–च; 'प्रकर्षगद्गदेन' ग. ३ 'सन्तापेन' क–ख. ४ एतन्नास्ति क–ग–ङ–पुस्तकेषु; 'कुसुमसमबन्धन' ख. ५ 'महाप्रमादानि शोकस्थानानि' ग. ६ 'प्रेषितैः' क–छ–ढ.

तमसा—उचितमेव दाक्षिण्यं स्नेहस्य । सञ्जीवनोपायस्तु मौलिक[1] एव रामभद्रस्याद्य सन्निहितः ।

मुरला—कथमिव ।

तमसा—श्रूयताम् । पुरा[2] किल वाल्मीकितपोवनोपकण्ठात्परित्यज्य निवृत्ते लक्ष्मणे सीतादेवी प्राप्तप्रसववेदनमतिदुःखसंवेगादात्मानं गङ्गाप्रवाहे निक्षिप्तवती । तदैव तत्र दारकद्वयं प्रसूता । भगवतीभ्यां पृथ्वीभागीरथीभ्यामभ्युपपन्ना रसातलं च नीता । स्तन्यत्यागात्परेण च दारकद्वयं तस्याः[3] प्राचेतसस्य महर्षेर्गङ्गादेवी स्वयमर्पितवती[4] ।

मुरला—(सविस्मयम् ।)

> ईदृशानां विपाकोऽपि जायते परमाद्भुतः ।
> यन्नोपकरणीभावमायात्येवंविधो जनः ॥ ३ ॥

तमसा—इदानीं तु शम्बूकवृत्तान्तेनानेन[5] सम्भावितजनस्थानागमनं[6] रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं तदेवाशङ्क्य सीतासमेता केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता ।

मुरला—सुचिन्तितं भगवत्या भागीरथ्या । राजधानीस्थितस्यास्य खलु तैस्तैर्जगतामाभ्युदयिकैः कार्यैर्व्यापृतस्य रामभद्रस्य नियताश्चित्तविक्षेपाः । अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थ इति । तत्कथमिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात् ।

तमसा—उक्तमत्र भगवत्या भागीरथ्या 'वत्से देवयजनसम्भवे सीते अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशस्य[7] जन्मसंवत्सरस्य संख्यामङ्गलग्रन्थि-

---

गन्धान् परिमलान् । **प्रेरितैः** त...पवनैरित्यर्थः ॥ २ ॥ मूलसम्बन्धी **मौलिकः** । मूलं सीतेति यावत् । 'मूलं पत्नीनिदानयोः' इति हैमः । अस्तीति वाक्यखण्डः । **अभ्युपपन्ना** अनुगृहीता ॥ **ईदृशानां विपाक इति** ॥ ३ ॥ **ईदृशानां** सीताप्रमुखजनानाम् । **विपाकः** परिणामः 'जन्तुषु कर्मणां विपाकः' इति **हनुमन्नाटके** । **उपकरणीभावं** साधनत्वम् । **एवंविधः** ईदृशः । गङ्गापृथिवीप्रमुख इति यावत् ॥ ३ ॥ यत्तदोः प्रमादस्थानमर्थ इति बोध्यम् ॥ **अपदेशः** व्याजः । **आभ्युदयिकैः** अभ्युदयकारकैः । **सङ्ख्या-**

---

१ 'मूलत एव' न. २ 'अस्ति खलु' न. ३ 'तस्य' न. ४ 'गङ्गादेव्या समर्पितं स्वयम्' न. ५ 'शम्बूकवधवृत्तान्तेन' घ. ६ '°जनस्थानं' न; '°स्थानगमनं' घ. ७ 'द्वादशजन्मसंवत्सरस्य' घ; 'द्वादशसंवत्सरस्य' न.

रमभिवर्तते[1]। तदात्मनः पुराणश्वशुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितारमपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व। न च त्वामवनिपृष्ठचारिणीमस्मत्प्रभावाद्वनदेवता अपि द्रक्ष्यन्ति किं पुनर्मर्त्याः' इति। अहमप्याज्ञापिता 'तमसे त्वयि प्रकृष्टप्रेमैव वधूर्जानकी। अतस्त्वमेवास्याः प्रत्यनन्तरीभव[2]' इति। साहमधुना यथादिष्टमनुतिष्ठामि।

मुरला—अहमप्येतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽप्यागत एवेति तर्कयामि।

तमसा—तदियं गोदावरीहदान्निष्क्रम्य

परिपाण्डुदुर्बलकपोलसुन्दरं
दधती विलोलकबरीकमाननम्।
करुणस्य मूर्तिरथवा[3] शरीरिणी
विरहव्यथेव वनमेति जानकी॥ ४॥

मुरला—इयं हि सा

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम्॥ ५॥

(इति परिक्रम्य निष्क्रान्ते।)

शुद्धविष्कम्भकः।

(नेपथ्ये।) प्रमादः प्रमादः।

मङ्गलं द्वादशी अब्दपूर्तिः। 'ग्रन्थिरुत्सवपर्वणोः' इति **नानार्थमञ्जरी**। अत एव 'वयसा द्वादशाब्दकौ' इति सप्तमाङ्के गर्भनाटकसन्दर्शने रामं प्रति लक्ष्मणेन वक्ष्यते। **तत्** तस्मात्। **पुराणं** पुरातनश्चासौ...**मानव्यस्य** *मानवसमूहस्य। 'मानवानां तु मानव्यम्' इत्यमरः।* **प्रसवितारं** जनकम्। **उपतिष्ठस्व** सेवस्व। प्रष्ठेति ध्वनिः। **मर्त्याः** रामादय इति भावः। अत एवाग्रे–' तमसे ओसरह्म दाव' इति सभयं सीतया वक्ष्यते। **प्रत्यनन्तरीभव** सहाया भवेत्यर्थः॥ **परिपाण्डुदुर्बलेति** ॥ ४॥ **कबरी** केशपाशः॥ ४॥ **किसलयमिवेति** ॥ ५॥ **किसलयमिव** स्थितमिति शेषः। शरीरविशेषणमेतत्। **बन्धनात्** वृन्तात्। दीर्घशोकः अव्यस्तं पदं मध्यमम्।

---

१ 'अभिवध्यते' व. २ 'प्रत्यन्तरीभव' व. ३ 'मूर्तिरिव वा' व.

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता ।)

सीता—अम्महे जाणामि पिअसही मे वासन्दी वाहरदि । अहो जानामि प्रियसखी मे वासन्ती व्याहरति ।

(पुनर्नेपथ्ये ।) **सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै-**
रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत् ।

सीता—किं तस्स । किं तस्य ।

(पुनर्नेपथ्ये ।) **वध्वा सार्धं पयसि विहरन्सोऽयमन्येन दर्पा-**
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः ॥ ६ ॥

सीता—(ससंभ्रमम् । कतिचित्पदानि गत्वा ।) अज्जउत्त परित्ताहि परित्ताहि मह तं पुत्तअम् । (स्मृतिमभिनीय सवैक्लव्यम् ।) हद्धी हद्धी । ताइं ज्जेव्व चिरपरिचिदाइं अक्खराइं पञ्चवडीदंसणेण मं मन्दभाइणिं अणुबन्धन्ति । हा अज्जउत्त । (मूर्च्छति ।) आर्यपुत्र परित्रायस्व परित्रायस्व मम तं पुत्रकम् । हा धिक् हा धिक् । तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति । हा आर्यपुत्र ।

प्रविश्य **तमसा**—वत्से समाश्वसिहि । समाश्वसिहि ।

(नेपथ्ये) विमानराज अत्रैव स्थीयताम् ।

क्षामं कृशम् ॥ ५ ॥ इति **शुद्धविष्कम्भः** ॥ **औत्सुक्यं** उत्कण्ठा । अहो जानामि प्रियसखी वासन्ती व्याहरतीति । **व्याहरति** क्रन्दतीत्यर्थः ॥ **सीतादेव्याः स्वकरेति** ॥ ६ ॥ **कलितैः** दत्तैः । **सल्लकी** गजभक्ष्यतरुः । '**लोलः** साशः' इति **कपिलः** । तस्मात् किं **तस्य** । **वध्वा** निजकरिण्या । **सार्धं** सह । 'चण्ड उद्दाम उद्भटः' इति **शब्दार्णवः** । 'उद्दामस्य कलेः' इति **गोवर्धनः** । **अभियुक्तः** अभिगृहातः । 'अभियोगस्त्वभिग्रहः' इत्यमरः ॥ ॥ ६ ॥ आर्यपुत्र परित्रायस्व परित्रायस्व मम पुत्रकम् । हा धिक् हा धिक् तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति । हा आर्यपुत्र । 'पुत्रकः कृत्रिमे पुत्रे' इति **संसारावर्तः** । अक्खराइं इति कालिदासादिवत् कवेः प्रमादः । 'अक्ष्यादिषु छः' इति गणे पठितत्वात् । 'दीने च मन्दभागः' इति **त्रिकाण्डशेषः** । **तमसेति**—अत्र पात्रासूचनं कवेः प्रमाद इति केचित्, तद्भसापक्षन्यायानुकरणम् । 'उत्साहखेदतोपादौ पात्रासूचनं' इति **जयदेवोक्तेः** ॥ अम्महे जलभरभरितमेघमन्थरस्तनितगम्भीरमांसलः कुतो नु भारतीनिर्घोषः प्रविशन् कर्णविवरं मामपि मन्दभागिनीमु-

---

१ 'पोषितः' ख–घ. २ 'अणुरुन्धन्ति' (मनुरुन्धन्ति) घ.

सीता—(समाश्वस्य ससाध्वसोल्लासम् ।) अम्महे जलभरभरिदमेहमन्थर- त्थणिदगम्भीरमंसलो कुदो णु एसो भारदीणिग्घोसो भरन्तकण्णविवरं मं वि मन्दभाइणिं झत्ति उस्सुआवेदि अम्हहे जलभरभरितमेघमन्थरस्तनितग- म्भीरमांसलः कुतो न्वेष भारतीनिघोषो भ्रियमाणकर्णविवरां मामपि मन्दभा- गिनीं झटित्युत्सुकयति ।

तमसा—(सस्नेहास्रम्) अयि वत्से

अपरिस्फुटनिस्वाने कुतस्त्येऽपि त्वमीदृशी ।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं स्थिता ॥ ७ ॥

सीता—भअवदि किं भणसि अपरिप्फुडेत्ति । सरसंजोएण पच्चभिजा- णामि अज्जउत्तेण जेव्व एदं वाहरिदम् ' भगवति किं भणस्यपरिस्फुटेति । स्वरसंयोगेन प्रत्यभिजानामि आर्यपुत्रेणैव एतत् व्याहृतम् ।

तमसा—श्रूयते तपस्यतः किल शूद्रस्य दण्ड रणार्थमैक्ष्वाको राजा जनस्थानमागत इति ।

सीता—दिट्ठिआ अपरिहीणधम्मो क्खु सो राआ । दिष्ट्या अपरिहीन- धर्मः खलु स राजा ।

नेपथ्ये । यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम् ।

त्सुकयति । 'मन्थरस्तु मनोज्ञः' इत्यमरशेषः । भरन्तो इति देशीयः शब्दः । 'भरतो' इति महाराष्ट्राः । सस्मितास्रमिति–असंभावितसीतावचनश्रवणा- दिति भावः ॥ अपरिस्फुटनिस्वाने इति ॥ ७ ॥ निस्वाने ध्वनौ । 'कुतोभवकुतस्त्यौ' इति शाश्वतः । स्तनयित्नौ मेघे । चकिता च उत्कण्ठि- ता च यस्मिन् कर्मणीति क्रियाविशेषणस्य धर्मिपरत्वेऽपि न दोषः । अत एव 'आकुलमीक्षितं जनैः' इति माघः ॥ ७ ॥ भगवति किं भणसि अपरिस्फुटेति । स्वरसंयोगेन प्रत्यभिजानामि आर्यपुत्रेणैव एतद्व्याहृतम् । 'शिक्षणे दण्डधारणम्' इत्यमरमाला । दिष्ट्या अपरिहीनधर्मः खल्वेष राजा । यच्छब्दद्वयेन तदालि लक्ष्यन्ते ॥ यत्र द्रुमा अपीति ॥ ८ ॥ अधीति—अधिवासं अकार्षमि-

---

१ 'उस्सावेदि' (उच्छ्वासयति) व–घ; 'उसावेदि' क. २ 'किमव्यक्तेऽसि निनदे' व; 'किमव्यक्तेऽपि निनदे' घ; '°निकाणे' न–क. ३ 'मए उण सरसंजोएण पच्चभिआणिदं अज्जउत्तो जेव्व वाहरदि' (मया पुनः स्वरसंयोगेन प्रत्यभिज्ञातं आर्य- पुत्र एव व्याहरति) क–घ–व. ४ 'दण्डकारण्यम' न. ५ '°राअधम्मो' क–घ–व.

एतानि तानि बहुनिर्झरकन्दराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥ ८ ॥

सीता—(दृष्ट्वा) दिट्ठिआ कहं पहादचन्दमण्डलावण्डुरपरिक्खामदुव्वलेन आआरेण अअं णिअसोम्मगम्भीराणुभावमेत्तपच्चहिजाणिज्जो अज्जउत्तो जेव्व । भअवदि तमसे धारेहि मं । दिष्ट्या कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्वलेनाकारेणायं निजसौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञातव्य आर्यपुत्र एव । भगवति तमसे धारय माम् । (इति तमसामाश्लिष्य मूर्च्छति ।)

तमसा—वत्से समाश्वसिहि समाश्वसिहि ।

(नेपथ्ये ।)

अनेन पञ्चवटीदर्शनेन

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः ।
उत्पीड इव धूमस्य मोहः प्रागावृणोति माम् ॥ ९ ॥

हा प्रिये जानकि ।

तमसा—(स्वगतम् ।) इदं तदाशङ्कितं गुरुजनेन ।

सीता—(समाश्वस्य ।) हा कहं एदं । हा कथमेतत् ।

(पुनर्नेपथ्ये ।)

हा देवि दण्डकारण्यवासप्रियसखि विदेहराजपुत्रि ।

सीता—हद्धी हद्धी । मं मन्दभाइणिं वाहरिअ आमीलंतणेत्तणीलुप्पलो मुच्छिदो जेव्व । हा कहं धरणिवट्ठे णिरुद्धणिस्सासणीसहं विपल्हत्थो ।

त्यर्थः । तान्येतानीत्यन्वयः । गोदावरीं परितः सरति व्याप्नोति **गोदावरीपरिसरः** । **तटानी**ति प्रमादः 'तटो भृगुः' इत्यमरसिंहेनाभिधानात् । अत एव । 'तीरे तटोऽस्त्री पुंस्येव भृगौ' इति **शब्दमाला** । दिष्टया कथं प्रभातचन्द्रमण्डलपरिक्षामः धूसरेणाकारेणायं निजसौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञातव्यः आर्यपुत्र एव । भगवति तमसे धारय माम् ॥ **आकारेण** आकृत्या उपलक्षितः । 'स्वके नित्ये निजम्' इत्यमरः । **अनुभावः** प्रभावः ॥ **अन्तर्लीनस्य दुःखाग्नेरिति** ॥ ९ ॥ **उद्दामं** उद्भटं यथा तथा । **धूमस्योत्पीडः** । 'कलिकाङ्कुरयोः' इति **मकुटः** । 'अज्ञानभ्रममूर्छादौ मोहः' इति **कपिलः** । **प्राक्** आदौ ॥ ९ ॥ **गुरुजनेन** लोपामुद्रयेति पूर्वोक्तमूह्यम् । **विदेहेति** ध्वनिः । हा धिक् हा धिक् । मां मन्दभागिनीं व्याहृत्य मीलन्नेत्रनीलोत्पलो मूर्छित एव । हा कथं धरणीपृष्ठे निरुद्धनिस्सहनिश्वासः पतितः । ' समौ निस्सहदुस्सहौ' इति **त्रिकाण्डशेषः** । विप्रलब्ध इति पाठे वञ्चित

---

१ 'अधोदामं' घ. २ 'तावत्' न. ३ 'जनेनापि' व–घ.

भअवदि तमसे परित्ताएहि परित्ताएहि । जीवावेहि अज्जउत्तं । हा धिक् हा धिक् । मां मन्दभागिनीं व्याहृत्यामीलन्नेत्रनीलोत्पलो मूर्छित एव । हा कथं धरणिपृष्ठे निरुद्धनिःश्वासनिःसहं विपर्यस्तः । भगवति तमसे परित्रायस्व परित्रायस्व । जीवयार्यपुत्रम् । (इति पादयोः पतति ।)

तमसा—त्वमेव ननु कल्याणि सञ्जीवय जगत्पतिम् ।
प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः ॥ १० ॥

सीता—जं होदु तं होदु । जहा भअवदी आणवेदि । यद्भवतु तद्भवतु । *यथा भगवत्याज्ञापयति ।* (इति ससंभ्रमं निष्क्रान्ता ।)

(ततः प्रविशति भूम्यां निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामः ।)

सीता—(किंचित्सहर्षम् ।) जाणे उण पच्चाअदं विअ जीविअं तेल्लोअस्स । जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य ।

रामः—हन्त भोः किमेतत् ।

आश्च्योतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो नु सेकः ।
आतप्तजीवितपुनःपरितर्पणोऽयं
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः ॥ ११ ॥

इत्यर्थः । जीवितेनेति शेषः । भगवति तमसे परित्रायस्व जीवयार्यपुत्रम् ॥ **त्वमेव ननु कल्याणीति** ॥ १० ॥ जगत्पतिपदमहिम्ना त्वं लक्ष्मीरिति भावो व्यज्यते । तथा च रामायणे—'सीता लक्ष्मीर्भवान्विष्णुः' इति । **ते** वयं **यत्र** यस्यां त्वयीत्यर्थः । **एष जनः** रामः ॥ १० ॥ यद्भवति तद्भवतु । यथा भगवती आज्ञापयति । जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य । एतेन रामस्य त्रैलोक्यस्य च एकार्थवर्णनादद्वैतमेव प्रामाणिकमिति कविना सिद्धान्तमार्गो दर्शित इति बोध्यम् । अत एव 'हरिरेव जगज्जगदेव हरिः' इति, 'सर्वं विष्णुमयं जगत्' इति, 'भूतानि विष्णुर्भुवनानि विष्णुः' इति प्राञ्चः । **भो** इति मनः प्रति संबोधनम् ॥ अथ स्पर्शं द्वाभ्यां विशिनष्टि ॥ **आश्च्योतनं नु इति** ॥ ११ ॥ 'रसाविर्भूतये यत्स्यादङ्गुलीभिः प्रपीडनम् । तदाश्च्योतनमाश्चोतश्चोतनं' इति च **द्विरूपः । आ** समन्तात् **श्च्योतनं** गलनं वा । अत एव 'श्च्योतद्भिन्नाम्बुभिः' इति असत्क्ष्याख्यात**भारतत्वस्पौ । नु** किम् । 'पुंसि वा हरिचन्दनम्' इत्यमरः । **करकन्दलः** किरणसमष्टिः । 'कन्दे गोले समष्टौ

---

१ 'तत्रैव नियतो भवः' ब; 'तत्रैव नियतो भरः' घ. २ 'त्रैलोक्यनाथस्य' ब–घ. ३ 'प्रश्च्योतनं' घ–न्न. ४ 'जीविततरोः परि–' ब–घ.

अपि च ।

स्पर्शः पुरा परिचितो नियतं स एव
सञ्जीवनश्च मनसः परितोषणश्च[1] ।
सन्तापजां सपदि यः परिहृत्य मूर्च्छा-
मानन्दनेन जडतां पुनरातनोति ॥ १२ ॥

सीता—(ससाध्वसोत्कम्पमपसृत्य ।) एत्तिअ जेव्व दाणिं मे बहुदरं । एतावदेवेदानीं मे बहुतरम् ।

रामः—(उपविश्य ।) न खलु वत्सलया सीतादेव्याभ्युपपन्नोऽस्मि ।

सीता—हद्धी हद्धी । किं त्ति मं अज्जउत्तो मग्गिस्सदि । हा धिक् हा धिक् । किमिति मामार्यपुत्रो मार्गिष्यते ।

रामः—भवतु । पश्यामि ।

सीता—भअवदि तमसे ओसरह्म दाव । मं पेक्खिअ अणब्भणुण्णादेण संणिहाणेण राआ अहिअं कुप्पिस्सदि । भगवति तमसे अपसरावस्तावत् । मां प्रेक्ष्यानभ्यनुज्ञातेन सन्निधानेन राजाधिकं कोपिष्यति ।

तमसा—अयि वत्से भागीरथीप्रसादाद्वनदेवतानामप्यदृश्यासि संवृत्ता ।

सीता—हुम्, अत्थि एदं । हुम्, अस्त्येतत् ।

च कन्दलः' इति **संसारावर्तः** । **आ** समन्तात् **तप्तं** च तत् **जीवितं** । **पुनः परि** परितः तर्पयतीति **तर्पण** इत्यर्थः । 'तर्पणं प्रीणनावने' इत्यमरः । प्रकर्षेण सिक्तः प्रशब्दः पादपूरणे इति केचित् । 'स्वप्नो नु माया नु' इत्यसंख्याख्यात**शाकुन्तल**श्लोकानुकाराणामिव एतत्पद्यानुकारयोः पुनरुक्तिः क्षन्तव्या ॥ ॥ ११ ॥ **स्पर्शः पुरा परिचित** इति ॥ १२ ॥ **नियतं** नियमप्राप्तं यथा तथा । सम्यक् जीवयतीति **सञ्जीवनः** । सः स्पर्शः । **आनन्दनेन** आनन्दप्रापणेन सभाजनेन वा । जडतां शीतलतां स्तब्धतां वा ॥ १२ ॥ एतावदेवेदानीं मे बहुतरं **एताव**ज्जीवनमिति भावः । बहुतरं सुखमिति शेषः । 'वत्सलस्तु प्रसन्नः' इति **हारावली** । **अभ्युपपन्नः** अनुगृहीतः ॥ हा धिक् हा धिक् कथमार्यपुत्रो मां निर्दिशति । भगवति तमसे अपसरावस्तावत् । मां प्रेक्ष्य अनभ्यनुज्ञातसन्निधानां राजा कोपिष्यति । **वनदेवतानामपी**ति-किमुत अन्यजनानामिति भावः । हुं अस्त्येतत् । हुमित्याकर्णनाभिनयः । 'रामो नाम बभूव हुं' इति **लीलाशुकः** । **ससाध्वसगद्गद**मिति कथनं

---

१ '°मोहनश्च' इति क-ब; '°मोहणश्च' इति ब.

रामः—हा प्रिये जानकि ।

सीता—(ससाध्वसगद्गदम् ।) अज्जउत्त असरिसं क्खु एदं इमस्स वुत्तन्तस्स । (सास्रम् ।) अहवा किं त्ति वज्जमई जम्मन्तरेसु वि पुणो असंभाविददुल्लहदंसणस्स मं जेव्व मन्दभाइणिं उद्दिसिअ वच्छलस्स एव्वंवादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सं । अहं एदस्स हिअअं जाणामि ममावि एसो । आर्यपुत्र असदृशं खल्वेतदस्य वृत्तान्तस्य । अथवा किमिति वज्रमयी जन्मान्तरेष्वपि पुनरसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्य वत्सलस्यैवंवादिन आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि । अहमेतस्य हृदयं जानामि ममाप्येषः ।

रामः—(सर्वतोऽवलोक्य सनिर्वेदम् ।) हा न किंचिदत्र ।

सीता—भअवदि तमसे तहा णिक्कारणपरिच्चाइणो वि एदस्स एव्वंवि-

रामेणाहं दृष्टास्मीति भ्रान्त्येति बोध्यम् । 'गद्गदं स्खलिताक्षरम्' इति **अमरमाला** । आर्यपुत्र आर्यपुत्र असदृशं खल्वेतस्य वृत्तान्तस्य । 'वृत्तान्तस्तु प्रयोगे च व्यवहारे च' इति **पद्ममाला** । तथा **वृत्तान्तस्य** प्रिये जानकि प्रयोगस्य व्यवहारस्य वा । **एतत्** निरूपणं अभिनयं वेति शेषः । **असदृशं** अनुचितं खल्वित्यर्थः ॥ अथ स्वमानसं प्रत्याह—अहवेति । अथवा किमिति वज्रमयी जन्मान्तरेषु पुनरसंभाविततुलाग्रलब्धदर्शनस्य मां मन्दभागिनीमुद्दिश्यैवंवत्सलस्यैवंवादिन आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि । अहमेवैतस्य हृदयं जानामि । एतेषामपि मम । **वज्रमयी** अतिकठोरेति यावत् । **जन्मान्तरेषु** आगामिजन्मसु । पुनरसंभावितं तुलाग्रलब्धस्येव घटाशिखरशलाकाया इव । अवधानविशेषलभ्यं दर्शनं यस्य । 'तुला घटा' इति, 'शिखराचलयोरग्रं' इति, 'लब्धं प्राप्ते तुलान्तस्थशलाकायां च' इति **मेदिनीहैमकेदाराः** । मन्दं च तत् भागः श्रीसमूहः सोऽस्या अस्तीति **मन्दभागिनी** । तदिदं कोकप्रीत्यादि**मुरारि**प्रयोगवद्द्रष्टव्यनीयम् । एवमतिशयेन वत्सलस्य प्रसन्नस्य । एवं प्रिये जानकि इत्यादिप्रेमपुरस्सरमिति यावत् । **निरनुक्रोशा** निर्दया । ममेति हृदयं जानातीत्यर्थः । अत्र षष्ठ्यर्थे बहवः प्राञ्जतरस्त्रीग्रहर्तुकामसुधागर्वखर्वतृतीयवाच्यायन्ते इति दिक् ॥ भगवति तदा निष्कारणपरित्यागिनोऽपि नामैतस्य एवंविधेन दर्शनेन कीदृशी मे हृदयावस्था । **'नाम प्रसिद्धौ खेदादौ'** इति **जयः** । **एवंविधेन** निष्फलेनेत्यर्थः । अवस्थां

---

१ 'समन्यु–' क–घ–च. २ 'एतद्वचनम्' क–घ–च. ३ 'जन्मान्तरे संभावित°' च.

घेण दंसणेण केरिसी[1] मे हिअआवत्था । भगवति तमसे तथा निष्कारणपरि-त्यागिनोऽप्येतस्यैवंविधेन दर्शनेन कीदृशी मे हृदयावस्था ।

तमसा—जानामि वत्से जानामि ।

तटस्थं नैराश्यादपि च कलुषं विप्रियवशा-
द्वियोगे दीर्घेऽस्मिञ्झटिति घटनात्स्तम्भितमिव[2] ।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन्क्षण इव ॥ १३ ॥

रामः—देवि

प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः ।
अद्याप्यानन्दयति[3] मां त्वं पुनः क्वासि नन्दिनी[4] ॥ १४ ॥

सीता—एदे क्खु ते अगाधमाणसदंसिदसिणेहसंभारा[5] आणन्दणिस्स-न्दिणो सुहामआ अज्जउत्तस्स उल्लावा । जाणं पच्चएण णिक्कालणपरिच्चाअ-सल्लिदोवि वहुमदो मह जम्मलाहो । एते खलु तेऽगाधमानसदर्शितस्नेहस-म्भारा आनन्दनिष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः । येषां प्रत्ययेन निष्कारणपरित्यागशल्यितोऽपि वहुमतो मम जन्मलाभः ।

वर्णयति ॥ **तटस्थं नैराश्यादिति** ॥ १३ ॥ **नैराश्यात्** निराशत्वात् । **तटस्थं** उदासीनम् । **विप्रियं** परित्यागः । तद्वशात् । **कलुषं** आविलम् । **झटिति** सहसा । **घटनात्** निष्फलसंवन्धादपि । **स्तम्भितं** संजातस्त-म्भम् । 'स्तम्भो जडीभावे' इति नन्ददधि (? ।) तस्य रामस्य । करुण-रसैः । **गाढकरुणं** भृशदयम् । **क्षणे** कालविशेषे । द्रवीभूतमिव । हृदयं एकं सदपि परित्यागान्नानावस्थं वर्तत इति भावः ॥ १३ ॥ **प्रसाद इव मूर्त इति** ॥ १४ ॥ **मूर्तः** मूर्तिमान् । **स्नेहार्द्रे**त्यत्र सन्धिसङ्कटं घटनात् स्तम्भित इव क्षन्तव्यम् । **आनन्दयति** तोषयति । **नन्दिनी**ति कवेश्चा-तुर्यम् । तथापि नन्दयतीति धातुवलादवान्तरभेदः ऊह्यः । **नन्दिनी** प्रथ-मैकवचनम् । नन्दिनी त्वं पुनः क्वासि इत्यर्थः । पुनश्शब्दो वाक्यालङ्कारे । नन्दिनि इति सम्वोधनं इति केचित् । तन्न । देवीति सम्बोधनस्यैव प्राप-त्यात् ॥ १४ ॥ एते खलु ते अगाधमानसदर्शितस्नेहसम्भवा आनन्दनिष्य-न्दिनः सुधामया आर्यपुत्रस्यालापाः । येषां प्रत्ययेन निष्कारणपरित्यागश-

---

[1] 'कीदिसो विअ मे हिअआणुवन्धोत्ति ण आणामि' (कीदृश इव मे हृदयानु-वन्ध इति न जानामि) क–व–घ. [2] 'घटनोत्तम्भितमिव' व–घ. [3] 'अद्याप्ये-वार्द्रयति' व–घ. [4] 'नन्दिनि' क–ख–न–व. [5] 'अगाधदंसिद' क–घ–व.

रामः—अथवा कुतः प्रियतमा । नूनं सङ्कल्पाभ्यासपाटवोपादान एष रामभद्रस्य भ्रमः ।

(नेपथ्ये) अहो महान्प्रमादः प्रमादः । ('सीतादेव्याः स्वकरकलितैः' इत्यर्धं पठ्यते ।)

रामः—(सकरुणौत्सुक्यम् ।) किं तस्य ।

(पुनर्नेपथ्ये । 'वध्वा सार्धं' इत्युत्तरार्धं पठ्यते ।)

सीता—को दाणिं अहिउज्जिस्सदि । क इदानीमभियोक्ष्यते ।

रामः—क्वासौ क्वासौ दुरात्मा यः प्रियायाः पुत्रकं वधूद्वितीयमभिभवति । (इत्युत्तिष्ठति ।)

प्रविश्य संभ्रान्ता । वासन्ती—कथं देवो रघुनन्दनः ।

सीता—कहं पिअसही मे वासन्ती । कथं प्रियसखी मे वासन्ती ।

वासन्ती—जयतु जयतु देवः ।

रामः—(निरूप्य ।) कथं देव्याः प्रियसखी वासन्ती ।

वासन्ती—देव त्वर्यतां त्वर्यताम् । इतो जटायुशिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य सम्भावयतु देव्याः पुत्रकं देवः ।

सीता—हा ताद जडाओ सुण्णं तुए विणा इदं जणट्ठाणम् । हा तात जटायो शून्यं त्वया विनेदं जनस्थानम् ।

रामः—अहह हृदयमर्मच्छिदः खल्वमी कथोद्घाताः ।

वासन्ती—इत इतो देवः ।

त्यतोऽपि वहुमतो जन्मलाभः । सम्भवः उत्पत्तिः शल्यतः शल्यादपि । तथा च ईदृशशल्यनिवारणाय शरीरपातोऽस्तु, एतादृशप्रियंवदनाथोपभोगाय पुनर्जन्मलाभोऽस्त्विति सीताया भाव इति वोध्यम् ॥ सङ्कल्पस्यावभासे भासने यत् पाटवं सामर्थ्यं तदेव उपादानं साधकतमं यस्य, 'करणं साधकतमोपादाने' इति विक्रमार्कः । उपादानमिति ध्वनिः । विभ्रमः सीतासम्वन्धरूपो विलास इत्यर्थः ॥ 'प्रमादोऽनवधानता' इत्यमरः । क इदानीमभिभविष्यति । कथं प्रियसखी मे वासन्ती । जटायुरित्युदन्तोऽपि शब्दः 'जटायुस्तु जटायुवत्' इति लिङ्गनिर्णयः । हा तात जटायो शून्यं त्वया जनस्थानम् । मर्म विध्यन्ति मर्माविधः । 'उपोद्घात उदाहारः' इति,

---

१ 'पाटवोत्पादितः' घ; 'पाटवोत्पादः' व. २ 'अभिजुज्जइ' (अभियुज्यते) न. ३ 'देव त्वर्यतां त्वर्यताम्' इति न. ४ 'जटायुशिखरदक्षिणेन' न; 'जटायुगिरि°' घ.

सीता—भअवदि सच्चं जेव्व वणदेवदा वि मं न पेक्खन्दि । भगवति सत्यमेव वनदेवता अपि मां न प्रेक्षन्ते ।

तमसा—अयि वत्से सर्वदेवताभ्यः प्रकृष्टतममैश्वर्यं मन्दाकिनीदेव्यास्तत्किमित्याशङ्कसे ।

सीता—तदो अणुसरम्ह । ततोऽनुसरावः । (इति परिक्रामति ।)

रामः—भगवति गोदावरि नमस्ते ।

वासन्ती—(निरूप्य ।) देव मोदस्व विजयिना वधूद्वितीयेन देव्याः पुत्रकेण ।

रामः—विजयतामायुष्मान् ।

सीता—अम्महे ईदिसो मे पुत्तओ संवुत्तो । अहो ईदृशो मे पुत्रकः संवृत्तः ।

रामः—हा देवि दिष्ट्या वर्धसे ।

> येनोद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण
> व्याकृष्टस्ते सुतनु लवलीपल्लवः कर्णमूलात्[1] ।
> सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
> यत्कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥ १५ ॥

सीता—अविउत्तो दाणिं अअं दीहाऊ इमाए सोम्मदंसणाए होदु । अवियुक्त इदानीमयं दीर्घायुरनया सौम्यदर्शनया भवतु ।

रामः—सखि वासन्ति पश्य पश्य कान्तानुवृत्तिचातुर्यमपि शिक्षितं वत्सेन ।

उद्घात इति पाठे 'उद्घात आरम्भः' इति चामरः ॥ भगवति सर्वथा वनदेवता अपि मां न द्रक्ष्यन्ति । ऐश्वर्यं वनदेवतामाहात्म्यमिति यावत् । मन्दाकिन्याः भागीरथ्याः 'गङ्गा मन्दाकिनी भागीरथी च वियदापगा' इति रत्नमाला । ततोऽनुसरावः । अम्महे ईदृशो मे पुत्रकस्संवृत्तः ॥ येनोद्गच्छदिति ॥ १५ ॥ उद्गच्छत् उदयच्च तत् बिसं मृणालं तदेव किसलयम्, तद्वत् स्निग्धो मसृणः दन्ताङ्कुरः यस्य । किसलयमिति पदं बहिर्निःसृण्यमानसूक्ष्मम् । लवली 'राय आवळी' इति महाराष्ट्राः । कर्णमूलात् श्रवसोरादिभागात् । ध्वनिश्च । तस्य कल्याणस्य करिण्यनुवर्तनादिरूपस्य इत्यर्थः ॥ १५ ॥ अयि पुत्र इदानीं दीर्घायुरनया सौम्यदर्शनया करिण्या सह भवतु । अयीति वासन्तीं प्रति संबोधनम् । वत्सेन करि-

---

१ 'कर्णपूरात्' ब-घ.

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ १६ ॥

सीता—भअवदि तमसे अयं दाव ईरिसो जादो । दे उण ण आणामि कुसलवा एत्तिएण कालेण केरिसा संवुत्तेत्ति । भगवति तमसे अयं तावदीदृशो जातः । तौ पुनर्न जानामि कुशलवावेतावता कालेन कीदृशौ संवृत्ताविति ।

तमसा—यादृशोऽयं तादृशौ तावपि ।

सीता—ईरिसी अहं मन्दभाइणी जाए ण केवलं णिस्सहो अज्जउत्तविरहो पुत्तविरहो वि । ईदृश्यहं मन्दभागिनी यस्या न केवलं निःसह आर्यपुत्रविरहः पुत्रविरहोऽपि ।

तमसा—भवितव्यतेयमीदृशी ।

सीता—किंवा मए पसूदाए जेण तारिसंपि मह पुत्तआणं ईसिविरलकोमलधवलदसणुज्जलकवोलं अणुबद्धमुद्धकाअलीविहसिदं णिवद्धकाअसिहण्डअं अमलमुहपुण्डरीअजुअलं ण परिचुम्बिअं अज्जउत्तेण । किं वा मया प्रसूतया येन तादृशमपि मम पुत्रकयोरीषद्विरलकोमलधवलदशनोज्ज्वलकपोलमनुबद्धमुग्धकाकलीविहसितं निवद्धकाकशिखण्डकममलमुखपुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण ।

पुत्रकेण ॥ **लीलोत्खातमृणालेति** ॥ १६ ॥ **यत्** यस्मात्कारणात् । **छेदेषु** भङ्गेषु । कवलार्धस्थदानविभागेषु इति यावत् । 'छेदो विभजने भङ्गव्यययोः' इति **सकुटः** । पुष्यच्च तत् **पुष्करे** हस्ताग्रे **वासितं** संजातवासम् । **कामं** यथेप्सितम् । **विरामे** विश्रान्तिविषये 'विश्रान्तौ च विरामे' इति **नन्दी** । **अनरालं** अवक्रम् ॥ १६ ॥ भगवति तमसे अयं तावदीदृशो जातः । तौ पुनर्न जानामि एतावता कालेन कीदृशौ संवृत्ताविति । ईदृश्यस्मि मन्दाकिनि (मन्दभागिनी ?) यस्या न केवलं निस्सह आर्यपुत्रविरहः, पुत्रविरहश्च । किं वा मया प्रसूतया यस्या मम पुत्रयोस्तादृशमीषद्विरलकुड्मलितधवलदर्शनोज्ज्वलितलोचनमनुबद्धमुग्धकाकलीहसितनित्योज्ज्वलं मुखपुण्डरीकं न चुम्बितमार्यपुत्रेण । **विरलं** यथा तथा **कुड्मलिते** प्रसादसूचको धवलशब्दः । 'प्रसादे तु दृगच्छता' इति **समयपद्धतिः** । **काकलीयुक्तविहसितमिति** विवेकः । 'काकली तु कले सूक्ष्मे ध्वनौ' इत्यमरः । 'मुखस्य दर्पणाब्जेन्दुपु-

---

१ 'सम्पातिताः' घ. २ 'लीलातपत्रम्' व. ३ 'दसणकुम्हलुज्जलं' (दशनकुड्मलोज्ज्वलं) न.

तमसा—अस्तु देवताप्रसादात् ।

सीता—भअवदि तमसे एदिणा अवच्चसंसुमरणेण उस्सासिदपण्हुदत्थणी दाणिं वच्चाणं पिदुणो संणिहाणेण खणमेत्तं संसारिणीह्मि संवुत्ता । भगवति तमसे एतेनापत्यसंस्मरणेनोच्छ्वसितप्रस्नुतस्तनी इदानीं वत्सयोः पितुः संनिधानेन क्षणमात्रं संसारिण्यस्मि संवृत्ता ।

तमसा—किमत्रोच्यते । प्रसवः खलु प्रकर्षपर्यन्तः स्नेहस्य । परं चैतदन्योन्यसंश्लेषणं पित्रोः ।

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते ॥ १७ ॥

वासन्ती—इतोऽपि देवः पश्यतु ।

अनुदिवसमवर्धयत् प्रिया ते
यमचिरनिर्गतमुग्धलोलबर्हम् ।
मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी ॥ १८ ॥

सीता—(सकौतुकस्नेहास्रम्) एसो सो एसो सो । एष स एष सः ।

ण्डरीकादयः' इति **शृङ्गारमञ्जरी** । **अस्तु** इति चुम्बितमित्यनेनानुषङ्गः । भगवति तमसे एतेनापत्यसंस्मरणेन उच्छ्वासितप्रस्नुतस्तनी इदानीं वत्सपितुस्सन्निधानेन क्षणमात्रं संसारिण्यस्मि संवृत्ता । **उच्छ्वसितं** उद्धृतं **प्रस्नुतं** स्रवः ययोस्तादृशौ **स्तनौ** यस्याः । **वत्सयोः** कुशलवयोः । **पितुः** निजभर्तुः रामस्येत्यर्थः । एतेन कविना निजं द्राविडत्वमाविष्कृतमिति बोध्यम् । **खणे**ति कवेः प्रमादः । छणेति साधुः । क्षणस्य अक्ष्यादिगणे पठितत्वात् । **प्रसवः** सन्तानः । **स्नेहस्य** प्रेम्णः । **प्रकर्षः** उत्कर्षः । **पर्यन्तः** अवधिः यस्य । **एतदि**ति प्रसव इत्यभिधेयं अपत्यमित्यर्थः । **परं** उत्कृष्टं वक्तुमशक्यमिति भावः । **पित्रोः संश्लेषणं** सुरतात्मकं उपगूहनमिति यावत् ॥ तदेव विशिनष्टि— ॥ **अन्तःकरणतत्त्वस्ये**ति ॥ १७ ॥ **दम्पत्योः** तरुणस्त्रीपुरुषयोः । **अन्तःकरण**मिति **यत्तत्त्वं** इन्द्रियं तस्य **स्नेहेन** प्रेम्णा सह **संश्रयात्** संमेलनाद्धेतोः । **अयमनुभवसिद्धः** । **आनन्दस्य ग्रन्थिः** बीजं तस्य रेकः रेचनं तदेवापत्यमित्यर्थः । तथा च दम्पत्योरन्तःकरणप्रेमपूर्वसंभोगस्खलितः आनन्दरस एवापत्यमिति भावः । 'तत्त्वं तु ब्रह्मणि इन्द्रिये' इति, 'ग्रन्थिः पर्वणि बीजे च' इति, 'उत्सर्गो रेकरेचने' इति **हारावलीकपिलविक्रमार्काः** ॥ १७ ॥ **अनुदिवसमवर्धयदि**ति ॥ १८ ॥ यं शिखण्डिनम् ।

---

१ 'ताणं अ' क–ब; 'ताणं च' घ. २ 'प्रकृष्ट' न. ३ 'पठ्यते' न. ४ 'अतरुणमदताण्डवोत्सवान्तेष्वयमचिरोद्गतमुग्धलोलबर्हः' घ–ब.

रामः—मोदस्व वत्स मोदस्व ।

सीता—एव्वं होदु । एवं भवतु ।

रामः—भ्रमिषु कृतपुटान्तर्मण्डलावृ[1]त्तिचक्षुः-
प्रचलितचटुलभ्रूताण्डवैर्मण्डयन्त्या ।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥ १९ ॥

हन्त तिर्यञ्चोऽपि परिचयमनुरुध्यन्ते ।

कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्धितोऽयमा[2]सीत् ।

सीता—(निरूप्य सास्रम् ।) सुट्ठु पच्चहिआणिदं अज्जउत्तेण । सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण ।

रामः—स्मरति गिरिमयूर एष देव्याः
स्वजन इवात्र यतः प्रमोदमेति ॥ २० ॥

वासन्ती—अत्र तावदासनपरिग्रहं करोतु देवः ।

(राम उपविशति ।)

वासन्ती—
नीर[3]न्ध्रबालकदलीवनमध्यवर्ति
कान्तासखस्य शयनीयशिलातलं ते ।
अत्र स्थिता तृणमदाद्बहुशो यदे[4]भ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म ॥ २१ ॥

यमेति ध्वनिः । मकुटेति भ्रान्तः पाठः । 'अमकुटादिषु' इति प्राकृतव्याकरणे वररुचिशासनात् मुकुटेति साधुः । शिखावला **कदम्बे** नीपवृक्षे ॥ **एष स** वत्सेति मयूरं प्रति संबोधनम् ॥ **भ्रमिषु कृतपुटेति** ॥ १९ ॥ **भ्रमिषु** भ्रमणेषु । **कृतपुटान्तः** नेत्रकोशान्तरे यासां **मण्डलानां** मण्डलाकारेङ्गितानाम् । **आवृत्तिः** पौनःपुन्यं तादृशं य**च्चक्षुः** नेत्रं तेन सह **प्रचलिता** कम्पिता या **चटुला** चतुरा **भ्रूः** तस्याः **ताण्डवैः** इङ्गितरूपैः नर्तनैः करणेन । एकपदमेतत् । **त्वां मण्डयन्त्या** भूषयन्त्या । आवृत्तीति चक्षुरिति च पदद्वयं विशेषणविशेष्यरूपं कर्म । ताण्डवैर्मण्डयन्त्येति वार्थः ॥ **अनुरुध्यन्ते** अनुवर्तन्ते । यमेतिध्वनिः । सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण । **देव्याः** इतीदं मातुः स्मरतीतिवदुपपन्नम् ॥ **कतिपयकुसुमेति** ॥ २० ॥ **यतः** यस्मात् ॥ २० ॥ **नीरन्ध्रबालेति** ॥ २१ ॥ प्रथमचरणमेकपदम् । 'मृगादा

---

१ 'वृत्तचक्षुः' घ; 'मण्डलावृत्ति चक्षुः' ब. २ 'य आसीत्' ब-च. ३ 'पत्र-चदेव कदली०' क-घ-च. ४ 'वनगोचरेभ्यः' न-ढ़ी

रामः—इदं तावदशक्यमेव द्रष्टुम्। (इत्यन्यतो रुदन्नुपविशति।)

सीता—सहि वासन्दि किं तुए किदं अज्जउत्तस्स मह अ एदं दंसअन्तीए। हद्धी हद्धी। सो जेव्व अज्जउत्तो तं जेव्व पञ्चवडीवणं सा जेव्व पिअसही वासन्दी दे जेव्व विविहविस्सम्भसक्खिणो गोदावरीकाणणुद्देसा दे जेव्व जादणिव्विसेसा मिअपक्खिपादवा सा जेव्व चाहम्। मह उण मन्दभाइणीए दीसन्तं वि सव्वं जेव्व एदं णत्थि त्ति सा ईरिसो जीवलोअस्स परिणामो संवुत्तो। सखि वासन्ति किं त्वया कृतमार्यपुत्रस्य मम चैतद्दर्शयन्त्या। हा धिक् हा धिक्। स एवार्यपुत्रस्तदेव पञ्चवटीवनं सैव प्रियसखी वासन्ती त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशास्त एव जातनिर्विशेषा मृगपक्षिपादपाः सैव चाहम्। मम पुनर्मन्दभाग्याया दृश्यमानमपि सर्वमेवैतन्नास्तीति तदीदृशो जीवलोकस्य परिणामः संवृत्तः।

वासन्ती—सखि सीते कथं न पश्यसि रामभद्रस्यावस्थाम्।

> **नवकुवलयस्निग्धैरङ्गैर्ददन्नयनोत्सवं**
> **सततमपि नः स्वेच्छादृश्यो नवो नव एव यः।**
> **विकलकरणः पाण्डुच्छायः शुचा परिदुर्बलः**
> **कथमपि स इत्युन्नेतव्यस्तथापि दृशोः प्रियः॥ २२॥**

सीता—पेक्खामि सहि पेक्खामि। प्रेक्षे सखि प्रेक्षे।

तमसा—पश्यन्ती प्रियं भूयाः।

सीता—हा देव्व एसो मए विणा अहं वि एदेण विणेत्ति सिविणेपि

वनगोचराः' इति कपिलः। **ततः** अनन्तरम्। **हरिणकैः** बालहरिणैः। **न विमुच्यते स्म** न विमुक्ता॥ २१॥ वासन्ति किं त्वया कृतं आर्यपुत्राय ममैतद्दर्शयन्त्या। हा धिक् हा धिक्, स एवार्यपुत्रः, तदेव पञ्चवटीवनम्, सैव प्रियसखी वासन्ती, त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशाः, त एव जातनिर्विशेषा मृगपक्षिणः। मम पुनर्मन्दभागिन्याः दृश्यमानमपि सर्वमेवैतन्नास्ति। ईदृशो जीवलोकस्य परिणामस्संवृत्तः। **एतत्** शिलातलमित्यर्थः। **जातः निर्विशेषः** असत्साधारण्यं येषु। निर्भया इति भावः॥ **नवकुवलय** इति॥ २२॥ **ददत्** वितरन्। ददन् इति कोऽपि भ्रमः। **विकलानि** अयथाभूतानि **करणानि** इन्द्रियाणि यस्य। **परि** अन्तर्बहिश्च। **तथापि** स्वभावादिति शेषः॥ २२॥ पश्यामि सखि पश्यामि। प्रियं पश्यन्ती भूयाः इत्यन्वयः। हा दैव एष मया विना अहमपि एतेन विनेति

---

१ 'परिवत्तो' (परिवर्तः) क–घ–च. २ 'कुवलयदल' क–घ–च. ३ 'ददौ' च–घ. ४ 'दे' च–घ. ५ 'नवं नवगेव यः' घ–घ. ६ 'पाण्डुः सोयं' ज–च. ७ 'पश्य प्रियं भूयः' न.

केण संभाविदं आसि । ता मुहुत्तमेत्तं जम्मन्तरादो विअ लद्धदंसणं बाहसलिलन्तरेसु पेक्खामि दाव वच्छलं अज्जउत्तम् । (इति पश्यन्ती स्थिता ।)
हा दैव एष मया विना अहमप्येतेन विनेति स्वप्नेपि केन सम्भावितमासीत् । तन्मुहूर्तमात्रं जन्मान्तरादिव लब्धदर्शनं बाष्पसलिलान्तरेषु प्रेक्षे तावद्वत्सलमार्यपुत्रम् ।

तमसा—(परिष्वज्य सास्रम् ।)

> विलुलितमतिपूरैर्बाष्पमानन्दशोक-
> प्रभवमवसृजन्ती पक्ष्मलोत्तानदीर्घा ।
> स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
> धवलमधुरमुग्धा दुग्धकुल्येव दृष्टिः ॥ २३ ॥

वासन्ती—ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
> स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः ।
> कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः
> पुनरिदमयं देवो रामः स्वयं वनमागतः ॥ २४ ॥

रामः—एहि सखि वासन्ति नन्वितः स्थीयताम् ।

वासन्ती—(उपविश्य सास्रम् ।) महाराज अपि कुशलं कुमारलक्ष्मणस्य ।

स्वप्नेऽपि केन संभावितमासीत् । तस्मान्मुहूर्तमपि जन्मान्तरतोऽपि अविस्मरणीयदर्शनं बाष्पसलिलान्तरेषु पश्यामि तावद्वत्सलमार्यपुत्रम् । **केन संभावितं** न केनापीत्येकोऽर्थः । **केन** ब्रह्मणा **संभावित**मित्यन्योऽर्थः । 'को ब्रह्मा' इत्येकाक्षरः । **सलिलानामन्तरेषु** अनुत्पत्तिदशासु । 'अन्तरं प्रागभावादौ' इति संसारावर्तः ॥ **विलुलितमतिपूरै**रिति ॥ २३ ॥ **विलुलितं** विशेषेण तरलितम् । **आनन्दशोकाभ्यां** दर्शनपरित्यागजन्मभ्यामित्यर्थः । **पक्ष्मला** पक्ष्मनिबिडा **उत्ताना** चासौ **दीर्घा** । 'निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये' इत्यमरः । **हृदयेशं** रामम् । '**मधुर**श्चटुलः' इति रत्नमाला । 'कुल्याल्पा कृत्रिमा सरित्' इत्यमरः ॥ २३ ॥ **ददतु तरवः पुष्पै**रिति ॥ २४ ॥ **मधूनि च्युतानि** एभ्यस्तैः **फलैः** । 'अर्घ्यंपुष्पफलादिभिः' इति स्मृतेः । **आमोदानां** परिमलानां **प्रायो** भूमा येषु । **अविरलं** सान्द्रम् ।

---

१ 'अणुलद्धदंसणा' घ; 'दुल्लहलद्ध०' न. २ 'तृष्णयोत्तान' व–घ. ३ 'बहल' व–द. ४ 'रत्युत्कण्ठाः' व–घ.

रामः—(अश्रुतिमंभिनीय ।)

करकमलवितीर्णैरम्बुनीवारशष्पै-
स्तरुशकुनिकुरङ्गान्मैथिली यानपुष्यत् ।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः ॥ २५ ॥

वासन्ती—महाराज ननु पृच्छामि अपि कुशलं कुमारलक्ष्मणस्येति ।

रामः—(आत्मगतम् ।) अये महाराजेति निष्प्रणयमामन्त्रणपदं सौमित्रिमात्रे च बाष्पस्खलिताक्षरः कुशलप्रश्नः । तथा मन्ये विदित-सीतावृत्तान्तेयमिति । (प्रकाशम् ।) आं कुशलं कुमारस्य ।

वासन्ती—(रुदती ।) अयि देव [३]किं परं दारुणः खल्वसि ।

सीता—सहि वासन्दि किं तुमं एव्वंवादिणी होसि । पिआरुहो[४] क्खु सव्वस्स अज्जउत्तो विसेसदो मह पिअसहीए । सखि वासन्ति किं त्वमेवंवा-दिनी भवसि । प्रियार्हः खलु सर्वस्यार्यपुत्रो विशेषतो मम प्रियसख्याः ।

वासन्ती—त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमिहोत्तरेण ॥ २६ ॥

(इति मुह्यति ।)

तमसा—[६]स्थाने वाक्यनिवृत्तिर्मोहश्च ।

रज्यत्कण्ठाः । कलं मधुरास्फुटं यथा तथा क्वणन्तु ॥ २४ ॥ करक-मलवितीर्णैरिति ॥ २५ ॥ अम्बुभिः तरुशकुनीन् वृक्षविहङ्गान् । नी-वाराः तृणधान्यानि । तेषां शष्पैः बालतृणैः कुरङ्गान् इति क्रमालङ्कारः । शष्पैरिति ध्वनिरप्यकिञ्चित्कर इति भावः । अत एव–'गङ्गाप्रपातान्तनिरूढ-शष्पम्' इति ईश्वरकृष्णमिश्रः । विकारः ममता । प्रस्रवः इत्युपचारः । उद्भेदः उदयः ॥ २५ ॥ अपरमिति ध्वनिः ॥ सखि वासन्ति किमिति त्व-मेवंवादिनी । पूजार्हः खलु सर्वस्यार्यपुत्रः, विशेषतः पुनर्मम प्रियसख्याः ॥ त्वं जीवितं त्वमसीति ॥ २६ ॥ जीवितं जीवः । द्वितीयं स्त्रीरूपकम् । कौमुदी आनन्दयित्री । अमृतं अमरत्वसाधनम् । 'वपुष्यवयवे त्वङ्गम्' इति नन्दी । अत्र रवङ्कारत्रयमधिकम् । मुग्धां मूढां च तामेव स्वपत्नीं

---

१ 'अनाकर्णनम्' न. २ 'प्रस्रवोद्भेद' न. ३ 'किमिति' च; 'किमिति दा-रुणो दारुणः' घ. ४ 'पूआरुहो' (पूजार्हः) न. ५ 'किमतः परेण' न. ६ 'स्थाने...मोहश्च' इत्येतद्रामवाक्यमिति च–घ.

रामः—सखि समाश्वसिहि समाश्वसिहि ।

वासन्ती—(समाश्वस्य ।) तत्किमिदमकार्यमनुष्ठितं देवेन ।

सीता—सहि वासन्दि विरम विरम । सखि वासन्ति विरम विरम ।

रामः—लोको न मृष्यतीति ।

वासन्ती—कस्य[1] हेतोः ।

रामः—स एव जानाति किमपि ।

तमसा—चिरादुपालम्भः[2] ।

वासन्ती—अयि कठोर यशः किल ते प्रियं
किमयशो ननु घोरमतः परम् ।
किमभवद्विपिने हरिणीदृशः
कथय नाथ कथं बत मन्यसे ॥ २७ ॥

सीता—तुमं जेव्व सहि वासन्दि दारुणा कठोरा अ जा एव्वं अज्जउत्तं पलित्तं[3] पदीवेसि । त्वमेव सखि वासन्ति दारुणा कठोरा च यैवमार्यपुत्रं प्रदीप्तं प्रदीपयसि ।

तमसा—प्रणय एवं व्याहरति शोकश्च ।

रामः—सखि किमत्र मन्तव्यम् ।

त्रस्तैकहायनकुरङ्गविलोलदृष्टे-
स्तस्याः परिस्फुरितगर्भभरालसायाः ।
ज्योत्स्नामयीव मृदुबालमृणालकल्पा[4]
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥ २८ ॥

नसीति भावः ॥ २६ ॥ **स्थाने** युक्तम् । **निवृत्तिः** कुण्ठनम् । चतुर्थचरणं पूरयति-**शान्त**मिति । गतमित्यर्थः । **अतः** त्यागादपि । **अन्याय्यं** न्यायादपेतम् । सखि वासन्ति विरम विरम । **कस्य हेतोः** केन हेतुनेत्यर्थः । 'विस्मृतं कस्य हेतोः' इति **मुद्राराक्षसः** । लज्जावशात् **किमपी**त्युक्तम् ॥ **अयि कठोर यश** इति ॥ २७ ॥ **कठोर** इति संबोधनम् । **अतः** पत्नीत्यागात् । किं चरितमिति शेषः ॥ २७ ॥ त्वमेव सखि वासन्ति दारुणा कठोरा च या एवं विप्रलपन्ती पर्यासं विप्रलापयसि । विप्रलापवन्तं करोषीति यावत् । अय्यउत्तं इति शेषः । आर्यपुत्रमित्यर्थः । विप्रलापो विरोधोक्तिः, पर्यासं यथेप्सितम् ॥ **त्रस्तैकहायने**ति ॥ २८ ॥ **एकहायनः** । एकवत्सर इत्यर्थः । तृतीयचरणेन विरहपाण्डिमा । **क्रव्याद्भिः** राक्षसैः । विशे-

---

१ 'तत्कस' घ-व. २ 'उचितस्तदुपा°' घ-व. ३ 'पलवन्तं पलावेसि' (प्रलपन्तं प्रलापयसि) न. ४ 'मुग्ध' व-घ.

सीता—अज्जउत्त धरामि एसा धरामि। आर्यपुत्र ध्रिये एषा ध्रिये।

रामः—हा प्रिये जानकि क्वासि।

सीता—हद्धी हद्धी। अण्णो विअ अज्जउत्तो पमुक्ककण्ठं रोइदि। हा धिक् हा धिक्। अन्य इवार्यपुत्रः प्रमुक्तकण्ठं रोदिति।

तमसा—वत्से सांप्रतिकमेवैतत्। कर्तव्यानि खलु दुःखितैर्दुःखनिर्वापणानि[1]।

पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया।
शोकक्षोभे च हृदयं प्रलापैरेव[2] धार्यते॥ २९॥

विशेषतो रामभद्रस्य[3] बहुप्रकार[4]कष्टो जीवलोकः।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव घर्मो ग्लपयति[5]।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम्॥ ३०॥

रामः—कष्टं भोः कष्टम्।

षेण लुता॥ २८॥ धरामि आर्यपुत्र धरामि। जीवामीत्यर्थः। 'द्वौ मासावहह धरामि दिने दिने' इति **बोधायनरामायणे**॥ हा धिक् हा धिक् अन्य इवार्यपुत्रः प्रमुक्तकण्ठं प्ररुदितः। प्रकृष्टं अधिकं रुदितं अस्य। अन्य इवार्यपुत्र इति ध्वनिः। सांप्रतं इदानीम्। तत्संबन्धि **सांप्रतिकं** योग्यमिति वाऽर्थः। 'त्रिषु सांप्रतिकं योग्यं' इति विक्रमार्कः। एतत् प्ररुदितम्। **निर्वापणानि** प्रमार्जनानि॥ **पूरोत्पीडे तटाकस्येति**॥ २९॥ **पूरैः** उत्पीडे उत्पीडने सति **परीवाहः** जलनिर्गमः। **शोकेन क्षोभे** सतीत्यर्थः। 'प्रलापोऽनर्थकं वचः' इत्यमरः॥ २९॥ **बहुप्रकारं कष्टं** यस्मिन् सः **जीवलोकः** मर्त्यभुवनम्॥ तदेवोपपादयति–**इदं विश्वं पाल्यमिति**॥ ३०॥ **विश्वं** जगत्। **विधिवत्** यथाराजधर्मम्। **पाल्यं** रामेणेति शेषः। **अभियुक्तेन** अभितः युक्तेन न्यायकरणात्। उचितेनेत्यर्थः। **जीवं** असुधारणम्। रामस्येत्यनुषङ्गः। **त्यागं** तव सीताया इति बोध्यम्। **असुलभ** इति स्वस्यैव अनर्थमूलकत्वादिति भावः। **तत्** तस्मात्। **उच्छ्वास** इति दुःखातिशयतः। 'श्वासो महानुच्छ्वासः' **इत्यमरशेषः**॥ उच्छ्वासोऽस्तु रुदिते किं फलमत आह–**नन्विति**। **रुदितं लाभो हि**। तथा च रुदिते कृते दुःखस्य न्यूनतैव लाभो हि इति भावः॥ ३०॥ **भो** इति मनः प्रति

---

१ 'निर्धारणानि' न. २ 'अवधार्यते न. ३ 'रामभद्रस्य यस्य' क. ४'बहुतर'' क–घ–च. ५ 'क्लमयति' घ–च.

दलति हृदयं गाढोद्वेगं[1] द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसा-
त्प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्॥ ३१ ॥

सीता—एवं ण्णेदं। एवं न्विदम्।

रामः—हे भवन्तः पौरजानपदाः।

न किल भवतां देव्याः स्थानं गृहेऽभिमतं तत-
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता।
चिरपरिचितास्ते ते भावाः परिद्रवयन्ति[2] मा-
मिदमशरणैरद्यास्माभिः[3] प्रसीदत रुद्यते॥ ३२ ॥

वासन्ती—(स्वगतम्।) अतिगम्भीरमापूरणं[4] मन्युसम्भारस्य। (प्रकाशम्।) देव अतिक्रान्ते धैर्यमवलम्ब्यताम्।

रामः—सखि किमुच्यते धैर्यमिति।

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः।
प्रणष्टमिव[5] नामापि न च रामो न जीवति॥ ३३ ॥

संबोधनम्॥ **दलति हृदय**मिति॥ ३१॥ 'दलति स्फुटति' इति **माठरः**। **उद्वेगः** तीव्रता। **विकलं** अयथाभूतम्। **मोहं** मूर्च्छाम्। **चेतनां** ज्ञप्तिम्। **अन्तर्दाहः** अबाह्यसन्तापः। **तनूं भस्मसात्** भस्माधीनम् **न करोति**। **विधिः** दैवम्। **जीवितं** जीवम्। अत्र तुशब्दः पादपूरणे॥ ३१॥ **एवमेतत्** सत्यमिति भावः॥ **न किल भवता**मिति॥ ३२॥ **स्थानं** वासः। **ततः** तस्मात्। **नातिशोचिता** किञ्चिच्छोचितेति यावत्। **अपि**स्संभावनायाम्। पूरणे इति केचित्। **ते ते** विविधाः। '**भावाः** शृङ्गारजाः क्रियाः' इति **वामनः**। **परि** परितः **द्रवयन्ति** आर्द्रीकुर्वन्तीति यावत्। **अस्माभिरिद**मिति भवद्भिः श्रूयमाणं यथा तथेत्यर्थः। प्रसिद्धमिति केचित्। वक्ष्यमाणमित्यन्ये। **रुद्यते प्रसीदत** रोदनाय किल भवद्भिरेवमपवादो निर्मित इति भावः॥ ३२॥ **मन्युसंभारस्य** दैन्यसामग्र्याः। **आपूरणं** पूर्तिः। **अतिक्रान्ते** गते सतीत्यर्थः। कार्ये इति शेषः॥ **देव्या शून्यस्ये**ति॥ ३३॥ 'संवत्सरो वत्सरश्च परिवत्सरः' इति द्विरूपः। **नाम** देव्या इति शेषः। नामास्या इति वा पाठः। **रामो न जीवतीति न** जीवत्येवेत्यर्थः। चकारः

---

१ 'शोकोद्वेगात्' न; 'गाढोद्वेगः' टी. २ 'तथा द्रवयन्ति' न; 'परिभ्रमयन्ति' व. ३ 'अद्याप्येवं' व–घ. ४ 'अवगूरणं शोकसागरस्य' व–घ; 'मन्युभारस्य' न. ५ 'नष्टं सीतेति' व.

सीता—मोहिदह्मि एदेहिं अज्जउत्तवअणेहिं । मोहितास्म्येतैरार्यपुत्रवचनैः ।

तमसा—एवमेव वत्से ।

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः ।
एतास्ता मधुनो धाराः श्च्योतन्ति सविषास्त्वयि ॥ ३४ ॥

राम[1]—अयि वासन्ति मया खलु

यथा तिरश्चीनमलातशल्यं
प्रत्युप्तमन्तः सविषश्च दंशः[1] ।
तथैव तीव्रो हृदि शोकशङ्कु-
र्मर्माणि कृन्तन्नपि किं न सोढः ॥ ३५ ॥

सीता—एव्वं ह्मि मन्दभाइणी पुणोवि आआसआरिणी अज्जउत्तस्स । एवमस्मि मन्दभागिनी पुनरप्यायासकारिणी आर्यपुत्रस्य ।

रामः—एवमतिनिष्कम्प[2]स्तम्भितान्तःकरणस्यापि मम संस्तुतेतस्त्प्रिय[3]वस्तुदर्शनादुद्दामोयमावेगः[4] । तथाहि ।

वेलोल्लोल[5]क्षुभितकरुणो[6]ज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि मया धीयते[7] तं तमन्तः ।
भित्त्वा भित्त्वा[8] प्रसरति बलात्कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥ ३६ ॥

पूरणे । नैष इति वा पाठः ॥ ३३ ॥ मोहितेवार्यपुत्रस्य प्रियवचनैः ॥ **नैताः प्रियतमा** इति ॥ ३४ ॥ शोकदारुणतया **नैताः प्रियतमाः** । अत्र भङ्ग्यन्तरेण निदर्शनमाह-**एता** इति । यद्यपि **मधुनो धाराः** । तथापि **सविषाः श्च्योतन्ति** गलन्तीत्यर्थः ॥ ३४ ॥ धैर्यमवलम्बितमेव मयेत्याह-**यथा तिरश्चीन**मिति ॥ ३५ ॥ **सविषः** विषेण सहितः अग्रदेशो यस्य तत् । सविषाग्रदेशः । तिर्यग्भवं **तिरश्चीनम्** । **अलातशल्यं** अलाताग्निसंबन्धलोहाग्रं यथा **अन्तः** आत्मनि **प्रत्युप्तम्** । अत्र सविषत्वं तिरश्चीनत्वमलाताग्निसंबन्धश्च बाधातिशयद्योतनायोक्त इति सूक्ष्मदृष्टिभिरूह्यम् । **तथैव हृदि तीव्रः** तीक्ष्णः न **सोढः किं** सोढ एवेत्यर्थः ॥ ३५ ॥ एवमस्मि मन्दभागिनी । अहं पुनः पुनः आयासकारिण्यार्यपुत्रस्य । **संस्तुताः** परिचिताश्च ते वर्गाः वृक्षादीनां वर्गाः । 'संस्तवः स्यात्परिचयः' इत्यमरः । 'संस्तुताः नुताः' इति कोपि बभ्राम ॥ **वेलोल्लोले**ति ॥ ३६ ॥ हेलया लीलया ।

---

१ 'दन्तः' न. २ 'अतिगूढ' न. ३ 'संस्तुतवस्तुतर' घ; 'संस्तुतप्रियवस्तु०' न. ४ 'अपायमावेगः' न-घ. ५ 'लोलोलोल' क-घ-च; 'हेलोलोल' टी. ६ 'करणो०' च-टी. ७ 'समाधीयते' न. ८ 'छित्त्वा छित्त्वा' न.

सीता—एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुःखसंखोएण परिमुसिअणिअदुक्खं किंपि पमुद्धं मे हिअअं। एतेनार्यपुत्रस्य दुर्वारदारुणारम्भेण दुखःसंक्षोभेण परिमुषितनिजदुःखं किमपि प्रमुग्धं मे हृदयम्।

वासन्ती—(स्वगतम्।) कष्टमभ्यापन्नो[1] देवः। तदन्यतः क्षिपामि तावत्। (प्रकाशम्।) चिरपरिचितानिदानीं जनस्थानभागानवलोकनेन मानयतु देवः।

रामः—एवमस्तु। (इत्युत्थाय परिक्रामति।)

सीता—संदीवण[2] जेव्व दुक्खस्स पिअसहीए[3] विणोदणोवाओ त्ति तक्केमि। संदीपन एव दुःखस्य प्रियसख्या विनोदनोपाय इति तर्कयामि।

वासन्ती—(सकरुणम्।) देव देव

> **अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः**
> **सा हंसैः कृतकौतुका चिरमभूद्गोदावरीसैकते।**
> **आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया**
> **कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः॥ ३७॥**

सीता—दालुणासि वासन्ति दालुणासि। जा एदेहिं हिअअमम्मगूढसल्लसंघट्टणेहिं[4] पुणो पुणोवि मं मन्दभाइणिं अज्जउत्तं अ संदावेसि। दारुणासि वासन्ति दारुणासि। या एतैर्हृदयमर्मगूढशल्यसंघट्टनैः पुनःपुनरपि मां मन्दभागिनीमार्यपुत्रं च सन्तापयसि।

करणानां इन्द्रियाणाम्। **प्रतिहतः** विहतः **रयः** वेगः यस्य सः। तोयस्येति जातावेकवचनम्। **ओघः** प्रवाहः॥ ३६॥ आर्यपुत्रस्य एतेन दुर्वारदारुणारम्भेण दुःखसंक्षोभेण प्रमुषितनिजदुःखमपि किमपि प्रमुग्धमिव मे हृदयम्। **किमपि** अनिर्वचनीयम्। प्रकर्षेण मुग्धं मूढम्। **अत्यासक्तः** अत्युत्कण्ठितः। कष्टमत्यां कृच्छ्रबुद्धौ आसक्तश्च। **आभोगः** परिपूर्णता। सन्दीपनमेव दुःखस्य प्रियसख्या विनोदनोपाय इति मन्ये॥ **अस्मिन्नेव लतागृहे** इति॥ ३७॥ 'विमनायितः स्याद्दुर्मनायितः' इति **नन्दी**। **अञ्जलिरिति** कथनं कवेश्चातुर्यम्। वेश्याजनक्रियमाणोऽयं विलासः न तु कुलाङ्गनानां संप्रदायः। कदाचिदपराधे सति सत्यः पादपीडनमेवारचयन्ति-

---

१ 'अत्यासक्तः' न–टी. २ 'सन्दीवणाइं' (सन्दीपनानि) व–घ. ३ 'पिअसही विणोद...त्ति मण्णेदि' (प्रियसखी विनोदनोपाय इति मन्यते) व–घ. ४ 'मम्मुग्घाडिअसल्ल' न (मर्मोद्घाटितशल्य).

रामः—अयि चण्डि जानकि इतस्ततो दृश्यस इव[1] नानुकम्पसे ।

हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरलज्वाल[2]मन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥ ३८ ॥

(इति मूर्च्छति ।)

सीता—हद्धी हद्धी पुणोवि पमूढो अज्जउत्तो । । धिक् हा धिक् पुनरपि प्रमूढ आर्यपुत्रः ।

वासन्ती—देव समाश्वसिहि समाश्वसिहि ।

सीता—अज्जउत्त मं मन्दभाइणिं उद्दिसिअ सअलजीवलोअमङ्गलाधा[3]रस्स दे वारंवारं संसइदजीविअदालुणो दसापरिणामो त्ति हा हदम्हि । (इति मूर्च्छति ।) आर्यपुत्र मां मन्दभागिनीमुद्दिश्य सकलजीवलोकमङ्गलाधारस्य ते वारंवारं संशयितजीवितदारुणो दशापरिणाम इति हा हतास्मि ।

तमसा—वत्से समाश्वसिहि समाश्वसिहि । पुनस्त्वत्पाणिस्पर्श एव सञ्जीवनोपायो रामभद्रस्य ।

तराम्, इत्युच्चैश्शिरसः । अलौकिकवैदिकघण्टापथमन्थ (?) विशेषज्ञाः प्रमाणम् ॥ ३७ ॥ या एतैर्हृदयमर्मगूढशल्यघट्टनैः पुनः पुनरपि मां मन्दभागिनीमार्यपुत्राय स्मरयति ॥ हा हा देवि स्फुटतीति ॥ ३८ ॥ हाहेति वीप्सायाम् । देहशब्देनाङ्गानि लक्ष्यन्ते । तेषां बन्धः परस्परसंबन्धः । ध्वंसते ध्वस्तो भवति । अविरलज्वालं यथा तथा । 'मनस्यात्मनि चान्तः स्यात्' इति रत्नमाला । तमसि भ्रमे । अन्धे गाढे सति । सीदन् क्लिश्यमानः । 'विधुरो दीनः' इति शब्दार्णवः । आत्मा देहः । 'धृतिर्देहं त्रिप्वात्मा' इति हलायुधः । अन्तः मनसि । अन्तः पश्यामीति दीक्षिताः । मोहः मूर्च्छा । विष्वक् अभितः । स्थगयति कुण्ठयतीति केदारः । मामिति शेषः । 'किमित्यर्थेऽपि च कथं' इति शब्दमाला ॥३८॥ हा धिक् हा धिक् पुनरपि प्रमूढ आर्यपुत्रः । आर्यपुत्र मां मन्दभागिनीमुद्दिश्य सकलजीवलोकमङ्गलाधारजन्मलाभस्य ते संशयितजीवितदारुणो दशापरिणाम इति हा हतास्मि । संशयितं सञ्जातसंशयं जीवितं यस्मिन् दशापरिणामे । स चासौ दा-

---

१ 'दृश्यसे नानु०' न; 'दृश्यसे एव' घ. २ 'अविरत' च–घ. ३ 'मङ्गलिअजम्मलाहस्स' (मङ्गल्यजन्मलाभस्य) न; 'मङ्गलाधारजन्मलाभस्य' टी.

वासन्ती—कथमद्यापि नोच्छ्वसिति। हा प्रियसखि सीते क्वासि सम्भावयात्मनो जीवितेश्वरम्।

(सीता ससंभ्रममुपसृत्य हृदि ललाटे च स्पृशति।)

वासन्ती—दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः।

रामः—आलिम्पन्नमृतमयैरिव प्रलेपै-
रन्तर्वा वहिरपि वा शरीरधातून्।
संस्पर्शः पुनरपि जीवयन्नकस्मा-
दानन्दादपर[१]मिवादधाति मोहम्॥ ३९॥

(आनन्दनिमीलिताक्ष एव) सखि वासन्ति दिष्ट्या वर्धसे।

वासन्ती—देव कथमिव।

रामः—सखि किमन्यत्। पुनः प्राप्ता जानकी।

वासन्ती—अयि देव रामभद्र क्व सा।

रामः—(स्पर्शसुखमभिनीय।) पश्य नन्वियं पुरत एव।

वासन्ती—अयि देव किमिति मर्मच्छेददारुणैरेभिः प्रलापैः प्रियसखीदुःखदग्धामपि मां पुनर्मन्दभाग्यां दहसि।

सीता—ओसरिदुं इच्छम्मि। एसो उण चिरसं[२]भावसोम्मसीदलण अज्जउत्तप्फंसेण दीहदारुणं वि झत्ति संदावं हरं[३]न्तेण वज्जलेवोव[४]णिवद्धो

रुणः। **दशा** अवस्था। **जीवितेश्वरं** भर्तारम्। ध्वनिश्च। 'जीवितेशः प्रिये यमे' इत्यमरः॥ **आलिम्पन्निति** ॥ ३९॥ **आ** समन्तात् प्रकृष्टाश्च ते **लेपाः**। वाशब्दश्चार्थः। 'इवार्थचार्थयोर्वा स्यात्' इति **कपिलः**। अपिरेकः वाकारश्च पुनरुक्तौ। शरीरधातूंश्चेत्यर्थः। 'श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः। इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः' इत्यमरः। **सः** पूर्वं कृतः। प्रसिद्धो वा। 'अकस्मात् सहार्थे (सहसार्थे ?) स्यात्' इति **कपिलः**। 'अकस्मात्' इति **महाराष्ट्राः**। **आनन्दाद्धेतोः**। न विद्यते परः यस्माद् **अपरः** तं **मोहं** पारवश्यम्। 'मोहो मूर्च्छापारवश्यतमोमौढ्यभ्रमादिषु' इत्य**गस्त्यः**। अकस्मात् अहेतुकादानन्दादिति केचित्। तन्न। स्पर्शस्यैव मुख्यहेतुत्वात्॥ ३९॥ इतोऽपसरणं कर्तुमिच्छामि। एष पुनश्चिरप्रणयस्वभावसौम्यशीतलेन आर्यपुत्रस्पर्शेन दीर्घदारुणमपि झटिति सन्ता-

१ 'अपरविषं तनोति' क–घ–व. २ 'चिरप्पणअसंभारसोम्म' (चिरप्रणयसंभारसौम्य) न; 'चिरप्रणयस्वभाव०' टी. ३ 'उल्लाहअन्तेण' (उल्लाघयता) न–टी. ४ 'लेवोवणद्धो' (लेपोपनद्धः) न–टी.

विअ सिज्जन्तणीसहविवल्हत्थो वेअणसीलो अवसो विअ मे हत्थो । अपसर्तुमिच्छामि । एष पुनः चिरसद्भावसौम्यशीतलेन आर्यपुत्रस्पर्शेन दीर्घदारुणमपि झटिति सन्तापं हरता वज्रलेपोपनिबद्ध इव खिद्यन्निःसहविपर्यस्तो वेपनशीलोऽवश इव मे हस्तः ।

रामः—सखि कुतः प्रलापाः ।

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधरः
सुधासूतेः पादैरमृतशिशिरैर्यः परिचितः ।

सीता—अज्जउत्त सो जेव्व दाणिं सि तुमं । आर्यपुत्र स एवेदानीमसि त्वम् ।

रामः—**स एवायं तस्यास्तुहिननिकरौपम्यसुभगो**
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥ ४० ॥

पमुल्लाघयता वज्रलेपोपनद्ध इव स्विद्यत्स्वेदनिस्सहो विप्रलब्धवेविरः अवसज्जितो मे हस्तः । आर्यपुत्रविषये स्पर्शेन **वज्रलेपेन उपनद्धः** बद्ध इव स्थितः । वज्रलेपेति कथनमतिदार्ढ्यसूचनाय । **स्वेदः निस्सहः** दुस्सहः येन । स्विद्यदित्यत्र 'त्यथ्यां चछजा' इति जलम् । बहुकालातिपाताद्विप्र**लब्धो** वञ्चितश्चासौ **वेविरः** सात्त्विकभावात् कम्पनशील इत्यर्थः । देशीयोऽयं शब्दः । **अवसज्जितः** सज्जीकृतः । प्रेमवशादिति भावः । अवेत्युपसर्गो लक्षणया अवधानवाचकः ॥ **गृहीतो यः पूर्वमिति** ॥ ४० ॥ धरतीति धरः **कङ्कणस्य धरः** । सुधानां सूतिर्यस्मात् । चन्द्रस्य **पादैः** किरणैः **अमृतं** जलम् । तद्वत् **शिशिरैः** शीतैः । 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इति **ईश्वरकृष्णमिश्रः** । 'पयः कीलालममृतम्' इति । 'अमृतं जलं' इति च अमरनन्दिनौ । **परिचितः** कृतपरिचयः इत्यर्थः । एतेन पाणिस्सञ्जीवन इति व्यज्यते । आर्यपुत्र स एवेदानीमसि त्वम् । **तदितरेति**–तस्याः सीतायाः, इतरः स्पर्शकारणात्पाणेरन्यः । तस्य करस्य । **औपम्येन** दृष्टान्तेन **सुभगः** मनोहरः । 'स्यादौपम्यं तु दृष्टान्तः' इति **शाश्वतः** । 'अनौपम्यां रम्याम्' इति **भगवत्पादाः** । अत्र तस्या इति कथने उभयत्र चारितार्थ्यात् पुनस्तदितरेति कथनं कवेरचातुर्यरूपकः प्रमादः । **'कन्दलः** कन्दगोलः' इति कपिलः । **तस्याः पाणिः मया लब्धः** अथेति

---

१ 'स्विद्यत्स्वेदनिःसहः' टी. २ 'चिरं स्वेच्छास्पर्शैः' क–घ–च. ३ 'तदितरकरौपम्य' न–टी.

(इति गृह्णाति ।)

सीता—हद्धी हद्धी । अज्जउत्तफंसमोहिदाए पमादो क्खु मे संवुत्तो । हा धिक् हा धिक् । आर्यपुत्रस्पर्शमोहितायाः प्रमादः खलु मे संवृत्तः ।

रामः—सखि वासन्ति आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि । तत्त्वं तावदेनां धारय ।

वासन्ती—कष्टमुन्माद एव ।

(सीता ससंभ्रमं हस्तमाक्षिप्यापसर्पति ।)

रामः—हा धिक् प्रमादः ।

करपल्लवः स तस्याः सहसैव जडो जडात्परिभ्रष्टः ।
परिकम्पिनः प्रकम्पी करान्मम स्विद्यतः स्विद्यन् ॥ ४१ ॥

सीता—हद्धी हद्धी । अज्जवि अणवत्थिदत्थिमिदमूढघुण्णन्तणअणो ण पज्जवत्थावेदि अत्ताणअं । हा धिक् हा धिक् । अद्याप्यनवस्थितस्तिमितमूढघूर्णन्नयनो न पर्यवस्थापयत्यात्मानम् ।

तमसा—(सस्नेहकौतुकस्मितं निर्वर्ण्य ।)

सस्वेदरोमाञ्चितकम्पिताङ्गी
जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःप्रविधूतसिक्ता
कदम्बयष्टिः स्फुटकोरकेव ॥ ४२ ॥

शेषः ॥ ४० ॥ हा धिक् आर्यपुत्रस्पर्शमोहितायाः प्रमादः संवृत्तः । 'खेदो हासश्च कम्पादिः साध्वसं नेत्रमीलनम् । जल्पाकत्वं तथानन्दस्फूर्तिरुन्मादजाः क्रियाः ॥' इति काव्यदीपिकायाम् । उन्मादश्चित्तविभ्रमः । करेति ॥ ४१ ॥ जडः शिशिरः ॥ ४१ ॥ हा धिक् अनवस्थितस्तिमितघूर्णमानमविरलवेदनं न पर्यवस्थापयाम्यात्मानम् । स्तिमितः निश्चलः । निर्वर्ण्य दृष्ट्वा ॥ सस्वेदरोमाञ्चितेति ॥ ४२ ॥ मरुता पवनेन प्रविधूता नवाम्भसा सिक्तेति क्रमः । व्यर्थोऽपि प्रशब्दः पादपूरकः । कदम्बयष्टिः नीपशाखा । 'चिचकार कोरकाणि' इति माघप्रयोगात् स्फुटानि कोरकाणि यस्या इति केचित् । तन्न, यथा जलधरपटल इत्यादिवत् कोरकाणीत्यसाधुः कोरकाः पाटलानीत्येव साधुः । अत एव 'कोरकः पुमान्' इति, 'समूहे पटलं न ना' इति च विविधव्याख्याजटिलनामलिङ्गानुशासनो भगवत्पादानुगृहीतकृतिरमरसिंहोऽभाणीत् ॥ ४२ ॥ अम्महे अवशं गतेनात्मनाऽनेन लज्जापितास्मि ।

सीता—(स्वगतम् ।) अम्महे अवसेन एदेण अत्ताणएण लज्जाविदम्हि भअवदीए तमसाए । किं त्ति किल एसा मण्णिस्सदि एसो परिच्चाओ एसो अहिसङ्गो त्ति । अहहे अवशेनैतेनात्मना लज्जापितास्मि भगवत्या तमसया । किमिति किलैषा मंस्यत एष परित्याग एषोऽभिषङ्ग इति ।

रामः—(सर्वतोऽवलोक्य ।) हा कथं नास्त्येव । नन्वकरुणे वैदेहि ।

सीता—सच्चं अकरुणह्मि जा एव्वंविहं तुमं पेक्खन्दी जीवेमि जेव्व । सत्यमकरुणास्मि यैवंविधं त्वां प्रेक्षमाणा जीवाम्येव ।

रामः—क्वासि देवि प्रसीद । न मामेवंविधं परित्यक्तुमर्हसि ।

सीता—अयि अज्जउत्त विप्पदीवं विअ एदं । अयि आर्यपुत्र विप्रतीपमिवैतत् ।

वासन्ती—देव प्रसीद प्रसीद । स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिं गतमात्मानम् । कुतोऽत्र मे प्रियसखी ।

रामः—व्यक्तं नास्त्येव कथमन्यथा वासन्त्यपि तां न पश्येत् । अपि खलु स्वप्न एष स्यात् । न चास्मि सुप्तः । कुतो रामस्य निद्रा । सर्वथा स एवैष भगवाननेकवारपरिकल्पनानिर्मितो विप्रलम्भः पुनः पुनरनुबध्नाति माम् ।

किमेषा ज्ञास्यति । एष परिवादः एषोऽभिषङ्ग इति । **अहहे** खेदादिषु । **अवशं** पाराधीन्यम् । **लज्जापिता** लज्जां प्रापिता । एष मम सेत्यर्थः । मुणिस्सदीत्यत्र 'ज्ञो मुण' इति मुणादेशः । **परिवादः** अपवादः । '**अभिषङ्गः** अभिनिवेशः' इति **धरणिः** । अकरुणतरास्मि या एवंविधमपि त्वां पश्यन्ती जीवाम्येव । पश्यन्त्येव जीवामीति च चमत्कारः ॥ अयि आर्यपुत्र विप्रतीपमिवैतत् । **एतत्** प्रेमेति शेषः । विशेषेण प्रतीपं प्रतिकूलम् । तथा च परित्यागे कृते एवं पुनः प्रेमानुसरणमनुचितमिति भावः । **अतिभूमिं** मर्यादापरपारमिति यावत् । **प्रियसखी** सीता । **अन्यथा** सा यदि स्यात् कथं न पश्येदिति योज्यम् । **सर्वथा** प्रकारेण । **अनेकवारं** असकृत् **परिकल्पनानि** संकल्पविकल्पादीनि यस्मिन् सः । 'विप्रलम्भस्तु वञ्चना' इति **नामार्णवः** । विप्रलम्भस्य भगवानिति विशेषणं माहात्म्यापादकम् । अत एव 'भगवति निद्रे दयस्व'इति **भट्टाचार्याः** । विप्रलम्भः शृङ्गारविशेषः इति केचित् । विप्रयोग इत्यन्ये । उभे अपि शशश्रृङ्गे ॥ 'मए एव्वं विप्पलद्धो' इत्युत्तरवाक्यविरोधात् । मयैव दारुणया एवं विप्रलब्ध आर्यपुत्रः । विप्र-

---

१ 'मुणिस्सदि' (ज्ञास्यति) टी. २ 'परिवादः' टी. ३ 'विवरीदं' (विपरीतं) क-घ-व. ४ '°भूमिगतविप्रलम्भम्' क-घ-व.

सीता—मए जेव्व दारुणाए विप्पलद्धो अज्जउत्तो। मयैव दारुणया विप्रलब्ध आर्यपुत्रः।

वासन्ती—देव पश्य पश्य

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथ-
स्ते चैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः।
खड्गच्छिन्नजटायुपक्षतिरितः सीतां चलन्तीं वह-
न्नन्तर्व्यापृतविद्युदम्बुद इव द्यामभ्युदस्थादरिः॥ ४३॥

सीता—(सभयम्) अज्जउत्त तादो वावादीअदि अहं वि अवहरिज्जामि। ता परित्ताहि। आर्यपुत्र तातो व्यापाद्यते अहमप्यपह्रिये। तस्मात्परित्रायस्व।

रामः—(सावेगमुत्थाय) आः पाप तातप्राणसीतापहारिन् क्व यासि।

वासन्ती—अयि देव राक्षसकुलप्रलयधूमकेतो किमद्यापि ते मन्युविषयः।

सीता—अम्मो अहं वि उब्भन्तम्हि। अहो अहमप्युद्भ्रान्तास्मि।

रामः—अन्यं एवायमधुना विपर्ययो वर्तते।

लब्धः वञ्चितः पाणिस्पर्शमात्रेणेति भावः। 'विप्रलब्धस्तु वञ्चितः' इत्यमरः॥ अन्यतो दर्शयन्ती मनो विनोदयति-देवेति॥ **पौलस्त्यस्य जटायुषेति** ॥ ४३॥ **पौलस्त्यस्य** रावणस्य। कृष्णायोमयः **कार्ष्णायसः** कृष्णायससम्बन्धी वा। कृष्णं नीलं च तत् अयः लोहः तद्विकार इति वा। कार्ष्णायस इति कथनं दार्ढ्यातिशयसूचकम्। पिशाचानामिव वदनानि येषां ते। **कङ्कालैः** शरीरास्थिभिः। **शेषाः** अतितरां कृशा इति यावत्। अत एव नलेन तावदेत एव बलिन इति परीक्ष्य ऋतुपर्णस्य रथे कृशतरा वाजिनः योजिता इति **महाभारते**। **खराः** वेगादिषु तुरङ्गाधिकाः। 'खचर' इति **महाराष्ट्राः**। **जटायोः पक्षतिः** पक्षमूलम्। 'जटायुवत्पङ्क्तिरथो न धन्यः' इति **बोधायनरामायणे**। **चलन्तीं** कम्पमानाम्। **अन्तः** स्वात्मनि। **व्यापृता** स्फुरन्ती **विद्युत्** यस्य। **द्यां** आकाशम्। **अरिः** रावणः॥४३॥ हा आर्यपुत्र तातो व्यापाद्यते। **तातो** जटायुः। **व्यापाद्यते** हन्यते। अहमपि अवहरिज्जामि अपह्रिये। अपहृता भवामीत्यर्थः। परित्रायस्व परित्रायस्व। आवेगः संभ्रमातिशयः। **प्रलये** नाशे। **धूमकेतुः** उत्पातविशेषः। **ते** तव **मन्योः** कोपस्य **विषयः** गोचरः। अरिरित्यनुपज्यते। अहो उद्भ्रान्तास्मि। **विपर्ययः**

---

१ 'परश्चैते' ब-ध. २ 'ज्वलन्तीं' ब-घ. ३ 'अन्तर्व्याकुल' क-घ-ब. ४ '०केतो अद्यापि' ब-घ. ५ 'अन्यथं एवायमधुना प्रलापो वर्तते' ब-घ.

उपायानां भावादविरतविनोदव्यतिकरै-
विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः ।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्
कथं तूष्णीं सह्यो निरवधिरयं त्वप्रतिविधः ॥ ४४ ॥

सीता—णिरवधित्ति हा हदम्हि मन्दभाइणी । निरवधिरिति हा हतास्मि मन्दभागिनी ।

रामः—हा कष्टम् ।

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञा जाम्बवतोपि यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि मे ॥ ४५ ॥

सीता—बहुमण्णाविदम्हि तं पुव्वविरहं । बहुमानितास्मि तं पूर्वविरहम् ।

रामः—सखि वासन्ति दुःखायैव सुहृदामिदानीं रामस्य दर्शनम् । कियच्चिरं त्वां रोदयिष्यामि । तदनुजानीहि मां गमनाय ।

व्यत्यासः ॥ **उपायानां भावादिति** ॥ **उपायानां** सामादीनां चतुर्णाम् । **भावात् अविरतं** सन्ततम् **विनोदव्यतिकराः** कौतुकव्यापाराः येषु । 'विनोदः कौतुके हास्ये' इति, 'व्यापारे मुदि सम्बन्धे योगे व्यतिकरे' इति **नामार्णवशब्दार्णवौ** । **विमर्दैः** संग्रामैः । **रिपुघातः अवधिः** अवसानं यस्य । 'वृथार्थेऽपि तूष्णीम्' इति **रभसः** । 'परित्यागवियोगान्तघाताः प्रविलयास्तु स्ताः' इति **केदारः** ॥ ४४ ॥ निरवधिरिति हा हतास्मि । पूर्ववियोगापेक्षया आधुनिकवियोगस्य वैलक्षण्यमाह ॥ **व्यर्थं यत्र कपीन्द्रेति** ॥ ४५ ॥ यच्छब्दत्रयेण प्रविलयः परामृश्यते । **अविषये** अगोचरे । **तत्र** तस्मिन् प्रविलये इति शेषः । यत्रेति पदधा वक्तव्ये त्रिधा कथनं प्रक्रमभङ्गः । 'न स्थातुं न पलायितुं चलितुं नोन्मीलितुं नो दातुं निजजीवितं प्रभवति' इति **लीलाधरप्रयोग** इव अनुग्राह्यः । केचिदविषये इति पाठमाश्रित्य य इत्यध्याहारमुरीचक्रुः । तत् कुररीक्रन्दितमिव परिहास्यम् । यत्रेति प्रायपाठः, प्रतीतस्य प्रातिकूल्यात् । अपित्रयमधिकम् ॥ ४५ ॥

---

१ 'अविरल' न. २ 'व्यतिकरः' घ. ३ 'जनितजगदत्यद्भुत०' न. ४ 'कष्टः' न. ५ 'तु प्रविलयः' न; 'निरवधिरिदानीं तु विरहः' घ. ६ 'जाम्बवतो न यत्र' न. ७ 'अविषयः' घ. ८ 'बहुमाणिदम्हि पुव्वविरहे' न.

सीता—(सोद्वेगमोहं तमसामाश्लिष्य) भअवदि तमसे गच्छदि दाणिं अज्जउत्तो । (इति मूर्च्छति) भगवति तमसे गच्छतीदानीमार्यपुत्रः ।

तमसा—वत्से समाश्वसिहि समाश्वसिहि । नन्वावामायुष्मतोः कुशलवयोर्वर्षवर्धनमङ्गलानि[1] सम्पादयितुं भागीरथीपदान्तिकमेव गच्छावः ।

सीता—भअवदि पसीद। खणमेत्तं वि दाव दुल्लहदंसणं जणं पेक्खामि। भगवति प्रसीद । क्षणमात्रमपि तावद्दुर्लभदर्शनं जनं प्रेक्षे ।

रामः—अस्ति चेदानीमश्वमेधाय सहधर्मचारिणी मे ।

सीता—(सोत्कम्पम्) अज्जउत्त का। आर्यपुत्र का ।

रामः—हिरण्मयी सीताप्रतिकृतिः ।

सीता—(सोच्छ्वासास्रम् ।) अज्जउत्तो दाणिं सि तुमं । अम्महे उक्खाणिदं दाणिं मे परिच्चाअलज्जासल्लं अज्जउत्तेण । आर्यपुत्र इदानीमसि त्वम् । अहो उत्खातमिदानीं मे परित्यागलज्जाशल्यमार्यपुत्रेण ।

रामः—तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि ।

सीता—धण्णा सा जा एव्वं अज्जउत्तेण बहुमण्णीअदि जा अ अज्जउत्तं विणोदअन्दी आसाणिबन्धणं जादा जीअलोअस्स । धन्या सा यैवमार्यपुत्रेण बहु मन्यते या चार्यपुत्रं विनोदयन्त्याशानिबन्धनं जाता जीवलोकस्य ।

तमसा—(सस्मितस्नेहास्रं परिष्वज्य ।) अयि वत्से एवमात्मा स्तूयते।

बहुमानितास्मि पूर्वविरहं, उद्दिश्येत्यर्थः । **उद्वेगो** भयसंभ्रमः ॥ हा भगवति तमसे गच्छतीदानीमार्यपुत्रः । **वर्षवर्धनं** अम्बुपूर्तिः । भगवति प्रसीद । क्षणं तावद्दुर्लभदर्शनमार्यपुत्रं पश्यामि । छणमिति पाठस्साधुः ! दुर्लभेति ध्वनिः । आर्यपुत्र का । आर्यपुत्र इदानीमसि त्वम् । अम्महे उत्खातमिदानीं परित्यागलज्जाशल्यमार्यपुत्रेण । **उत्खातं** आकृष्टम् । **तत्रापि** कनकसीताप्रतिकृतावित्यर्थः । **चक्षुः** कर्म । धन्या खलु सा या एवमार्यपुत्रेण बहु मन्यते या आर्यपुत्रं विनोदयन्ती आशाबन्धनं जाता जीवलोकस्य । जीवलोकस्वरूपस्य । अथवा–गोपीकृष्णः सीताराम इत्यादौ यथा गोपीयुक्तकृष्णः सीतायुक्तराम इति समाधीयते । तथा प्रकृते जीवयुक्ताः लोकाः भुवनानि यस्मिन् तस्य **जीवलोकस्य** रामस्येत्यर्थः । जीवलोक इत्युपलक्षणम् । तथा च जीवलोकस्य रामस्य चाभेदः सिद्धः । अत एव 'विश्वं विष्णुः' इति । 'वासनाद्वासुदेवस्य' इत्यादि पौराणिका इति । **आशेति** यथा रामं विहाय आशा न निर्गच्छेत् ।

---

१ 'वर्षवृद्धिमङ्गलानि' न; 'वर्षग्रन्थिमङ्गलं' व.

सीता—(सलज्जमधोमुखी स्वगतम्) परिहसिदह्मि भअवदीए। परिहसितास्मि भगवत्या।

वासन्ती—महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम्।

सीता—पडिऊला दाणिं मे वासन्दी संवुत्ता। प्रतिकूलेदानीं मे वासन्ती संवृत्ता।

तमसा—वत्से एहि गच्छावः।

सीता—(सकष्टम्) एव्वं करेह्म। एवं कुर्वः।

तमसा—कथं वा गम्यते। यस्मात्तव

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः।
मर्मच्छेदोपमैर्यत्नैः संनिकर्षो निरुध्यते ॥ ४६ ॥

सीता—णमो णमो अपुव्वपुण्णजणिददंसणाणं अज्जउत्तचलणकमलाणं।

तथा आशाया बन्धनं जातेति भावः। सस्मितेति—सीताप्रतिकृतिव्याजेन आत्मानमेव स्तौति इति स्मिताविर्भावः, रामः प्रतिकृतावप्येवमनुरक्त इति स्नेहसन्दर्भः। ईदृशयोरीदृशी दशेत्यस्रोदयः। एवमादिषु तेषु तेषु स्थलेषु ते ते हेतवः कुशाग्रबुद्धिभिरूह्याः। आत्मेति—त्वं सीतेति यावत्। परिहसितास्मि भगवत्या। अनुजानीहि मां गमनायेति वादिनं रामं प्रत्याह— महानिति। व्यतिकरः सन्तोषः। 'मुदि व्यतिकरः' इति नामार्णवः। गमनं प्रति प्रसादस्तवेति शेषः। अस्माकं महान्व्यतिकरोऽयमित्यन्वयः। कार्येति—तदेहि संभावयास्मानिति द्वितीयाङ्कपूर्तौ शम्बूकोक्तं भगवदगस्त्यसन्दर्शनरूपकार्यमिति भावः। प्रतिकूला इदानीं मे वासन्ती संवृत्ता। एवं कुर्वः। गमनमिति प्रयाससाध्यमित्याह—प्रतीति। दयिते इति सीतां प्रति संबोधनचमत्कारः। वस्तुतः दयिते भर्तरि रामभद्रे ॥ प्रत्युप्तस्येवेति ॥ ४६ ॥ प्रत्युप्तस्येव स्थितस्येत्यर्थः। तृष्णा दर्शनेच्छा दीर्घा यस्मिन्। तस्य चक्षुषः। संनिकर्षः मर्मच्छेदोपमैः अरुन्तुदैः यत्नैः साहसैः। निरुध्यते अतिबलात्काराद्वितस्त्वमन्यत्र नीयसे इति भावः। चक्षुष इति जातावेकवचनम्। 'विपुलं चक्षुषि विस्तृतं नितम्बे' इति गौडपादाचार्याः। 'चरणं शरणं त्वदीयं' इति श्रीकालहस्तीश्वरशतके वरदन्तस्य ॥ ४६ ॥ नमस्सुकृतपुण्यजन-

---

१ 'गमनं पुनर्यथा' क. २ 'तथास्तान्' क-ख-ग. ३ '°च्छेदपरैर्यत्नैरागमो न समाप्यते' क-घ-ङ. ४-'सुकिदपुण्णजणदंसणिज्जाणं' (सुकृतपुण्यजनदर्शनीयानां) न-टी.

नमो नमोऽपूर्वपुण्यजनितदर्शनाभ्यामार्यपुत्रचरणकमलाभ्याम् । (इति मूर्च्छति)

तमसा—वत्से समाश्वसिहि समाश्वसिहि ।

सीता—(समाश्वस्य ।) किअच्चिरं वा मेहन्तरेण पुण्णिमाचन्दस्स दं॰सणं। कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम् ।

तमसा—अहो संविधानकम् ।

> **एको रसः करुण एव निमित्तभेदा-**
> **द्भिन्नः पृथक्पृथगिवाश्रयते विवर्तान् ।**
> **आवर्तबुद्बुदतरङ्गमयान्विकारा-**
> **नम्भो यथा सलिलमेव हि तत्समस्तम् ॥ ४७ ॥**

रामः—अयि विमानराज इत इतः ।

दर्शनीयाभ्यामार्यचरणाभ्याम् । **सुकृतपुण्येति** पुनरुक्तिविरोधः । सुष्ठु कृतपुण्या इति परिहारः । ते च ते **जनाः** । शोभनं कृत्यं कृतं येन सः सुकृतः स चासौ पुण्यजनः राक्षसः विभीषण इति यावत् । कियच्चिरं मे वाष्पान्तरेण पूर्णचन्द्रस्य दर्शनम् । अन्तरेण वाष्पस्योदयात् पूर्वक्षणरूपेण अवकाशेनेत्यर्थः । 'अन्तरमवकाशे' इत्यमरः । रामसुखपूर्णचन्द्रस्य वाष्पसङ्कटेनैव मुखेन्दुदर्शनम्, न तु सौलभ्येनेति भावः ॥ कविस्तमसावाक्यव्याजेनात्मनैपुणं स्तुवन् नाटकविरुद्धमङ्गलेतरदैन्यभरितकरुणरसप्राधान्यदोषं दग्धन (?) क्रमेण परिहरति—**अहो** इति । अहो आश्चर्ये ॥ **एको रसः करुण** इति ॥ ४७ ॥ **निमित्तभेदात्** कारणविच्छित्तिविशेषात् । **भिन्नः** भेदितः सन् । **पृथक् पृथक्** अन्यरसात्मनेति यावत् । **विवर्तान्** विपरीतपरिणामान् **आश्रयते** भजति । 'व्यस्तपरिणामे स्याद्विवर्तः' इति **कपिलः** । अत्र करुणरस एव अन्यरसत्वेनापि परिणत इति फलितोऽर्थः । क्वचिद्द्वीपे भस्मसात्कृतवेत्रलताजालेषु स्थलेषु स्वतः कदलीवनाविर्भाव इति प्रसिद्धिः तद्वदिहाप्युन्नेयमिति कवेस्तात्पर्यम् । 'स्यादावर्तोऽम्भसां भ्रमः' इत्यमरः । **यथा** आश्रयते इत्यध्याहारः । **समस्तं तद्** आवर्तादिकं **सलिलमेव हि** । तथा च आवर्तबुद्बुदतरङ्गाद्युपाधिभिः भिन्नं सदप्यम्भः वस्तुत एकमेव । तथा शृङ्गारादिरसोपाधिभिर्भिन्न इव दृश्यमानोऽपि करुणो रसः अन्यतस्तदभिन्नः सन् एक एवेति भावः ॥ अस्मिन् पद्ये केचिदारम्भशूराः 'ब्रह्मापि नरं न रञ्जयति' इति **भर्तृहरि**गिरां पात्रीभवन्तीति दिक् ॥ ४७ ॥ इत इतः आगच्छेति शेषः ॥ अथ मधुरेणैव

---

१ 'मे वाष्पान्तरेण' टी. २ 'न पुण्णचन्ददंसणम्' न; 'पूर्णचन्द्रस्य दर्शनम्' टी. ३ 'इव श्रयते' न. ४ 'तु तत्समग्रम्' क-ख-ग.

(सर्वे उत्तिष्ठन्ति)

तमसावासन्त्यौ—(सीतारामौ प्रति ।)

अवनिरमरसिन्धुः सार्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता ।
स च मुनिरनुयातारुन्धतीको वसिष्ठ-
स्त्वयि[1] वितरतु भद्रं भूयसे[2] मङ्गलाय ॥ ४८ ॥

(इति निष्क्रान्ताः सर्वे ।)

॥ तृतीयोऽङ्कः ॥

पूरयेदिति न्यायमनुसरन् कविर्निर्णेजम् (?) इति शतसङ्कोचपरिजिहीर्षु अन्यापदेशेन सन्दर्भमसुवन्नेव कल्यां वाचमुल्लिखति—**तमसेति** । **प्रति** उद्दिश्य । अत्र क्रमालङ्कारः ॥ **अवनिरमरसिन्धुरिति** ॥ ४८ ॥ **अवनिः** पृथिवी **अमरसिन्धुः** गङ्गा । **अस्म**च्छब्देन तमसावासन्त्यौ परामृश्येते । **सार्धं** सह । **सः कुलपतिः** । 'कुलं गृहेऽपि' इत्यमरः । गृहस्थाश्रमपालक इति यावत् । पुराणवचसा पूर्वं व्याध इति भावः । 'गृहं गृहपतिः' इति श्रुतिः । **यश्छन्दसां** मानिषादेत्यादिपद्यानाम् । **आद्यः** परः प्रयोक्तेत्यर्थः । 'आद्यो वरोऽपि' इति हैमः । आद्यः प्रथम इति केचित् । तन्न ॥ त्रेतायुगप्रवृत्ततया वाल्मीक्यपेक्षया कृतयुगकवेर्वटपत्रशायिना सह महाप्रलये चतुःसमुद्रे परिक्रीडमानस्य भगवतो यमद्रोहिमुनिडिम्भस्य 'रुद्रं पशुपतिं स्थाणुं' इति मृत्युञ्जयस्तोत्ररूपच्छन्दोऽवतारेषु आद्यत्वादिति प्रामाणिकविशेषज्ञाः समामनन्ति । **सः** प्रसिद्धः । अनुयाता अनुसृता अरुन्धती यं **अनुयातारुन्धतीकः** । अनुयातेति ध्वनिः । तव कृते इति शेषः । त्वयि इति वा पाठः । 'वितर वारिद वारि दवातुरे' इति प्राभाकरमिश्राः । **भद्रं** वेदोक्तं कल्याणम् । 'भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिः' इति श्रुतेः । **श्रेयसे** श्रेष्ठाय 'श्रेयान् श्रेष्ठः' इत्यमरः । **मङ्गलाय** उत्सवाय । 'उत्सवेऽपि च मङ्गलम्' इति **हेमचन्द्रः** । एतेन भद्रश्रेयोमङ्गलानां शब्दार्थाभ्यामैक्यात् प्रमादः कवेरिति यद्दूषणं केचिदाहुस्तत्परास्तम् । चकारः एकोऽधिकः ॥ अथवा—**श्रेयसे** सम्पत्तये । 'श्रेयस्सम्पत्तिमोक्षयोः' इति नामार्णवः । **मङ्गलाय** च इति योज्यम् । अत्र सदसदध्वगमने विशेषज्ञाः प्रमाणम् । शिष्यडिम्भः कियानित्यलमतिविस्तरेण ॥ ४८ ॥ इति महाराज०* उत्तररामचरितसंजीवनाख्यटिप्पणे तृतीयोऽङ्कः समाप्तः ॥ इति तृतीयोऽङ्कः ॥

---

१ 'तव' न. २ 'श्रेयसे' टी.

* प्रथमाङ्कटीकासमाप्तौ टीकाकृता यदात्मगुरुः कथितं तत्सर्वमत्राप्यनुसन्धेयम्.

॥ चतुर्थोऽङ्कः ॥

(ततः प्रविशतस्तापसौ ।)

एकः—सौधातके दृश्यतामद्य भूयिष्ठसंनिधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य । तथाहि ।

नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूताप्रिया-
पीतादभ्यधिकं तपोवनमृगः॰पर्याप्तमाचामति ।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते ॥ १ ॥

सौधातकिः—साअदं अणेअपिआराणं जिण्णकुच्छाणं अणज्झाअकालणाणं । स्वागतमनेकप्रकाराणां जीर्णकूर्चानामनध्यायकारणानाम् ।

प्रथमः—(विहस्य ।) अपूर्वः कोऽपि ते बहुमानहेतुर्गुरुषु सौधातके ।

अथ चतुर्थोऽङ्कः ॥ अथ तावदाशीर्वचनसन्दर्भानुरोधादरुन्धतीजनकादिप्रवेशसंलापौ निरूपयिष्यन् कविः तदङ्गभूतमितिवृत्तोपक्षेपप्रकाशकं मिश्रविष्कम्भमुपक्रमते—**तत** इति ॥ **एकः** दाण्डायनिरित्यर्थः । सुधातकस्यापत्यं **सौधातकिः** । मद्येति ध्वनिः । समधिकतरेति भ्रान्तः पाठः पुनरुक्तेः । समधिकेति अधिकतरेति च सुपाठौ । **भागो** माहात्म्यम् । **पदं** स्थानम् । तदेव वर्णयति—**नीवारौदनमिति** ॥ १ ॥ **सद्यःप्रसूतया प्रियया** । **पीतादभ्यधिकं** सुदुर्वारमिति यावत् । **नीवाराः** तृणधान्यानि । **तदोदनमण्डं** रसाग्रम् । 'स्वरसाग्रे मण्डम्' इत्यमरः । 'कञ्जी' इति **द्राविडाः** । **पर्याप्तं** यथेप्सितम् । **आचामति** पिबति । 'चूपतीति' **माठरः** । **मनाक्** ईषत् । **स्फुरता** स्फुटीभवता । **सर्पिष्मतः** घृताक्तस्य **भक्तस्य** अन्नस्य **गन्धेनानुसृतः** अन्वितः । **शाकानां** भक्ष्यपत्राणाम् । **पचनं** पाकः । **तस्यामोदः** परिमलः । '**परिस्तीर्यते** एधते' इति **श्रीनाथः** । 'कर्कन्धूर्बदरी' इति, 'गन्धः परिमलामोदौ' इति हारावलीविक्रमार्कौ ॥ 'हरिष्यामि सुधाशाकैः' इति **सप्तशत्याम्** ॥ १ ॥ स्वागतमनेकस्थविरेभ्यो जीर्णकूर्चेभ्योऽनध्यायकारणेभ्यः । 'शिष्टप्राप्तावनध्यायो बहूनामुत्सवस्ततः ।' इति समयपद्धतिः । ठेराणमिति देशीयश्शब्दः । 'कूर्चोऽस्त्री पुंसां चिबुककैशिके' इति

---

१ 'आअदं अणज्झाअकारणं सविसेसभूदं अज्ज जिण्णकुच्चाणं' (आगतमनध्यायकारणं सविशेषभूतमद्य जीर्णकूर्चानाम्) च–घ.

सौधातकिः—भो दण्डाअण किंणामहेओ एसो महन्तस्स ठविरैस-त्थस्स धुरंधरो अज्ज अदिही आअदो । भो दाण्डायन किंनामधेय एष महतः थविरसार्थस्य धुरन्धरोद्यातिथिरागतः ।

दाण्डायनः—विप्रहसनम् । नन्वयमृष्यश्रृङ्गाश्रमादरुन्धतीपुरस्कृतान् महाराजदशरथस्य दारानधिष्ठाय भगवान्वसिष्ठः प्राप्तः । तत्किमेवं प्रलपसि ।

सौधातकिः—हुं वसिट्टो । हुं वसिष्ठः ।

दाण्डायनः—अथ किम् ।

सौधातकिः—मए उण जाणिदं वग्घो वा विओ वा एसोत्ति । मया पुनर्ज्ञातं व्याघ्रो वा वृको वैष इति ।

दाण्डायनः—आः किमुक्तं भवति ।

सौधातकिः—जेणं परावडिदेण जेव्व सा वराई कविला कल्लाणी मडमडाइआ । येन परापतितेनैव सा वराकी कपिला कल्याणी मडमडायिता ।

दाण्डायनः—समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः । तं हि धर्मं धर्मसूत्रकाराः समामनन्ति ।

सौधातकिः—भो णिग्गिहीदोसि । भो निगृहीतोऽसि ।

दाण्डायनः—कथमिव ।

सौधातकिः—जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विससिदा । अज्ज जेव्व पंच्चाअदस्स राएसिणो जणअस्स भअवदा वम्मीइणा दहिमहूहिं जेव्व

संसारावर्तः । 'दाडी' इति महाराष्ट्राः । अणज्झाअ इत्यत्र 'ध्यह्योर्झः' इति झत्वम् ॥ भो दाण्डायन किन्नामधेय इदानीमेष महतः स्थविरसार्थस्य धुरन्धरोऽद्यातिथिरागतः । दण्डायनस्यापत्यं दाण्डायनिः । सार्थः सङ्घः । प्रहासं प्रकर्षेण हासम् । करोषीति शेषः । अधिष्ठायेति–दारानुद्दिश्य अधिष्ठानं नियन्तृत्वमधिगम्येति यावत् । हुं वसिष्ठः । मया पुनर्ज्ञातं व्याघ्रः कोऽप्येष इति । आः कोपे । किं प्रश्ने । येनागच्छतैव सा वराकी कपिला मड-

---

१ 'भण्डाअण' च–घ. २ 'इत्थिआसत्थस्स' क–न. ३ 'अज्ज णीरधारओ' च–घ. ४ 'वग्घो विअ एसोत्ति' न; 'व्याघ्रः कोप्येष इति' टी. ५ 'वेण' च–घ. ६ 'कल्लाणी धलागोडिअ' न. ७ एतन्नास्ति न–पुस्तके. ८ 'पचन्ति' न. ९ '°मेधिन इति हि' च–घ. १० 'पञ्चागदस्स' (पर्यागतस्य) क–च.

णिव्वत्तिदो महुवक्को । वच्छतरी उण विसज्जिदा । येनागतेषु वशिष्ठमिश्रेषु वत्सतरी विशसिता । अद्यैव प्रत्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिना दधिमधुभ्यामेव निर्वर्तितो मधुपर्कः । वत्सतरी पुनर्विसर्जिता ।

दाण्डायनः—अनिवृत्तमांसानामेवं कल्पमृषयो मन्यन्ते । निवृत्तमांसस्तु तत्रभवान् जनकः ।

सौधातकिः—किंणिमित्तं । किंनिमित्तम् ।

दाण्डायनः—स तदैव देव्याः सीतायास्तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः । तथास्य कतिपये संवत्सराश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य ।

सौधातकिः—तदो किंत्ति आअदो । ततः किमित्यागतः ।

दाण्डायनः—चिरन्तनप्रियसुहृदं भगवन्तं प्राचेतसं द्रष्टुम् ।

सौधातकिः—अवि अज्ज संवन्धिणीहिं समं संवुत्तं से दंसणं ण वेत्ति । अप्यद्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं न वेति ।

दाण्डायनः—संप्रत्येव भगवता वसिष्ठेन देव्याः कौसल्यायाः सकाशं भगवत्यरुन्धती प्रहिता यत्स्वयमुपेत्य वैदेहो द्रष्टव्य इति ।

सौधातकिः—जह एदे त्थविरा परप्परं मिलिदा तह अह्मे वि वडुहिं सह मिलिअ अणज्झाअमहुस्सवं खेलन्तो मणेम्ह । अह कुत्थ सो जणओ । (इति परिक्रामतः ।) यथैते स्थविराः परस्परं मिलितास्तथावामपि वटुभिः सह मिलित्वानध्यायमहोत्सवं खेलन्तो मानयावः । अथ क्व स जनकः ।

मडायिता । 'वराको नीचदीनयोः' इति **नानार्थमञ्जरी** । मडमडेतिशब्दानुकारः । उपाकृतेत्यर्थः । **आम्नायं** वेदम् । मो निगृहीतोऽसि । यदागतेषु वसिष्ठमिश्रेषु एवमद्यैव प्रत्यागताय राजर्षये भगवता वाल्मीकिना दधिमधुभिरेव निर्वर्तितो मधुपर्कः वत्सतरी पुनर्विसर्जिता । **मिश्रशब्दः** पूजायाम् ॥ निवृत्तमांसो निर्मांसो वृत्तमांसस्तु मांसलः ।' इति, 'कल्पः स्याद्विधिः' इति **केदारकपिलौ** । किंनिमित्तम् । 'स तु वैखानसो यः स्याद्युक्ताचारो जितेन्द्रियः ।' इत्यमरमाला । ततः किमित्यागतः । **ततः** चन्द्रद्वीपतपोवनादपि । अद्य संबन्धिनीमिस्समं निर्वृत्तमस्य दर्शनं न वेति । यथैतेसर्वे स्थविराः परस्परं मिलिताः तथा वयमपि वटुकैः सह मिलिताः अनध्याय-

---

१ 'व्याहरन्ति केचित्' न. २ 'संभावेम्ह' (संभावयावः) क-च-घ. ३ 'अह...जणओ' इत्येतन्नास्ति क-च-व-पुस्तकेषु.

दाण्डायनः—तथायं ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतसवसिष्ठावु-पास्य संप्रत्याश्रमस्य बहिर्वृक्षमूलमधितिष्ठति । य एषः

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते ।
अन्तःप्रसृप्तदहनो जरन्निव वनस्पतिः ॥ २ ॥

(इति निष्क्रान्तौ ।)

मिश्रविष्कम्भः ।

[ततः प्रविशति जनकः ।]

जनकः—अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।
पटुर्धारावाही नव इव चिरेणापि हि न मे
निकृन्तन्मर्माणि क्रकच इव मन्युर्विरमति ॥ ३ ॥

कष्टं एवं नाम जरया दुःखेन च दुरासदेन भूयः पराकसान्तपनप्रभृतिभिस्तपोभिरात्तरसधातुरनवष्टम्भो नाद्यापि मम दग्धदेहः पतति । अन्धतामिस्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते । अनेकसंवत्सरातिक्रमेऽपि प्रतिक्षणपरिभावनास्पष्टनिर्भासः

होत्सवं खेलन्तो मानयामः । अथ क्व स जनकः । तथा अनिर्वचनीय इत्यर्थः । पुराणं अनादि च तत् ब्रह्म वेदः । 'वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः ॥ **हृदि नित्यानुषक्तेनेति** ॥ २ ॥ **अन्तः** कोटरान्तरे । **जरन्** जीर्णः । 'तैरपुष्पाद्वनस्पतिः' इत्यमरः ॥ २ ॥ **इति मिश्रविष्कम्भः** ॥ 'उदात्तनीचपात्रोक्तौ मिश्रविष्कम्भ उच्यते' इति रूपकादर्शोक्तेः ॥ **अपत्ये यत्तादृगिति** ॥ ३ ॥ **अपत्ये** सीतायाम् । **दुरितं** अपवादरूपं पापम् । **तेन** पापेन **विषक्तः** विशेषेण सक्तः । **पृथुः** महान् । **धारावाही** अविच्छिन्नधारः । अत एव **चिरेणापि** बहुकाले गतेऽपि **नवः इव** स्थितः । **क्रकचः** 'करवत' इति महाराष्ट्राः । **मन्युः** न विरमति हि । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः ॥ ३ ॥ एवं नाम कष्टमिति वाक्यखण्डः । **दुरासदं** दुःखविशेषणम् । स्वयं स्फीतं यथा तथा **पराकसान्तपनप्रभृतिभिः** कृच्छ्ररूपैस्त**पोभि**रपि उपलक्षित इत्यर्थः । **'रसा** रक्तादयः' इति, 'इन्द्रियाणि पृथिव्यादिपञ्चभूतानि धातवः' इति, 'अवष्टम्भाश्रयाधाराः' इति रुद्रशाश्वतहेमचन्द्राः ।

---

१ 'तदयं' क–घ–व. २ 'ज्वलन्निव' प–घ. ३ 'तपोभिः शोषितान्तःशरीरधातोरवष्टम्भ एव महानपापि...न पतति' न; 'धातुरनुपयुज्यमानः' प–घ. ४ 'लोकाः प्रेत्य तेभ्यः' न.

प्रत्यग्र इव न मे दारुणो दुःखसंवेगः प्रशाम्यति । अयि मातर्देवयजनसंभवे सीते ईदृशस्ते निर्माणभागः परिणतो येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते । हा पुत्रि भगवति वसुन्धरे सत्यमतिदृढासि ।

अनियतरुदितस्मितं विराज-
त्कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमंजु जल्पितं ते ॥ ४ ॥

त्वं वह्निर्मुनयो वसिष्ठगृहिणी गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः ।
विद्यां वागिव यामसूत भवती तद्वत्तु या दैवतं
तस्यास्त्वद्दुहितुस्तथा विशसनं किं दारुणेऽमृष्यथाः ॥५॥

(नेपथ्ये) इत इतो भगवतीमहादेव्यौ

जनकः—(दृष्ट्वा) अये गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती । (उत्थाय) कां पुनर्महादेवीत्याह । (निरूप्य) हा हा कथमियं महाराजदशरथस्य धर्मदाराः प्रियसखी मे कौसल्या । क एतत्प्रत्येति सैवेयमिति

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा ।

तथा च सुखलेशाभावाद्दुःखास्पदं देहः पतत्विति भावः ॥ ननु आत्मघातः क्रियतामत आह–अन्धेति । 'इतीत्थमेवमित्येवम्' इति चक्षूरूपः । प्रतिक्षणं परिभावनायाः तिरस्कारस्य । स्पष्टनिर्भासः अवभासः यस्मात् । प्रत्यग्रः नूतनः । भागः अंशः । येन कारणेन । अनियतमिति ॥ ४ ॥ कुड्मलाः मुकुलाः । कमलकं स्वार्थे कः । सरसिजं इति वा पाठः ॥ ४ ॥ दृढा निष्ठुरा ॥ त्वमिति ॥ ५ ॥ यदि संभावनायाम् । कुलगुरुर्वसिष्ठः । वाक् सरस्वती । तथा विशसनं मारणप्रत्याम्नायपरित्यागमित्यर्थः । अमृष्यथाः असहथाः इति यावत् ॥ ५ ॥ भगवती च देवी च भगवतीदेव्यौ । 'देवी कृताभिषेकायाम्' इत्यमरः । महादेवी इति भ्रान्तः पाठः । 'जगन्माता महादेवी शर्वाणी त्रिपुरेश्वरी' इत्यागमतन्त्रोक्त्या महादेवीति नाम्नः परदेवतायामेवोचिततया अन्यत्र संभवेऽपचारसंभवात् । 'पुंभून्नि दाराः' इत्यमरः । प्रत्येति विश्वसिति ॥ आसीदियं दशरथस्येति ॥

---

१ 'मुग्ध' व–घ. २ 'शुद्धिं गतायाः' न. ३ 'एतां' न–क.

कष्टं वतान्यदिव दैववशेन जाता
　　दुःखात्मकं किमपि भूतमहो विपाकः ॥ ६ ॥
य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः ।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम् ॥ ७ ॥
(ततः प्रविशत्यरुन्धती कौसल्या कञ्चुकी च ।)

अरुन्धती--ननु ब्रवीमि द्रष्टव्यः स्वयमुपेत्यैव वैदेह इत्येष वः कुलगुरोरादेशः । अत एव चाहं प्रेषिता । तत्कोऽयं पदे पदे महाननध्यवसायः ।

कञ्चुकी--देवि संस्तभ्यात्मानमनुरुध्यस्व भगवतो वसिष्ठस्यादेशमिति विज्ञापयामि ।

कौसल्या--ईरिसे काले मिहिलाहिवो मए दिट्ठव्वो त्ति समं जेव्व सव्वाइं दुक्खाइं समुब्भवन्ति । ता ण सक्कुणोमि उव्वट्टमाणमूलबन्धणं हिअअं पज्जवत्थावेदुम् । ईदृशे काले मिथिलाधिपो मया द्रष्टव्य इति सममेव सर्वाणि दुःखानि समुद्भवन्ति । तन्न शक्नोम्युद्वर्तमानमूलबन्धनं हृदयं पर्यवस्थापयितुम् ।

अरुन्धती--अत्र कः सन्देहः ।

सन्तानवाहीन्यपि मानुषाणां
　　दुःखानि सम्बन्धिवियोगजानि ।

॥ ६ ॥ **पदेन** कलङ्केन । **कष्टं** खेदकारि । **चिन्तात्मकं** चिन्तास्वरूपम् । **अन्यत्** जगद्विलक्षणम् । **किमपि भूतं** जन्तुरिव जाता बतेत्यर्थः । 'कष्टं त्रिषु स्यात्खेदकारिणि' इत्यमरमाला । अत एव 'कष्टा रन्ध्रव्यथा कष्टश्च' इति **मुरारिः** । 'चिन्ता हृदयसन्तापः' इति, 'भूतं क्ष्मादौ च जन्तौ च' इति, 'बतानुकम्पने' इति हैमविश्वहलायुधाः । **अहो विपाकः** विरुद्धपरिणाम इति यावत् । अत्र बुधाबुधास्तावदवगमनभ्रान्तिभ्यां शिरसि दोलायन्ते ॥ ६ ॥ **य एव मे जन इति** ॥ ७ ॥ जनः कौसल्या । 'स्त्रीपुंसौ कथयेज्जनः' इति **काव्यदीपिकायां दण्डी** व्याजहार ॥ ७ ॥ **गुरोर्वसिष्ठस्य** । **अध्यवसायः** निश्चयः । **पदे पदे** इत्यनेन प्रतिक्षणं भिन्नभिन्न इति व्यज्यते । **संस्तभ्य** स्थिरीकृत्य । **अनुरुध्यस्व** अनुवर्तस्व ॥ ईदृशे काले मिथिलाधिपो मया द्रष्टव्य इति सममेव सर्वदुःखानि समुद्भवन्ति । तस्मान्न शक्नोमि उद्वर्तमानमूलबन्धनं हृदयं व्यवस्थापयितुम् । **समं** युगपत् । **उद्वर्तमानं** चेष्टमानं **मूल-**

---

१ 'विकारः' न.　२ इत्यस्मात्पूर्वं 'अयमपरः पापो दशाविपर्यासः' इत्यधिकं च-घ-पुस्तकयोः.　३ 'महानध्यवसायः' न-टी.　४ 'उव्वट्टमाण' च-घ.　५ 'सबन्धु' क-घ-च.

दृष्टे जने प्रेयसि दुःसहानि
स्रोतःसहस्रैरिव संप्लवन्ते ॥ ८ ॥

कौसल्या—कहं णु खु वच्छाए वहूए एवं गदे तस्सा पिदुणो राएसिणो मे मुहं दंसह्म । कथं नु खलु वत्साया वध्वा एवं गते तस्याः पित्रे राजर्षये मे मुखं दर्शयामः ।

अरुन्धती—एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥ ९ ॥

कौसल्या—एसो सो महाराअस्स हिअअणिव्विसेसो वच्छाए मे वहूए पिदा राएसी सीरद्धओ । हद्धी हद्धी सुमारिदह्मि अणिव्वेदरमणीए दिअसे । हा देव्व सव्वं तं णत्थि । एष स महाराजस्य हृदयनिर्विशेषो वत्साया मे वध्वाः पिता राजर्षिः सीरध्वजः । हा धिक् हा धिक् स्मारितास्मि अनिर्वेदरमणीयान्दिवसान् । हा दैव सर्वं तन्नास्ति ।

जनकः—(उपसृत्य) भगवत्यरुन्धति वैदेहः सीरध्वजोऽभिवादयते ।

बन्धनं गर्भग्रन्थिः यस्य । मूलबन्धनं 'कालिज' इति **महाराष्ट्राः** ॥ **सन्तानवाहीन्यपीति** ॥ ८ ॥ सन्तानं परम्परां दैर्घ्यं वा वहन्ति धरन्ति **सन्तानवाहीनि । सम्बन्धिनो** बान्धवाः । **स्रोतसां** स्रोतोऽम्बुसरणानाम् । 'पाझर' इति **महाराष्ट्राः । संप्लवन्ते** प्रवहन्तीति यावत् ॥ ८ ॥ कथं वत्साया मे वध्वा एवं गते तस्याः पित्रे राजर्षये मुखं दर्शयामः । 'वधूः स्नुषा' इति **शब्दमाला । गते** सतीत्यर्थः । दर्शयाम इति निर्वेदाद्बहुवचनम् । अत एव 'वयं तत्त्वान्वेषात्' इत्यसंख्याख्यात**शाकुन्तले** ॥ **एष वः श्लाघ्य इति** ॥ ९ ॥ 'वधूवराणां पितरो मिथस्सम्बन्धिनो मताः' **इत्यगस्त्यः । जनकानां** राज्ञाम् । उद्वहतीत्युद्वहः **कुलस्य- उद्वहः** श्रेष्ठः । 'उद्वहः श्रेष्ठधुर्ययोः' इति **यादवः । ब्रह्मणः** तत्त्वस्य **पारायणं** उपदेशम् । **जगौ** चकार इति लाक्षणिकोऽर्थः । 'पारायणं तद्वदुपदेशः पारायणं' इति पदमाला । व्यधादिति च पाठः ॥९॥ कथमेष स महाराजस्य हृदयनिर्विशेषो वत्साया मे वध्वाः पिता राजर्षिः सीरध्वजः । हा धिक् हा धिक् संस्मृतास्मि अनिर्वेदरमणीयान् दिवसान् । हा दैव सर्वमेव तन्नास्ति ॥ **यया पूतंमन्य इति** ॥ १० ॥ **यया**

---

१ 'हिअआणन्दो' (हृदयानन्दः) क–घ–च. २ 'संभाविदह्मि अणुवट्ठिदमहूसवे दिअहे' (सम्भावितास्म्यनुपस्थितमहोत्सवे दिवसे) च–घ.

यया पूतंमन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः ।
त्रिलोकीमङ्गल्यामवनितललीनेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥ १० ॥

अरुन्धती—अक्षरं ते ज्योतिः प्रकाशताम् । स त्वां पुनातु देवः परो रजसां य एष तपति ।

जनकः—आर्य गृष्टे अप्यनामयमस्याः प्रजापालकस्य मातुः ।

कञ्चुकी—(स्वगतम्) निरवशेषमतिनिष्ठुरमुपालब्धाः स्मः । (प्रकाशम्) राजर्षे अनेनैव मन्युना चिरपरित्यक्तरामभद्रमुखचन्द्रदर्शनां नार्हसि दुःखयितुमतिदुःखितां देवीम् । रामभद्रस्यापि दैवदुर्योगः कोऽपि । यत्किल समन्ततः प्रवृत्तबीभत्सकिंवदन्तीकाः पौरजानपदा नाग्निशुद्धिमनल्पकाः प्रतियन्तीति दारुणमनुष्ठितं देवेन ।

जनकः—(सरोषम्) आः कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने । कष्टमेवंवादिना जनेन रामभद्रपरिभूता अपि वयं पुनः परिभूयामहे ।

अरुन्धती—(निश्वस्य ।) एवमेतत् । अग्निरिति वत्सां प्रति परिलघून्यक्षराणि । सीतेत्येव पर्याप्तम् । हा वत्से

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति ।

भक्त्या उपसा च । आत्मानं पूतं मन्यते पूतंमन्यः । महसः ब्रह्मवर्चसस्य दीप्तेश्च । ते तव पतिः वसिष्ठः । अतिशयेन विशेषेण गुरुः गुरुतमः । त्रिलोक्याः मङ्गले साधुः मङ्गल्या तां भगवतीं त्वामित्यर्थः । 'स्त्रीनपुंसकयोरुपः' इति लिङ्गनिर्णयः । श्लोकोऽयं यथाकथञ्चिदुपःपक्षेऽप्युन्नेयः ॥ १० ॥ अक्षरं क्षराद्भिन्नम्, ज्योतिः सूर्यः । भङ्ग्यन्तरेणाह स इति । रजसां रजोगुणानाम् परः शत्रुः उपलक्षणमेतत् । तमसां चेति भावः । तथा च दूरतरः परिशेषात् सत्त्वैकनिष्ठ इति फलितोऽर्थः । प्रजापालकस्य मातुरस्या इत्यन्वयः । नृपापवादकल्पकप्रजापालक इति परिहासोक्तिः । निरवशेषं निश्शेषं अतिनिष्ठुरं च यथा तथा । मन्युना कोपेन । दैवदुर्योगः ग्रहपीडा । अत एव 'तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः' इति पौराणिकाः । प्रतीतिं विश्वासविषयां कुर्वन्तीत्यर्थः । दारुणं कर्म इति शेषः । परित्याग इति यावत् । परि-

---

१ 'माङ्गल्याम्' न-क. २ 'लोलेन' व-घ. ३ 'परं' व-घ. ४ 'परोरजाः' व-घ. ५ 'अपि कुशलम्' व-घ. ६ 'गल्पकाः' व-घ. ७ 'जनमति' व-घ.

शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥ ११ ॥

कौसल्या—अहो उम्मीलन्ति विअ वेअणाओ। अहो उन्मीलन्तीव वेदनाः। (इति मूर्छति)

जनकः—हा कष्टं किमेतत्।

अरुन्धती—राजर्षे किमन्यत्।

स राजा तत्सौख्यं स च शिशुजनस्ते च दिवसाः
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम्।
विपाके घोरेऽस्मिन्नथ खलु विमूढा तव सखी
पुरंध्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥ १२ ॥

जनकः—हन्त हन्त सर्वथा नृशंसोऽस्मि संवृत्तः। यश्चिरस्य दृष्टान्प्रिय सुहृदः प्रियदारान्न स्निग्धं पश्यामि।

स सम्बन्धी श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं
स चानन्दः साक्षादपि च निखिलं जीवितफलम्।
शरीरं जीवो वा यदधिकमतोऽन्यत्प्रियतरं
महाराजः श्रीमान्किमिव मम नासीद्दशरथः ॥ १३ ॥

भूताः सहसा परित्यागेनेति भावः ॥ शिशुर्वा शिष्या वेति ॥११॥ तथा दूरे इत्यर्थः। विशुद्धेस्तूत्कर्षः कर्ता। त्वयि विषये। 'भक्तिश्च निश्चय' इति त्रिकाण्डी। स्त्रैणं स्त्रीत्वम्। 'स्त्रैणं स्याद्भाववृन्दयोः' इति कपिलः। स्थानं आस्पदम्। गुणिनि गुणभाजि प्राणिनि। इदं सप्तमी सीतां प्रति संबोधनं च। लिङ्गं स्त्रीपुंनपुंसकम्। वयः इति 'तेजसां हि न वयस्समीक्ष्यते' इत्यस्य च्छायानुकरणमेतत् ॥ ११ ॥ अह्मो उन्मीलन्तीव वेदनाः ॥ स राजा तदिति ॥ १२ ॥ राजा दशरथः। आविर्भूतं चित्तारूढमिति यावत्। पुरन्ध्रीणां कुटुम्बिनीनाम् ॥ १२ ॥ 'चिरस्याद्याश्चिरार्थकाः' इत्यमरः। स सम्बन्धी श्लाघ्य इति ॥ १३ ॥ सुहृदः दशरथस्य असौ कौसल्या। साक्षात् प्रत्यक्षः। निखिलमिदमिति शेषः। जीवः असुधारणम्। अतः जीवादपीत्यर्थः। महाराजः इति प्रथमैकवचनम्। किमिव नासीत् पूर्वोक्तं सर्वम-

---

१ 'जगतः' घ. २ 'समुन्मूलअन्तीव' (समुन्मूलयन्तीव) न. ३ 'अस्मिन्न खलु न विमूढा' न; 'अस्मिन्नु खलु' च–घ. ४ 'दारानस्निग्ध इव' न. ५ 'प्रियतमः' च–घ.

कष्टमियमेव सा कौसल्या ।

यदस्याः पत्युर्वा रहसि परमं दूषितमभू-
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः ।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत्स्मृत्वा दहति यदवस्कन्द्य हृदयम् ॥ १४ ॥

अरुन्धती—हा कष्टम् । अतिचिरनिरुद्धनिःश्वासनिष्यन्दं[1] हृदयमस्याः ।

जनकः—हा प्रियसखि । (इति कमण्डलूदकेन सिञ्चति ।)

कञ्चुकी—सुहृदिव प्रकटय्य सुखप्रदः[2]
प्रथममेकरसामनुकूलताम् ।
पुनरकाण्डविवर्तनदारुणो
विधिरहो[3] विशिनष्टि मनोरुजम् ॥ १५ ॥

कौसल्या—(आश्वस्य) हा वच्छे जाणइ कहिं सि । सुमरामि दे णवविवाहलच्छीपरिग्गहेक्कमण्डनं पप्फुरन्तमुद्धविहसिदं मुद्धमुहपुण्डरीअं ।

प्यासीदेवेत्यर्थः ॥ १३ ॥ यदस्याः पत्युर्वेति ॥ १४ ॥ अस्याः पत्युश्चेति ज्ञेयम् । परमं अधिकम् दूषितं प्रणयकलहः । उपालम्भस्य गर्हणायाः । विधिः समाधानप्रकारः मदधीनः ममायत्तः तत् चरितमिति शेषः । यच्चरितं कर्तृ, अवस्कन्द्य अभिनिपत्य ॥ १४ ॥ हा कष्टमिति खेदातिशये । 'हा कष्टमस्मिन् जने' इत्यसद्व्याख्यातभोजचम्पौ । चिरनिरुद्धः निश्वासस्य निष्यन्दः निर्गमः यस्मिन् ॥ सुहृदिव प्रकटय्येति ॥ १५ ॥ प्रथमं आदौ । एकः मुख्यः रसः अभिनिवेशः प्रीतिर्वा यस्याम् । अनुकूलतां सर्वशुभानुकूल्यम् । प्रकटय्य प्रकटीकृत्य । पुनः पश्चात् । अकाण्डे अकाले अनुकूलताया निवर्तने प्रतिकूलतापादनविषये दारुणः । विशिनष्टि परिशिष्टां करोतीति यावत् । विधिर्दैवम् । 'पुनः पश्चात्' इति समारनिघण्टुः ॥ १५ ॥ वत्से जानकि कासि कासि । स्मरामि ते नवविवाहलक्ष्मीपरिग्रहैकमङ्गलं चटुलमुखपुण्डरीकम् । अर्हत्कौमुदीचन्द्रचन्द्रिकासुन्दरैरङ्गैः पुनरप्युद्योतयोत्सङ्गम् । सर्वथा महाराज एवं भणति, एषा रघुकुलमहत्तराणां वधूरस्माकं पुनर्जनक (सुता) दुहितैव । पुण्डरीकमिति कथनं पुरुषेच्छायोग्यवयस्सूचकम् । 'यौवने पुरुषेच्छायां विरहे चाङ्गपाण्डिमा' इति सार्वभौमः । अत एव 'पाण्डि(म ?)निमग्नं वपुः' इति अस्मद्व्याख्यातविद्धसालभञ्जिका-

---

१ 'निःश्वासनिष्ठुरं' व—घ. २ 'सुखप्रदाम्' न. ३ 'परिशिनष्टि विधिर्मनसो रुजम्' न.

आप्फुरन्तचन्दचन्दिआसुन्दरेहिं अङ्गेहिं पुणो वि मे जादे उज्जोएहि उच्छ-ङ्गम्। सव्वदा महाराओ भणादि। एसा रहुउलमहत्तराणं वहू अह्माणं दु[1]जणअसुदा दुहिदेव्व। हा वत्से जानकि कुत्रासि। स्मरामि ते नवविवाहल-क्ष्मीपरिग्रहैकमण्डनं प्रस्फुरच्छुद्धविहसितं मुग्धमुखपुण्डरीकम्। आस्फुरच्चन्द्रच-न्द्रिकासुन्दरैरङ्गैः पुनरपि मे जाते उद्द्योतयोत्सङ्गम्। सर्वदा महाराजो भणति एषा रघुकुलमहत्तराणां वधूरस्माकं तु जनकसुता दुहितैव।

कञ्चुकी—यथाह देवी।

पञ्चप्रसूतेरपि तस्य राज्ञः
प्रियो विशेषेण सुबाहुशत्रुः।
वधूचतुष्केऽपि यथैव[2] शान्ता
प्रिया तनूजास्य तथैव[3] सीता ॥ १६ ॥

याम्। अर्हन्त्यः पूज्याः अभिनन्दनीयाः याः कौमुदीचन्द्रचन्द्रिकाः तद्वत् सुन्दरैः लोभनीयैः, 'पूर्णिमायामयुग्मस्थानजनौ कौमुदी मता। शेष-यामद्वयस्था या ज्योत्स्ना सा चन्द्रिकोच्यते ॥' इति साहित्यमण्डने श्रीनाथः। चन्द्रः कर्पूरः। एतेन विविधपरिमलाङ्गी नायिकेयं सूचिता। 'सा नानादिव्यगन्धिनी' इति पद्मिनीप्रकरणे। पाटलगन्धीत्यान्ध्रपदे क्षेत्रियश्च। मध्ये चन्द्रपदनिवेशः धोरणीसन्दर्भाय। च(न्दि)आ इति कवेः प्रमादः। 'चन्द्रिकायां म' इति विशेषानुशासनेन चन्दिमा इति वक्त-व्यस्य साधीयस्त्वात्। 'चन्दिमासुन्दरेहिं' इत्यविचारितरमणीयः पाठः। पौनरुक्त्यासङ्गतिक्रोडीकृतत्वात्। महत्तराणां पूर्वेषाम्। वधूः स्नुषा। अस्मिन् घट्टे केचिदव्युत्पन्नाः कूपपतिता इव रङ्ग(ट?)त्कुक्कुटाः कण्ठघोषातिशयम-भिनयन्तीति दिक् ॥ दुहितृत्वं समर्थयते पञ्चप्रसूतेरपीति ॥ १६ ॥ पञ्च प्रसूतयः प्रसवाः यस्य सीतया सहेति भावः ॥ 'औरसो मानितः क्रीतः पोषितः स्थापितोऽवितः। गृहीतो विधिनेत्याद्याः सद्भिरुक्ताः प्रसूतयः ॥' इति पुराणपद्धतेः। पञ्चप्रसूतेः विस्तृतप्रसवस्येति चार्थः। 'विस्तारे पञ्चशब्दः स्यात्संख्याभेदे प्रतारणे। व्यक्तौ च' इति धनञ्जयः ॥ सुबाहुशत्रुः रामः। वधूचतुष्के स्नुषाचतुष्टयेऽपि, 'चतुष्कं च चतुष्टयम्' इति द्विरूपः। यथा सीतेव मान्या तथैवास्य दशरथस्य सीतैवेति परामृश्यते। प्रिया तनूजा दुहितेत्यर्थः। तथा च दशरथस्य पुत्रेषु यथा रामः प्रियः तथा स्नुषासामान्या

---

१ 'जणअसंबन्धेण दुहिदिआ जेव्व' च—घ. २ 'यथा हि' च; 'तथैव नान्या' ख.
३ 'यथैव' न.

जनकः—हा प्रियसख महाराज दशरथ एवमसि सर्वप्रकारहृदयङ्गमः। कथं विस्मर्यसे।

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि।
त्वं कालेन तथाविधोऽप्यपहृतः सम्बन्धबीजं च त-
द्धोरेऽस्मिन्मम जीवलोकनरके पापस्य धिग्जीवितम् ॥१७॥

कौसल्या—जादे जाणइ किं करोमि। दिढवज्जलेवपडिबद्धणिच्चल हद-जीविदं मं मन्दभाइणीं ण पडिच्चअदि। जाते जानकि किं करोमि। दृढवज्र-लेपप्रतिबद्धनिश्चलं हतजीवितं मां मन्दभागिनीं न परित्यजति।

अरुन्धती—आश्वसिहि राजपुत्रि बाष्पविश्रामोऽप्यन्तरे कर्तव्य एव। अन्यच्च किं न स्मरसि यदवोचदृष्यशृङ्गाश्रमे युष्माकं कुलगुरुर्भवितव्यं तथे-त्युपजातमेव किं तु कल्याणोदर्कं भविष्यतीति।

कौसल्या—कुदो अदिक्कन्दमणोरहाए मह एदं। कुतोऽतिक्रान्तमनोर-थाया ममैतत्।

अरुन्धती—तत्किं मन्यसे राजपुत्रि मृषोद्यं तदिति। न हीदं क्षुत्रिये-येऽन्यथा मन्तव्यम्। भवितव्यमेव तेन।

सीता। पद्मप्रसूतेरित्यत्र पद्मशब्दार्थद्वयचमत्कारेण पद्धतिन्यायबलेन च प्रिया दुहितैवेति भावः। अत्र पद्ये बहवो भ्रमन्ति, शिष्यगुणग्राहिणः प्रमाणम्॥१६॥ कन्यायाः किल पूजयन्तीति॥ १७॥ सम्बन्धे आवयोरिति शेषः। तत् पूजनम्। विपरीतं व्यत्यस्तमेव। कथमित्यत आह—अभूदिति। आराधनं त्वत्कर्तृकं पूजनम्। मयि अभूत्। बीजं कारणं च अपहृतमि-त्यर्थः। तत् प्रसिद्धं सीतेत्यर्थः। बीजमिति ध्वनिः। तत् तस्मात्। घोरे इति चतुर्थचरणेनान्वयो योज्यः। जीवलोक एव नरकः॥ १७॥ जाते जानकि किं करोमि। दृढवज्रलेपपरिबद्धमिव निश्चलं हतजीवितं मां मन्दभागिनीं (न) परित्यजति। विश्रामः विरतिः। अन्तरा मध्ये। कल्याणं उदर्कः यस्मिन् तत्। भवितव्यमित्यस्यानुषङ्गः। 'उदर्कः फलमुत्तरम्' इत्यमरः। कुतोऽतिक्रा-

---

१ 'विधोऽप्यपहृतः' न-घ. २ '°लेवपडिबद्धणिच्चलं' क-घ-न. ३ 'कुलगुरुस्तदुपजातमेव' च-घ. ४ 'भअवदि अदिक्कन्दो मणोरहो' (भगवति, अतिक्रान्तो मनोरथः) च-घ. ५ इदं नास्ति न-क-पुस्तकयोः.

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयोऽभूत् ।
भद्रा ह्येषां वाचि लक्ष्मीर्निषिक्ता
नैते वाचं विप्लुतार्थां वदन्ति ॥ १८ ॥

(नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ।)

जनकः—अये अद्य खलु शिष्टानध्ययन इत्यस्खलितं खेलतां बटूनां कलकलः ।

कौसल्या—सुलहसोक्खं दाव बालत्तणं होदि । (निरूप्य ।) अम्महे एदाणं मज्झे को एसो रामभद्दस्स कोमारलच्छीसरिसेहिं सावट्टम्भेहिं मुद्धललिदेहिं अङ्गेहिं अम्हाणं लोअणाइं सीअलावेदि । सुलभसौख्यं तावत् बालत्वं भवति । अहो एतेषां मध्ये क एष रामभद्रस्य कौमारलक्ष्मीसदृशैः सावष्टम्भैर्मुग्धललितैरङ्गैरस्माकं लोचनानि शीतलयति ।

अरुन्धती—(अपवार्य सहर्षबाष्पम् ।) इदं नाम तद्भागीरथीनिवेदितरहस्य कर्णामृतम् । न त्वेवं विद्मः कतरोऽयमायुष्मतोः कुशलवयोरिति । (प्रकाशम् ।)

न्तमनोरथाया ममैतत् । 'क्षत्रिया क्षत्रियाण्यपि' इत्यमरः ॥ **आविर्भूतज्योतिषा**मिति ॥ १८ ॥ **आविर्भूतं ज्योतिः** परं ब्रह्म येषु येभ्यो वा । **व्याहाराः** उक्तयः । **भद्रा** शुभा । **लक्ष्मी**र्मङ्गलदेवतेत्युपलक्षणम् । सर्वदेवता इति सिद्धान्तः । 'अपि वा जीवितं जह्याम्' इति रामः । 'विप्रप्रसादाद्धरणीधरोऽहम्' इति, 'विजितेयं मही कृत्स्ना ब्राह्मणानां प्रसादतः ।' इति च कृष्णः । 'मूलं कृष्णो ब्रह्मणो ब्राह्मणाश्च' इति **महाभारते** । 'स मन्त्रो ब्राह्मणाधीनः' इत्यागमेषु । 'एता एव देवताः' इति श्रुतिश्च । इति दिक् ॥ **निषिक्ता** नियतं यथा तथा सिक्तेत्यर्थः । अनेन स्वतस्सिद्धेति विभाव्यते । **विप्लुतः** निरस्तः **शब्दस्यार्थः** फलपरिणामः यस्याम् ॥ १७ ॥ न विद्यते अध्ययनं यस्मिन् । **अस्खलितं** अकुण्ठितं यथा तथा । सुलभसौख्यमिदानीं बालत्वं भवति । अह्महे एतेषां मध्ये क एष रामभद्रस्य कौमारलक्ष्मीसदृशैः सविष्टम्भैः मुग्धललितैरङ्गैर्दारकोऽस्माकं लोचनानि शीतलयति ॥ 'अवष्टम्भस्तु संस्थानवि-

---

१ 'विप्लुतां व्याहरन्ति' ब–घ. २ 'शिष्टानध्यायः' क–घ. ३ 'उद्धतं' क–ख–ब. ४ 'निवेदितं रहस्यकर्णामृतम्' न.

कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
बटुपरिषदं पुण्यश्रीकः श्रियेव[1] सभाजयन् ।
पुनरपि शिशुर्भूतो[2] वत्सः स मे रघुनन्दनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥ १९ ॥

कञ्चुकी—नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये ।

जनकः—एवमेतत् । तथा हि

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोक[3]पवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।
मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठकं
पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः ॥ २० ॥

भगवत्यरुन्धति किमुत्प्रेक्षसे कुतस्त्योऽयमिति ।

अरुन्धती—अद्यैवागता वयम् ।

जनकः—आर्य गृष्टे अतीव मे कौतुकं वर्तते तद्भगवन्तं वाल्मीकिमेव गत्वा पृच्छ । इमं च बालकं ब्रूहि । वत्स केऽप्येते प्रवयसस्त्वां दिदृक्षव इति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

कौसल्या—किं मण्णेध एव्वं भणिदो आअमिस्सदि त्ति । किं मन्यध्वे एवं भणित आगमिष्यतीति ।

जनकः—भिं[4]घेत वा सद्वृत्तमीदृशस्य निर्माणस्य ।

शेषे गर्वतोपययोः' इति समासः । मुग्धललितैः मनोज्ञविलासैः । सहर्षेति—लावण्यदर्शनेन हर्षः माद्य (?) कपोलश्च इत्युत्कण्ठा ॥ कुवलयदलस्निग्ध इति ॥ १९ ॥ स्निग्धः मसृणः । श्रिया शोभया । सभाजयन् आनन्दयन् । अमृतमयाञ्जनम् ॥ १९ ॥ चूडाचुम्बितकङ्कपत्रमिति ॥२०॥ चूडा मौलिः चुम्बितः स्पृष्टः यैस्ते चूडाचुम्बिताः तादृशाः कङ्कपत्राः बाणाः यस्मिन् । 'अभितः पार्श्वयोः' इति नन्दी । भस्म भसितं स्तोकः अल्पश्चासौ पवित्रः व्याघ्रनखः ताभ्यां लाञ्छितं 'उभयं बटुरक्षकम्' इत्यनुभवसिद्धम् । 'पवित्रं स्यात्पुंसि व्याघ्रनखे' इति धनञ्जयः । रुरुः कृष्णसारः तत्संबन्धिनीं रौरवीं उत्तरीयार्थमिति भावः । मेखलया च 'सप्तरज्जौ च मेखला' इति पद्ममाला । 'पीतमाञ्जिष्ठौ' इति कपिलः । पैप्पलः पिप्पलसंबन्धी 'क्षत्रियाणां तु पैप्पलः

---

१ 'श्रियेव' ग. २ 'भूत्वा' न. ३ 'स्तोम' प. ४ 'भिन्ते' म.

कौसल्या—(निरूप्य ।) कहं सविणअणिसामिदगिट्ठिवअणो विसज्जिदइसिदारओ इदोऽहिमुहं पसरिदो जेव्व सो वच्छो । कथं सविनयनिशामितगृष्टिवचनो विसर्जितर्षिदारक इतोऽभिमुखं प्रसृत एव स वत्सः ।

जनकः—(चिरं निर्वर्ण्य ।) भोः किमप्येतत् ।

> महिम्नामेतस्मिन्विनयशिशुतामौग्ध्यमसृणो
> विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः ।
> मनो मे संमोहस्थिरमपि हरत्येष चलवा-
> नयोधातुं यद्वत्परिलघुरयस्कान्तशकलः ॥ २१ ॥

लवः—(प्रविश्य ।) अज्ञातनामकमाभिजनान्पूज्यानपि नः स्वतः कथमभिवादयिष्ये । (विचिन्त्य ।) अयं पुनरविरुद्धः प्रकार इति वृद्धेभ्यः श्रूयते । (सविनयमुपसृत्य ।) एष वो लवस्य शिरसा प्रणामपर्यायः ।

अरुन्धतीजनकौ—कल्याणिन्, आयुष्मान्भूयाः ।

कौसल्या—जाद चिरं जीव । जात चिरं जीव ।

अरुन्धती—एहि वत्स । (लवमुत्सङ्गे गृहीत्वात्मगतम् ।) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे सम्पूर्णः ।

कौसल्या—जाद इदो वि दाव एहि । (उत्सङ्गे गृहीत्वा ।) अम्महे ण केवलं दरविअसन्तणीलुप्पलसामलुज्जलेण देहबन्धेण कवलिदारविन्दकेसरकसाअकण्ठकलहंसणिणाददीहरदीहरेण सरेण अ रामभद्दं अणुहरदि । णं कठो-

---

इति स्मृतेः ॥ २० ॥ प्रवयस्तः वृद्धाः । किमन्यैः । एवं भणित आगमिष्यतीति । वृत्तं चरित्रम् । कथं सविनयनिशमितकञ्चुकिवचनः विसर्जिताशेषपरिसरदारकः इतोमुखं प्रसृत एव वत्सः । दारकाः बटवः । प्रसृतः प्रचलितः । निर्वर्ण्य दृष्ट्वा । भो इति मनः प्रति संबोधनम् ॥ महिम्नामेतस्मिन्निति ॥ २१ ॥ एतस्मिन् वटे (वटौ ?) शिशिरे कुसकर इति यावत् । मौग्ध्येन सौन्दर्येण । मसृणः स्निग्धः । विदग्धैः चतुरैः । नितरां ग्राह्यः निग्राह्यः वेद्यः । अविदग्धैः अचतुरैः, न वेद्य इत्यर्थः । महिम्नामतिशयः । किं तत आह—मन इति कर्म । 'प्रमादेऽपि च संमोहः' इति वररुचिः । अयोधातुं लोहधातुम् । परिलघुः सूक्ष्मः । शकलः खण्डः । 'यद्वत्तद्वद्यथा तथा' इति त्रिकाण्डशेषः । 'अयस्कान्तमणिशलाकिकेव लोहधातुम्' इति बाणकविकवनच्छायानुसरणमेतत् ॥ २१ ॥ अज्ञातानि नाम-

---

१ 'विसज्जिदासेसपरिसदारओ' न. २ 'शिशिरः' न. ३ 'संमोहःस्थिरं' च-व.

रकमलगब्भपम्हलो सरीरप्फंसो वि तारिसो जेव्व वच्छस्स । जाद पेक्खामि दाव दे मुहपुण्डरीअं । (चिबुकमुन्नमय्य निरूप्य सवाष्पाकूतम् ।) राएसि किं ण पेक्खसि णिउणं णिरूवजन्तं से मुहं वच्छाए वहूए मुहचन्देण संवदृदि जेव्व । जात इतोऽपि तावदेहि । अहो न केवलं दरविकसन्नीलोत्पलश्यामलोज्ज्वलेन देहबन्धेन कवलितारविन्दकेसरकषायकण्ठकलहंसनिनाददीर्घदीर्घेण स्वरेण च रामभद्रमनुहरति । ननु कठोरकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृश एव वत्सस्य । जात प्रेक्षे तावत्ते मुखपुण्डरीकम् । राजर्षे किं न प्रेक्षसे निपुणं निरूप्यमाणमस्य मुखं वत्साया वध्वा मुखचन्द्रेण संवदत्येव ।

जनकः—पश्यामि सखि पश्यामि ।

कौसल्या—अम्महे उम्मत्तीभूदं विअ मे हिअअं किंपि एदोमुहं विलवदि । अहो उन्मत्तीभूतमिव मे हृदयं किमपीतोमुखं विलपति ।

जनकः—

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
संपूर्णप्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा दैवं किमुत्पथैर्मम मनः पारिप्लवं धावति ॥ २२ ॥

कौसल्या—जाद अत्थि दे मादा सुमरसि वा तादं । जात अस्ति ते माता स्मरसि वा तातम् ।

लवः—नहि नहि ।

कौसल्या—तदो कस्स तुमं । ततः कस्य त्वम् ।

लवः—भगवतो वाल्मीकेः ।

कौसल्या—अयि जाद कहिदव्वं कहेहि । अयि जात कथयितव्यं कथय ।

क्रमाभिजात्यानि यैः येषां च परस्परमित्यर्थः । क्रमः परम्परा । 'आभिजात्यं तु वंशे च' इति लिङ्गानुशासनम् । प्रकारः विध्यन्तरम् । 'पर्यायोऽवसरे क्रमः' इत्यमरः ॥ जात चिरं जीव । जात इतोऽपि तावदेहि । अम्महे न केवलं दरविसष्टनीलोत्पलश्यामलोज्ज्वलेन देहबन्धेन कवलितारविन्दकेसरकषायकण्ठकलहंसघोषेण घर्घरानुनादनिर्भरदीर्घतरेण स्वरेण रामभद्रमनुसरति । क-

---

१ 'संपूर्णः प्रति०' न. २ 'देवि' न.

लवः—एतावदेव जानामि ।

(नेपथ्ये) भो भोः सैनिकाः । एष खलु कुमारश्चन्द्रकेतुराज्ञापयति न केनचिदाश्रमाभ्यर्णभूमय आक्रमितव्या इति ।

अरुन्धतीजनकौ—अये मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुरद्य द्रष्टव्य इत्यहो सुदिवसः ।

कौसल्या—वच्छलक्खणस्स पुत्तओ आणवेदित्ति अमिदबिन्दुसुन्दराइं अक्खराइं सुणीअन्दि । वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीत्यमृतबिन्दुसुन्दराण्यक्षराणि श्रूयन्ते ।

लवः—आर्य क एष चन्द्रकेतुर्नाम ।

जनकः—जानासि रामलक्ष्मणौ दाशरथी ।

लवः—एतावेव रामायणकथापुरुषौ ।

जनकः—अथ किम् ।

लवः—तत्कथं न जानामि ।

जनकः—तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः ।

लवः—ऊर्मिलायाः पुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः ।

अरुन्धती—(विहस्य ।) आविष्कृतं कथाप्रावीण्यं वत्सेन ।

जनकः—(विचिन्त्य ।) यदि त्वमीदृशः कथायामभिज्ञस्तद्ब्रूहि तावत्पृच्छामस्तेषां दशरथात्मजानां कियन्ति किंनामधेयान्यपत्यानि केषु केषु दारेषु प्रसूतानीति ।

लवः—नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्वः

जनकः—किं न प्रणीत एव कविना ।

लवः—प्रणीतो न प्रकाशितः । तस्यैव कोऽप्येकदेशः सन्दर्भान्तरेण[1] रसवानभिनेयार्थः कृतः । तं च स्वहस्तलिखितं मुनिर्भगवान्व्यसृजद्भगवतो भरतस्य मुनेस्तौर्यत्रिकसूत्रकारस्य ।

जनकः—किमर्थम् ।

लवः—स किल भगवान्भरतस्तमप्सरोभिः प्रयोजयिष्यतीति ।

जनकः—सर्वमिदमाकूततरमस्माकम्[2] ।

---

१ 'प्रबन्धान्तरेण' न. २ 'आकूतकरम्' ब–घ.

लवः—महती पुनस्तस्मिन्भगवतो वाल्मीकेरास्था। यतः केषांचिदन्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितम्। तेषामनुयात्रिकश्चापपाणिः प्रमादापनोदनार्थमस्मज्ज्याता प्रेषितः।

कौसल्या—जाद भादावि दे अत्थि। जात भ्रातापि तेऽस्ति।

लवः—अस्त्यार्यः कुशो नाम।

कौसल्या—जेट्ठोत्ति भणिदं होदि। ज्येष्ठ इति भणितं भवति।

लवः—एवमेतत्। प्रसवक्रमेण स किल ज्यायान्।

जनकः—किं यमजावायुष्मन्तौ।

लवः—अथ किम्।

जनकः—वत्स कथय कथाप्रबन्धस्य कीदृशः पर्यन्तः।

लवः—अलीकपौरापवादोद्विग्नेन राज्ञा निर्वासितां देवीं देवयजनसम्भवां सीतामासन्नप्रसववेदनामेकाकिनीमरण्ये लक्ष्मणः परित्यज्य प्रतिनिवृत्त इति।

कौसल्या—हा वच्छे मुद्धचन्दमुहि को दाणिं दे सरीरकुसुमस्स झत्ति देव्वदुव्विलासपरिणामो एकलिआए निवडिदो। हा वत्से मुग्धचन्द्रमुखि क इदानीं ते शरीरकुसुमस्य झटिति दैवदुर्विलासपरिणाम एकाकिन्या निपतितः।

ठोरः कमलगर्भपक्ष्मलः शिशिरस्पर्शोऽपि तादृश इति शेषः। तं एकदेशम्। आतङ्कः पीडा। तस्मिन् भरताचार्ये। आस्था अभिनिवेशः प्रीतिर्वा। अमीषां दृश्यमानानामिति ध्वनिः। आश्रमं उद्दिश्येति शेषः। आश्रमं प्रतीति वा पाठः। अनुयात्रिकः अनुप्रस्थानदक्षः। भ्राताऽपि तेऽस्ति। आर्यपदस्वारस्यादाह—जेट्ठ इति। ज्येष्ठ इति गणितं (भणितं ?) भवति। 'ज्येष्ठस्तु मासभेदे च पूर्वजे च' इति नन्दी। मासभेदे तु ज्येष्ठ एवेति केचित्। तन्न, त्रिज्येष्ठमित्यत्र विरोधात्। अत एव ज्येष्ठो ज्येष्ठश्चेति द्विरूपेभिधानात्। मासभेदे ज्येष्ठोऽपीति नन्दार्जुनो व्याचकारेति दिक्॥ 'परिपाटिरनुक्रमः' इत्यमरः। प्रसवक्रमात्, 'अनुजः पूर्वजो ज्येष्ठस्त्वनुजो यमलौ यमौ' इति वस्तुनिर्णयः। कथायाः चरितस्य। प्रबन्धः गु(म्फ)नम्। 'प्रबन्धो गुम्फने ग्रन्थे' इति शब्दमाला। पर्यन्तः पूर्तिः॥ हा वत्से मुग्धचन्द्रमुखि क इदानीं ते कुसुमभूतस्य शरीरस्य झटिति दैवदुर्विलासपरिणामः एकाकिन्या निपतितः। 'एकलिआ' इति

---

१ 'प्रमादच्छेदनार्थम्' न; 'अप्रमादार्थम्' घ. २ '°प्रपञ्चस्य' न. ३ 'नियान्' न. ४ 'पौरप्रवादोद्वेगेन' ब-घ.

जनकः—हा वत्से

नूनं त्वया परिभवं च वनं च घोरं
तां च व्यथां प्रसवकालकृतामवाप्य ।
क्रव्याद्गणेषु परितः परिवारयत्सु
संत्रस्तया शरणमित्यसकृत्स्मृतोऽस्मि ॥ २३ ॥

लवः—(अरुन्धतीं प्रति) आर्ये कावेतौ ।

अरुन्धती—इयं कौसल्या । अयं च जनकः ।

लवः—(सबहुमानखेदकौतुकं पश्यति ।)

जनकः—अहो निर्दयता दुरात्मनां पौराणाम् । अहो रामस्य राज्ञः क्षिप्रकारिता ।

एतद्वैशसवज्रघोरपतनं शश्वन्ममोत्पश्यतः
क्रोधस्य ज्वलितुं झटित्यवसरश्चापेन शापेन वा ।

कौसल्या—(सभयकम्पम्) भअवदि परित्ताहि परित्ताहि । पसादेहि कुविदं राएसिम् । भगवति परित्रायस्व परित्रायस्व । प्रसादय कुपितं राजर्षिम् ।

लवः—एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम् ।

अरुन्धती—राजन्नपत्यं रामस्ते पाल्याश्च कृपणा जनाः ॥ २५ ॥

देशीयशब्दः । 'एकली' इति महाराष्ट्राः । नूनं त्वया परिभवमिति ॥ २३ ॥ परिभवं परित्यागरूपतिरस्कारम् । क्रव्याद्गणेषु मांसाशनसंघेषु । चद्वयमधिकम् । कालेति ध्वनिः ॥ २३ ॥ कथाप्रविष्टाविति बहुमानः । कथं दीनाविति खेदः । दैवात्पश्यामीति कौतुकम् । क्षिप्रेति अविचार्य शीघ्रकारितेति यावत् ॥ एतद्वैशसवज्रघोरमिति ॥ २४ ॥ वैशसमेव वज्रं तस्य । घोरपतनं दारुणपातः । 'अप्रिये द्रोहे त्वपवादे च वैशसम्' इति सारस्वतः । शश्वत् मुहुः । उत्पश्यतः उत्प्रेक्षमाणस्य । विचारयत इति यावत् । मम क्रोधस्य चापेन शापेन वा करणेन झटिति ज्वलितुमवसरः समयः ॥ भगवति परित्रायस्व । प्रसादय कुपितं राजर्षिम् ॥ एतद्धि परिभूतानामिति ॥ २५ ॥ एतत् प्रदानमित्यर्थः । अपत्यं पुत्रः । यथा दशरथस्य सीता दुहिता तथा तव रामः पुत्र

---

१ 'नवं' ब-घ. २ 'स्मृतोऽहन्' न. ३ 'दुर्मर्यादता' च-घ. ४ 'धगित्यव०' क-घ-च. ५ एतदरुन्धतीवाक्यं ब-घ-पुस्तकयोः.

जनकः—शान्तं वा रघुनन्दने तदुभयं यत्पुत्रभाण्डं हि मे
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः॥ २४ ॥

(प्रविश्य ।) संभ्रान्ता बटवः—कुमार कुमार अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते सोऽयमधुनास्माभिः प्रत्यक्षीकृतः ।

लवः—अश्व इति पशुसमाम्नाये साङ्ग्रामिके च पठ्यते । तद्ब्रूत कीदृशः ।

बटवः—श्रूयताम् ।

पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रा-
न्किं वाऽऽख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥ २६ ॥

(इत्यजिने हस्तयोश्चाकर्षन्ति ।)

लवः—(सकौतुकापराधविनयम् ।) आर्याः पश्यत पश्यत । एभिर्नीतोऽस्मि । (इति त्वरितं परिक्रामति ।)

अरुन्धतीजनकौ—पूरयतु कौतुकं वत्सः ।

कौसल्या—अरण्णगब्भरूवालावेहिं तुह्मे तोसिदा अह्मे अ । भअवदि

इति भावः । 'कृपणः क्षुद्रः' इत्यमरः ॥ २५ ॥ शान्तं गतमिति यावत् । क्षान्तमिति च पाठः । न दधे न दधामि । यत् यस्मात् । तत् प्रसिद्धम् । उभयं सीतारामौ । मे मम । पुत्री च पुत्रश्च पुत्रौ तावेव भाण्डं पुत्रभाण्डम् । 'भाण्डं मूलवणिग्धने' इति कपिलः । वणिजा मूलधनं यथा रक्ष्यते तथा मया सीतारामौ रक्षणीयौ इति भावः । ननु अपवादकल्पकेषु जनेषु कोपो युक्त इत्याशङ्क्य सोऽपि दयनीय इत्यत्र हेतुमाह—भूयिष्ठेति । भूयिष्ठानि भूयांसि द्विजबालवृद्धविकलस्त्रैणानि यस्मिन् । विकलाः अङ्गहीनादयः । 'स्त्रैणं स्त्रीसमूहः' इति नन्दी ॥ २४ ॥ पशुसमाम्नाये पशुविधायकवेदे । साङ्ग्रामिके सङ्ग्रामसंबन्धिनि प्रकरणे इति शेषः । पश्चात्पुच्छं वहतीति ॥ २६ ॥ धूनोति कम्पयति । शष्पाणि बालतृणानि । आम्रमात्रान् आम्रप्रमाणान् । शकृत्पिण्डकान् मलगोलकान् ॥ २६ ॥ अश्वदर्शने कौतुकम्, सहसागमनप्रसक्तेरपराधः तत्क्षमापने वा सहजो वा विनयः । एवं सर्वतो यथोचितमूह्यम् ॥ एभिर्नीतोऽस्मीति छिद्रवत्कारेण सचमत्कारकथनाल्लवस्य गमने महानभिनिवेश इति बोध्यम् ॥ अरण्यगर्भा-

---

१ 'तत्पुत्र°' घ-ध. २ 'व्याख्यानैः' न. ३ 'महत्कौतुकं वत्सस्य' न. ४ 'अरण्ण...अह्मे अ' एतन्नास्ति क-घ-च-पुस्तकेषु.

जाणामि एदं अणालोअअन्ती वञ्चिदा विअ ता अण्णदो भविअ पेक्खम्ह दाव पलाअन्तं दीहाउम्। अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति जानाम्येतमनालोकयन्ती वञ्चितेव। तदन्यतो भूत्वा प्रेक्षामहे तावत्पलायमानं दीर्घायुषम्।

अरुन्धती—अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते।

(प्रविश्य।) **कञ्चुकी**—भगवान्वाल्मीकिराह ज्ञातव्यमेतदवसरे भवद्भिरिति।

जनकः—अतिगम्भीरमेतत्किमपि। भगवत्यरुन्धति सखि कौसल्ये आर्य गृष्टे स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः।

(इति निष्क्रान्तो वृद्धवर्गः)

(प्रविश्य।) **बटवः**—पश्यतु कुमारस्तदाश्चर्यम्।

लवः—दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः।

बटवः—कथं ज्ञायते।

लवः—ननु मूर्खाः पठितमेव हि युष्माभिरपि तत्काण्डम्[1]। किं न पश्यथ प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः. तत्प्रायमेव[2] बलमिदं दृश्यते। यदीह न प्रत्ययस्तद्गत्वा पृच्छत।

बटवः—भो भोः किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति।

लवः—(सस्पृहमात्मगतम्।) अये अश्वमेध इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महानुत्कर्षनिकषः[3]।

(भेरूपा?) लापैर्यूयं तोषिताः, वयं च सन्तोषिताः विस्मिताश्च। भगवति जानामि एतमनवेक्षमाणा वञ्चितेव तस्मादन्यतो भूत्वा पश्यामस्तावत्तं पलायमानं दीर्घायुषम्। अरण्यगर्भस्य वनमध्यस्य रूपं शोभा येन यस्माद्वा सोऽरण्यगर्भरूपो लवः। तस्य **लापैः** उक्तिभिरित्यर्थः। 'अमृतं बालभाषितम्' इति स्मरणात्। 'रूपमाकृतिसौन्दर्यशोभासु' इति संसारावर्तः। **एतं** लवम्। **कञ्चुकीति**—पूर्वं जनकेन वाल्मीकिं प्रति प्रेषितो यः स एवायमिति ज्ञेयम्। **आह** वदति। तदिति लवस्य वृत्तमिति विवेकः। अवसर एव ज्ञातव्यम्, न त्विदानीमिति भावः। **किमपीति** क्रमेण विशदीभविष्यतीति वाक्यशेषः। **शतं संख्या** येषां **निषङ्गिणः** तूणीधराः। **तत्प्राय**मिति। तेषां कवचिप्रमुखानां प्रायः भूमा यस्मिन् तत् तत्प्रायम्। 'प्रायो भूम्नि' इत्यमरः। **इदं** रक्षकसैन्यमिति यावत्। किं प्रयोजनं यस्य किंप्र-

---

१ 'तत्काण्डे' क-घ-व. २ 'तत्प्रायमेवान्यदपि' व. ३ 'निष्कर्षः' क-घ-व.

(नेपथ्ये ।) योऽयमश्वः[1] पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ २७ ॥

लवः—(सगर्वमिव[2] ।) अहो सन्दीपनान्यक्षराणि ।

वटवः—किमुच्यते । प्राज्ञः खलु कुमारः ।

लवः—भो भोः, तत्किमक्षत्रिया पृथिवी यदेवमुद्घोष्यते ।

(नेपथ्ये ।) रे रे महाराजं प्रति कुतः क्षत्रियाः ।

लवः—धिग्जाल्मान्[3] ।

यदि ते[3] सन्ति सन्त्येव केयमद्य[4] विभीषिका ।
किमुक्तैरेभिरधुना[5] तां पताकां हरामि वः ॥ २८ ॥

भो भो वटवः परिवृत्य लोष्टैरभिघ्नन्तो नयतैनमश्वम् । एष रोहितानां मध्ये वराकश्चरतु ।

(प्रविश्य सक्रोधदर्पः)पुरुषः[6]—धिक्चापलं किमुक्तवानसि । तीक्ष्णतरा ह्यायुधीय[7]श्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते । राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः[8] । सोऽप्यपूर्वारण्य[9]दर्शनाक्षिप्तहृदयो न यावदायाति तावत्त्वरितमनेन तरुगहनेनापसर्पत ।

वटवः—कुमार कृतमनेनाश्वेन । तर्जयन्ति विस्फुरितशस्त्राः[10] कुमारमायुधीयश्रेणयः । दूरे चाश्रमपदमितस्तदेहि हरिणप्लुतैः पलायामहे ।

योजनः । स्पृहा समरेच्छा । ऊर्जस्वलः ऊर्जातिशयान्वितः । सर्वे स्वस्मादितरे च ते क्षत्रियाः । निकषः शाणः, घर्षणसाधनशिला । 'सहाण' इति महाराष्ट्राः । योऽयमश्वः पताकेति ॥ २७ ॥ योऽश्वः अयं । इयमिति वीरघोषणायां च योज्यम् । 'वीरवादाभेटी वीरघोषणा' इति हैमः । अधो विद्यमानाः सप्तलोकाः ऊर्ध्वं च सप्त लोकाः आहत्य चतुर्दशभुवनानीति भावः ॥ २७ ॥ सन्दीपनानि सन्तापकारीणि इति यावत् । 'हीनसंबोधने तु रे' इत्यमरः । 'भयोत्पादनहेतुर्या प्रतिमा सा विभीषिका' इति केदारः । अभिघ्नन्तः पशुसाधारणमिति भावः । रोहितानां मृगशीर्षाणाम् । एतेषां मध्ये या । वराकः अधमः । पुरुषः राक्षससैन्यस्य इति बोध्यम् । आयुधीयानां शस्त्राजीवानाम् । 'श्रेणिः श्रेणी' इति द्विरूपः ।

---

१ 'अयमश्वः' क-घ-च. २ 'सन्यथमिव' च-व. ३ 'नो' न. ४ 'केयमन्या' घ-च. ५ 'किमुक्तैः संनिपत्यैव' च; 'किमुक्तैः शरसन्धाभाग्' घ. ६ 'नीरस्ताः' क-घ-च. ७ 'आयुध' न. ८ 'अरिविमर्दनः' क-घ-च. ९ 'सौम्यपूर्वारण्य०' च-घ. १० 'विस्फारितशरासनाः' न.

लवः—(विहस्य) किं नाम विस्फुरन्ति शस्त्राणि । (इति धनुरारोपयन् ।)

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्गारिघोरघनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवक्रयन्त्र-
जृम्भाविडम्बि विकटोदरमस्तु चापम् ॥ २९ ॥

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।)

चतुर्थोऽङ्कः ।

'दुर्दाण्ड(न्त ?)श्चण्डविक्रमः' इति हेमचन्द्रः । **न परापतति** नाभिवर्तते । 'तरुभिर्गहनं कलिले वने' इति ध्वनिमञ्जरी । **प्लुतैः** उड्डीनविशेषैः **शस्त्राणि** आयुधानि । करुणरसातिशयेन चिरादतिसंकोचं वहन् कविः प्रकरणवशादेव वीररसाङ्कुरमुद्भावयति—**ज्याजिह्वया वलयितेति** ॥ २९ ॥ ज्यैव **जिह्वा** तया **वलयिते** आवेष्टिते **उत्कटे** मत्ते **कोटी** अग्रे एव **दंष्ट्रे** यस्य । उत्ता(द्गा ?)री उदयन् **घोरः** भयङ्करः **घनः** सान्द्रः **घर्घरः** घोषः यस्य । गम्भीरे घर्घर इति भावः । **विकटं** कुटिलं दुर्भरमिति यावत् । **उदरं** अन्तरालं यस्य । एतत् **चापम्** । 'धन्वकार्मुकचापानि' इति जयः । **ग्रासे** जगत्कवलने **प्रसक्तः** तत्परः । **हसन्** अट्टहासं कुर्वन् यः **अन्तकः** तस्य **वक्रमेव यन्त्रं** विभीषिकामुखम् तस्य **जृम्भा** तां विडम्बयतीति **विडम्बि** । 'जृम्भस्तु त्रिषु' इत्यमरः । **अस्तु** । तथा च एतेषामायुधीयानां शस्त्रविष्फारः मम ईदृशस्य चापस्य पुरतः कियानिति भाव इत्यलमतिविस्तरेण ॥ २९ ॥ इति महाराजपद + उत्तररामचरितसंजीवनाख्यटिप्पणे चतुर्थोऽङ्कः स्समाप्तः ॥

॥ इति चतुर्थोऽङ्कः ॥

---

१ 'उद्गूरि' न. + प्रथमाङ्कटीकासमाप्तौ टीकाकृता यदात्मवृत्तं निवेदितं तदत्राप्यनुसन्धेयम् '

पञ्चमोऽङ्कः ।

(नेपथ्ये ।) भो भोः सैनिका जातं जातमवलम्बनमस्माकम् ।

नन्वेष त्वरितसुमन्त्रनुद्यमान-
प्रोद्वेल्लत्प्रजवितवाजिना रथेन ।
उत्खातप्रचलितकोविदारकेतुः
श्रुत्वा नः प्रधनमुपैति चन्द्रकेतुः ॥ १ ॥

(ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साद्भुतहर्षसंभ्रमश्चन्द्रकेतुः)

चन्द्रकेतुः—आर्य सुमन्त्र पश्य पश्य ।

किरति कलितकिंचित्कोपरज्यन्मुखश्री-
रविरतगुणगुञ्जत्कोटिना कार्मुकेण ।
समरशिरसि चञ्चत्पञ्चचूडश्चमूना-
मुपरि शरतुषारं कोऽप्ययं वीरपोतः ॥ २ ॥

अथ कविरिह पञ्चमाङ्के लवचन्द्रकेतुसंवादं वर्णयिष्यन् शाकुन्तलादिकृति-पञ्चाङ्कस्थलवत् कथागाह्यन्याभावात्प्रवेशादिकमङ्कमन्तरेणैव चतुर्थाङ्कपूर्तिसन्न-द्धलवसमारम्भसङ्गतिमसुश्चन्नेव तदनुरूपं, 'साक्षात्पात्रप्रवेशो वा नेपथ्याकाश-भाषितैः' इति रूपकादर्शोक्तन्यायानुसारेण चन्द्रकेतुप्रवेशसूचनमङ्कुरयति—**नेपथ्ये** इति । **अस्माक**मिति अस्मत्सेनाया इति च पाठौ साधीयांसौ । अस्मत्सैनिकानामिति भ्रान्तः पाठः । भो भोः सैनिका इति संबोधनास-ङ्गतेः ॥ कथमवलम्बनमित्याशङ्क्याह—**नन्वेष त्वरितेति** ॥ १ ॥ **सुमन्त्रेण नुद्यमानः** प्रेर्यमाणः । **प्रोद्वेल्लन्** कम्पमानः प्रकर्षेण **जविताः** संजात-जवाः **वाजिनः** यस्य । तथा च नुद्यमानस्सन् प्रोद्वेल्लंश्चासौ प्रजवितवाजी च तेन रथेन उपलक्षितः । **उत्खाते प्रचलितः** तरलितः **कोविदार** एव **केतुः** ध्वजः यस्य । 'उत्खाते विषमे देशे' इति 'कोविदारे चमरकः' इति **शब्दमालाधन्वन्तरी** । सपदि झटिति । 'बाले च युवराजे च कुमारः' इति संसारावर्तः । पूर्वार्धे यमकभङ्गः एकाक्षरप्रासः ॥ १ ॥ सुमन्त्रः सारथिः यस्मिन् ॥ **किरति कलितकिञ्चिदिति** ॥ २ ॥ **कलितः** प्राप्तश्चासौ **किञ्चित्कोपः** अल्पक्रोधः तेन **रज्यन्ती मुखश्रीः** यस्य । **प्रविततः गुणः** मौर्वी यस्य । घण्टाभिर्गुञ्जन्ती शब्दायमाना **कोटिः** यस्य । प्रवि-

---

१ 'व्यावल्गत्प्रजवन' क-घ-च; 'प्रोद्वल्गद्' न. २ 'उद्धात' क-घ-च. ३ 'अनवरतनिगुञ्जद्' घ-च; 'प्रविततं' टी.

आश्चर्यमाश्चर्यम् ।

मुनिजनशिशुरेकः सर्वतः सैन्यकाये
　नव इव रघुवंशस्याप्रसिद्धः प्ररोहः ।
दलितकरिकपोलग्रन्थिटङ्कारघोर-
　ज्वलितशरसहस्रः कौतुकं मे करोति ॥ ३ ॥

सुमन्त्रः—आयुष्मन्

अतिशयितसुरासुरप्रभावं
　शिशुमवलोक्य तथैव तुल्यरूपम् ।
कुशिकसुतमखद्विषां प्रमाथे
　धृतधनुषं रघुनन्दनं स्मरामि ॥ ४ ॥

चन्द्रकेतुः—मम त्वेकमुद्दिश्य भूयसामारम्भ इति हृदयमपत्रपते ।

अयं हि शिशुरेकको मदभरेण भूरिस्फुर-
　त्करालकरकन्दलीजटिलशस्त्रजालैर्बलैः ।

ततगुणं च तत् गुञ्जत्कोटि च । चञ्चन्त्यः चञ्चलाः पञ्च चूडाः संयतकेशाः यस्य । 'चञ्चत्पटैः केतुभिः' इति मूकः । शरा एव तुषाराः नीहाराः । वीरस्य पोतः अर्भकः । वीरश्चासौ वा । संप्रकोपादित्यत्र उपसर्गौ पादपूरकौ इति केचित् । वृथेत्यन्ये । हन्त कोपादिति वा पाठः ॥ २ ॥ मुनिजनशिशुरिति ॥ ३ ॥ प्ररोहः अङ्कुरः । दलिताः भेदिताः करिकपोलग्रन्थयः यैः । 'ग्रन्थिर्मर्मणि च' इति हैमः । टङ्काराः घोराः येषु । दलितकरिकपोलग्रन्थय एव टङ्कारघोराः सन्तः । ज्वलिताश्च ते शराश्च तेषाम् ॥ ३ ॥ अतिशयितसुरासुरेति ॥ ४ ॥ अतिशयितः सुरासुरेभ्योऽपि प्रभावः यस्य । तथैव रामस्येति भावः । द्विषां मारीचादीनाम् । प्रमाथे हिंसने ॥ ४ ॥ अयं हि शिशुरिति ॥ ५ ॥ एककः एकः । भूरि स्फुरन्त्यः वीरलक्ष्म्याः भूयः शोभमानाः करालाः दुष्प्रेक्षाः याः करकन्दल्यः करसंपुटानि तेषु जटिलानि निबिडानि शस्त्राणां आयुधानां जालानि समूहाः येषाम् । 'दुर्दर्शे करालः' इति, 'कदली संपुटे पुटे कन्दः' इति, 'जटिलो निबिडार्थः' इति हारावलीकपिलशब्दार्णवाः । किङ्किणीभिः

---

१ 'संप्रकोपाद्' न–टी. २ '°प्रसिद्धिप्ररोहः' न. ३ '°घोरं' व. ४ 'तवैव' व–घ. ५ 'इममेक°' व–व. ६ 'समरभारभूमि°' क–व–व. ७ 'कलित' क–घ–च.

क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्दिनद्विरदडामरैरावृतः ॥ ५ ॥

सुमन्त्रः—वत्स एभिः समस्तैरपि किमस्य किं पुनर्व्यस्तैः ।

चन्द्रकेतुः—आर्य त्वर्यतां त्वर्यताम् । अनेन हि महानाश्रितजनप्रमारोऽस्माकमारब्धः । तथा हि ।

आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुत्तम्भयन् ।
वेल्लद्भैरवरुण्डमुण्डनिकरैर्वीरो विधत्ते भुवं
तृप्यत्कालकरालवक्त्रविघसव्याकीर्यमाणामिव ॥ ६ ॥

सुमन्त्रः—(स्वगतम् ।) कथमीदृशेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्वसंप्रहारमनुजानीमः । (विचिन्त्य ।) अथवा इक्ष्वाकुकुलवृद्धाः खलु वयम् । प्रत्युपस्थिते रणे च का गतिः ।

चन्द्रकेतुः—(सविस्मयलज्जासंभ्रमम् ।) हन्त धिक् । अपावृत्तान्येव सर्वतः सैन्यानि मम ।

क्षुद्रघण्टाभिः घणघणायिताः स्यन्दनाः रथाः येषाम् । अमन्दं महत् । मदा एव दुर्दिनं येषां ते च ते द्विरदाः गजाः तैः डामराणि उद्धतानि । दुर्दिनमिति नैल्यधाराक्षरणात्मकार्थद्वयाभिप्रायकम् । 'मेघच्छन्नेऽह्नि दुर्दिनम्' इति, 'उद्धते डामरं त्रिषु' इत्यमरविक्रमार्कौ । बलैः सैन्यैः । 'तुल्ययुद्धौ समभरः' इति नन्दी । आवृतः आक्रान्तः । सादिनोऽप्येतदन्तर्भूता इति भावः । शिशुरेकेति ध्वनिः ॥ ५ ॥ समस्तैर्मिलितैः । व्यस्तैः भिन्नैः । एभिः बलैः । आश्रितजनाः अनुचरलोकाः तेषां प्रमारः प्रकर्षेण मारणम् ॥ आगर्जद्गिरीति ॥ ६ ॥ आ समन्तात् । घटासु निस्तीर्णः अवतीर्णः । कर्णेभ्यः ज्वरः असाभ्यत्वरूपः संतापः येन । विस्तीर्ण इति पाठे विशाल इत्यर्थः । आध्मातं पूरितम् । वेल्लद्विति । 'ग्रहद्वारणदण्डानां अकबन्धं शिरोरुण्डम्' इति समासः । तृप्यन् यः कालः यमः तस्य करालवक्त्रस्य विघसेन । 'करालो दन्तुरे तुङ्गे' इति, 'विघसो भोजनशेषः' इत्यमरकेदारौ ॥ ६ ॥ संप्रहारं युद्धं । केति रणं कर्तव्यमेवेति भावः । लवस्य पराक्रमाभिभयाद्विस्मयलज्जासंभ्रमाः । अपावृत्तानि परावृत्तानि ।

---

१ 'बलैः' क–घ–च. २ 'प्रमाथः' क–घ–च. ३ 'आगुञ्जत्' घ–ण. ४ 'विस्तीर्ण' च–घ. ५ 'ज्वरज्या०' न. ६ 'रण्ड' न. ७ 'मुखः' घ–च. ८ 'तृप्यत्' न–क.

सुमन्त्रः—(रथवेगमभिनीय ।) आयुष्मन्, एष ते वाग्विषयीभूतः स वीरः ।

चन्द्रकेतुः—(विस्मृतिमभिनीय ।) आर्य किमस्य नामधेयमाख्यातमाह्वायकैः[१] ।

सुमन्त्रः—लव इति ।

चन्द्रकेतुः—भो भो लव महाबाहो किमेभिस्तव सैनिकैः ।
एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु ॥ ७ ॥

सुमन्त्रः—कुमार पश्य पश्य ।

विनिवर्तित[२] एष वीरपोतः
पृतनानिर्मथनात्त्वयोपहूतः ।
स्तनयित्नुरवादिभावलीना-
मवमर्दादिव दृप्तसिंहशावः ॥ ८ ॥

(ततः प्रविशति धीरोद्धतपरिक्रमो लवः ।)

लवः—साधु राजपुत्र साधु । सत्यमैक्ष्वाकः खल्वसि । तदहं परागत एवास्मि ।

(नेपथ्ये महान्कलकलः ।)

लवः—(सावष्टम्भं परावृत्य ।) आः कथमिदानीं भग्ना अपि प्रतिनिवृत्य युद्धाभिसारिणः पर्यवष्टम्भयन्ति मां चमूपतयः । धिग् जाल्मान् ।

अयं शैलाघातक्षुभितवडवावक्त्रहुतभु-
क्प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे ।
समन्तादुत्सर्पन्[३]घनतुमुलहेलाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥ ९ ॥

(सवेगं परिक्रामति ।)

चन्द्रकेतुः—भो भोः कुमार ।

वागिति-संप्रति संलापाय सन्निकृष्ट इत्यर्थः । इतिकार आवा(वो?)धक इति त्रिकाण्डी ॥ विनिवर्तित एष इति ॥ ८ ॥ पृतना सेना । स्तनयित्नुः मेघः । अवमर्दः मर्दनम् शावः शिशुः ॥ ८ ॥ परागतः प्रतिनिवृत्यागत इति यावत् । 'अवष्टम्भो गर्वः' इति रत्नमाला । परितः स्थिरीभवतीति यावत् । मामुद्दिश्य । 'जाल्मोसमीक्ष्यकारी' इत्यमरः । अयं शैलाघात इति ॥९॥ आघातः आघट्टनम् । तेन क्षुभिता या वडवा, 'अश्वा वडवा'इत्य-

---

१ 'आख्यायकैः' ब–घ. २ 'व्यपवर्तत' द–घ. ३ 'बल' ब–घ. ४ 'सेना' क–ब.

अत्यद्भुतादसि गुणातिशयात्प्रियो मे
तस्मात्सखा त्वमसि यन्मम तत्तवैव ।
तत्किं निजे परिजने कदनं करोषि
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥ १० ॥

लवः—(सहर्षसंभ्रमं परावृत्य ।) अहो महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिर्विकर्तनकुलकुमारस्य । तत्किमेभिरेनमेव तावत्सम्भावयामि । (पुनर्नेपथ्ये कलकलः ।)

लवः—(सक्रोधनिर्वेदम् ।) आः कदर्थितोऽहमेभिर्वीरसंवादविघ्नकारिभिः पापैः । (तदभिमुखं परिक्रामति ।)

चन्द्रकेतुः—आर्य आर्य दृश्यतां द्रष्टव्यमेतत् ।

दर्पेण कौतुकवता मयि बद्धलक्ष्यः
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा ।
द्वेधा समुद्धतमरुत्तरलस्य धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम् ॥ ११ ॥

सुमन्त्रः—कुमार एवैनं द्रष्टुमपि जानाति । वयं तु केवलं परवन्तो विस्मयेन ।

चन्द्रकेतुः—भो भो राजानः ।

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
वत्रैकस्मिन्कवचनिचितैर्मध्यचर्मोत्तरीये ।
कालज्येष्ठैरभिनववयःकाम्यकाये भवद्भि-
र्योऽयं बद्धो युधि समभरस्तेन धिग्वो धिगस्मान् ॥ १२ ॥

लवः—(सोन्माथम् ।) आः कथमनुकम्पते नाम । (विचिन्त्य ।) भवतु । कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत्सैन्यानि संस्तम्भयामि । (इति ध्यानं नाटयति ।)

मरः । निचयः समूहः । 'अतुलं (तुमुलं?) रणसङ्कुले' इति, 'हेला विलासः' इति, 'ओघः प्रवाहजवयोः' इति चामरः । आस्फालितः उद्धूतः ॥ ९ ॥ अत्यद्भुतादसीति ॥ १० ॥ कदनं व्यापादनम् ॥ १० ॥ कदर्थितः व्यर्थीकृत इति यावत् ॥ दर्पेण कौतुकवतेति ॥ ११ ॥ उदीर्णं उद्धृतम् । माघवतं ऐन्द्रम् । लक्ष्मीं शोभाम् ॥ ११ ॥ परवन्तः पराधीनाः । संख्यातीतैरिति ॥ १२ ॥ 'पदाताः पदातयः' इत्यमरः । तत्र तस्मिन् रुवे । निचितैः । 'कालो वत्सरेऽपि' इति केशवः । अपरं बाल्यं । तेन

---

१ 'नद्ध' न. २ 'अपरवयसि स्यातिकामैः' न. ३ 'परिकरः' इति क-ग-घ.

सुमन्त्रः—तत्किमकस्मादस्मत्सैन्यघोषः प्रशाम्यति ।

लवः—पश्याम्येनमधुना प्रगल्भम् ।

सुमन्त्रः—(ससंभ्रमम् ।) वत्स मन्ये कुमारकेणानेन जृम्भकास्त्रमाम-न्त्रितमिति ।

चन्द्रकेतुः—अत्र कः सन्देहः ।

व्यतिकर इव भीमस्तामसो वैद्युतश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति ।
अथ लिखितमिवैतत्सैन्यमस्पन्दमास्ते
नियतमजितवीर्यं जृम्भते जृम्भकास्त्रम् ॥ १३ ॥

आश्चर्यमाश्चर्यम् ।

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवस्तीर्यते
मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ १४ ॥

सुमन्त्रः—कुतः पुनरस्य जृम्भकाणामागमः स्यात् ।

चन्द्रकेतुः—भगवतः प्राचेतसादिति मन्यामहे ।

सुमन्त्रः—वत्स नैतदेवमस्त्रेषु विशेषतो जृम्भकेषु । यतः ।

सम (भ ?)रेण तुल्यबुद्ध्या ॥ १२ ॥ उन्मादः चित्तविभ्रमः । कालहरणं विलम्बः । तस्य प्रतिषेधः निषेधः । अकस्मात् अहेतोः । सहसा वा । एनं चन्द्रकेतुम् । परिहासोक्तिरियम् । तदेव स्पष्टयति—व्यतिकर इव भीम इति ॥ १३ ॥ भीमः घोरः तमसोऽयं तामसः । विद्युतः अयं वैद्युतः । व्यतिकरः संबन्धः । प्रणिहितं प्रणिधानगतं विषयैकनिष्ठमपीति यावत् । चक्षुः कर्म । ग्रस्तमुक्तं तामसो व्यतिकरः ग्रस्तं सत् स्वने(?)त्युभ-यत्र शेषः । वैद्युतः मुक्तं सत् हिनस्ति चेति बोध्यम् । अस्पन्दं निश्चलम् । आस्ते तस्मादिति शेषः ॥ १३ ॥ पातालोदरेति ॥ १४ ॥ पातालेति श्यामत्वातिशयद्योतकम् । जृम्भकैः जृम्भकास्त्रैः । पूजायां बहुत्वम् । 'रीतिः स्त्रियामारकूटं' इति, 'कडारः कपिलः' इति चामरः । आरकूटं 'पित्तल' इति महाराष्ट्राः । ज्योतिर्वत् ज्वलन्ती दीप्तिः येषां तानि । कल्पः प्रलयः तस्य आक्षेपे आग्रहे । दारुणमरुता व्यस्तैः भिन्नैः । तडिद्भिः कडा-राणि कुहराणि बिलानि येषां ते । कूटैः शिखरैरिव । अवस्तीर्यते

---

१ 'अमित' क. २ 'अभिस्तीर्यते' न; 'अवास्तीर्यते' घ.

कृशाश्वतनया ह्येते कृशाश्वात्कौशिकं गताः ।
अथ तत्संप्रदायेन रामभद्रे स्थिता अपि ॥ १५ ॥

चन्द्रकेतुः—अपरेऽपि [२]प्रचीयमानसत्त्वप्रकाशाः स्वयं सर्वं मन्त्रदृशः पश्यन्ति ।

सुमन्त्रः—वत्स सावधानो भव । [३]परागतस्ते प्रतिवीरः ।

कुमारौ—(अन्योन्यं प्रति ।) अहो प्रियदर्शनः कुमारः । (सस्नेहानुरागं निर्वर्ण्य ।)

यदृच्छासंवादः किमु [४]किमु गुणानामतिशयः
पुराणो वा जन्मान्तरनिविडब[५]द्धः परिचयः ।
निजो वा सम्बन्धः किमु विधिवशात्कोऽप्यविदितो
ममैतस्मिन्दृष्टे हृदयमवधानं रचयति ॥ १६ ॥

सुमन्त्रः—[६]भूयसा जीविधर्म एष यद्रसमयी कस्यचित्कचित्प्रीतिः, यत्र लौकिकानामुप[७]चारस्तारामैत्रकं चक्षूराग इति । तम[८]प्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति ।

आस्तीर्यते ॥ १४ ॥ **आगमः** प्राप्तिः । **एते** जृम्भकादयोऽस्त्रविशेषाः ॥ **कृशाश्वतनया** इति ॥ १५ ॥ **कृशाश्वस्य** ऋषेः । **तस्मात्** कौशिकात् । **संप्रदायेन** शिष्यक्रमेण । एकपदमेतत् ॥ १५ ॥ **परं** भृशम् । उपेति वर्धमानव्यस्याश्चर्ये(?) 'प्रकाशोऽतिप्रसिद्धेऽपि' इत्यमरः । 'ऋषियोगी च मन्त्रकृत्' इति लिङ्गानुशासनम् । **स्वयं सर्वं पश्यन्ति** । एतेन कृशाश्वकौशिकादिवत् प्राचेतसादीनामपि अस्त्रप्रवर्तकत्वप्रसक्तिरुक्ता भवतीत्यवधेयम् । **ते** तुभ्यम् । **कुमारौ** लवचन्द्रकेतू ॥ **यदृच्छासंवाद** इति ॥ १६ ॥ **यदृच्छया** स्वैरम् **संवादः** संलापः किमु । **निजः** नित्यः परिचयो वेति पूर्वेण योज्यम् । **अविदितः** संबन्धः किमु । कुत एवमत आह—**ममेति** । **अवधानं** अनन्यवृत्तित्वम्, कर्म । **हृदयं** परवशीभवतीति भावः ॥ १६ ॥ 'द्रवे रसः' इत्यमरः । प्रीतिरिति यत् एष धर्म इत्यन्वयः । **यत्र** प्रीतिविषये । **लौकिकानां** वैदिकमार्गानभिज्ञानाम् । **उपचारः** आदरणमात्रमित्यर्थः ॥ अथ वैदिकमर्थं विवृणोति—**तारेति** । तारैव तारका । 'तारकाक्ष्णः कनीनिका' इति 'मैत्रं मैत्री च सख्यं च' इत्यमररत्नकारौ । **चक्षुषोः रागः** । न रागः उभयत्र दर्शनं लक्ष्यते । **तत्** प्रसिद्धम् । **अप्रतिसन्धेयं** अवधनीयम् । **निबन्धनं** शास्त्रम् ।

---

१ 'कृशाश्व' न. २ 'परमोपचीयमान' प–च. ३ '०गतः प्रवीरः' फ–घ–ष. ४ 'किमु गुणगणानाम्' न. ५ 'बन्धः' व–घ. ६ 'भूयसां जीविनामेव धर्म एष यत्र स्वरसमयी' न. ७ 'व्यापारः' प. ८ 'तदप्रतिसंख्येयनिबन्धनं प्रमाणम्' म

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति ॥ १७ ॥

कुमारौ—(अन्योन्यमुद्दिश्य ।)

एतस्मिन्मसृणितराजपट्टकान्ते
मोक्तव्याः कथमिव सायकाः शरीरे।
यत्प्राप्तौ मम परिरम्भणाभिलाषा-
दुन्मीलत्पुलककदम्बमङ्गमास्ते ॥ १८ ॥

किं त्वाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना
शस्त्रेणापि हि तेन किं न विषयो जायेत यस्येदृशः।
किं वक्ष्यत्ययमेव युद्धविमुखं मामुद्यतेऽप्यायुधे
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥ १९ ॥

सुमन्त्रः—(लवं निर्वर्ण्य सास्रमात्मगतम् ।) हृदय किमन्यथा परि-प्लवसे।

मनोरथस्य यद्बीजं तद्दैवेनादितो हृतम्।
लतायां पूर्वलूनायां प्रसवस्योद्भवः कुतः ॥ २० ॥

चन्द्रकेतुः—अवतराम्यार्य सुमन्त्र स्यन्दनात्।

प्रमाणमामनन्ति। वैदिका इति शेषः। 'प्रतिसन्धानाम(म?)तिसन्धानं द्वे वञ्चनार्थके' इति रुद्रः ॥ अहेतुः पक्षपात इति ॥ १७ ॥ पक्षपातः ममता। मैथिलीपक्षपातेनेत्यस्मद्व्याख्यातचम्पौ। प्रतिक्रिया आक्षेपः स पक्षपातः प्रेमस्वरूपम्। सूत्रं कर्तृ। भूतानि प्राणिनः कर्म। अन्तः आत्मनि सीव्यति स्यूतान् करोतीत्यर्थः ॥ १७ ॥ एतस्मिन्मसृणितेति ॥ १८ ॥ मसृणितं च तत् राजपट्टाय साम्राज्याय कान्तं मनोज्ञं तस्मिन्। यस्य शरीरस्य। प्राप्तौ लाभे। उन्मीलत्पुलकानां कदम्बं समूहः यस्मिन्। उन्मीलन्ति पुलका एव कदम्बानि नीपपुष्पाणि यस्मिन्निति वा। 'अङ्गं वपुष्यवयवे' इति रत्नाकरः ॥ १८ ॥ ननु यथेच्छमालिङ्गयतां, मास्तु शस्त्रयुद्धम्, अस्तु वा बाहुयुद्धम्, इत्याशङ्क्याह किन्त्वाक्रान्तेति ॥ १९ ॥ किन्तु आक्रान्ताः अभिभूताः कठोरतेजसः शूराः येन तस्मिन् लव इति यावत्। यस्य शस्त्रस्य यस्य ममेति वा शेषः। ईदृश इति षष्ठीप्रथमैकवचनम्। 'संकेतशपथाचारसिद्धान्ताः समयाः' इति धनञ्जयः ॥ १९ ॥ परिप्लवसे चलसि ॥ मनोरथस्य यदिति ॥ २० ॥ बीजं सीतेत्यर्थः। प्रसवः पत्रादिः ॥ २० ॥

---

१ 'अन्तर्मर्माणि' क–घ–व. २ 'परिकल्पसे' घ–ङ–व. ३ 'हृतम्' व. ४ 'प्रसूनसागमः' घ–ङ.

सुमन्त्रः—तत्कस्य हेतोः ।

चन्द्रकेतुः—एकस्तावदयं वीरपुरुषः पूजितो भवति । अपि च खल्वार्य क्षात्रधर्मः समनुगतो भवति । न रथिनः पादचारमभियुञ्जन्तीति शास्त्रविदः परिभाषन्ते ।

सुमन्त्रः—(स्वगतम् ।) आः कष्टां दशामनुप्रपन्नोऽस्मि ।

कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु ।
कथं वाभ्यनुजानातु साहसैकरसां क्रियाम् ॥ २१ ॥

चन्द्रकेतुः—यदा तातमिश्रा अपि पितुः प्रियसखमर्थसंशयेष्वार्यमेव पृच्छन्ति तत्किमार्यो विमृशति ।

सुमन्त्रः—आयुष्मन्, एवं यथाधर्ममभिमन्यसे ।

एष साङ्ग्रामिको न्याय एष धर्मः सनातनः ।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः ॥ २२ ॥

चन्द्रकेतुः—अप्रतिरूपं वचनमार्यस्य ।

इतिहासं पुराणं च धर्मप्रवचनानि च ।
भवन्त एव जानन्ति रघूणां च कुलस्थितिम् ॥ २३ ॥

सुमन्त्रः—(सस्नेहास्रं परिष्वज्य)

जातस्य ते पितुरपीन्द्रजितो निहन्तु-
र्वत्सस्य वत्स कति नाम दिनान्यमूनि ।
तस्याप्यपत्यमनुतिष्ठति वीरधर्मं
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम् ॥ २४ ॥

पादाभ्यां चारः संचारः यस्य ॥ कथं हीदमनुष्ठानमिति ॥ २१ ॥ अनुष्ठानं आचरणम् । मादृशः अनभिज्ञ इति यावत् । प्रतीति समानयुद्धस्य न्याय्यत्वादिति भावः । रणमुखे यानादवतरणमेव साहसमिति भावः । अनुष्ठानं क्रियामिति च ध्वनी । अत्र हिकारावजागलस्तनौ ॥ २१ ॥ मिश्रा इत्यत्र पादा इति च पाठः । रामादय इत्यर्थः । पितुः दशरथस्य । विमृशति विचारयति । अनुरुध्यसे अनुवर्तसे ॥ एष साङ्ग्रामिक इति ॥ २२ ॥ सनातनः नित्यः । 'चरित्रमपि चारित्रम्' इति द्विरूपः ॥ २२ ॥ अप्रतिरूपं असमानम् ॥ इतिहासं पुराणमिति ॥ २३ ॥ इतिहासं पुरावृत्तम् ॥ २३ ॥ जातस्य ते पितुरिति ॥ २४ ॥ तस्य लक्ष्मणस्य ।

---

१ 'एकस्तावद्' न; 'यतस्तावद्' क–ख. २ 'परिपालितः' न; 'सम्यगनुगतः' ख; 'अनुगृहीतः' क. ३ 'कथं हीद' न. ४ 'प्रतिरूप' घ–ध. ५ 'पितेन्द्र' क–ख. ६ 'दृश्यं' ख–ग.

चन्द्रकेतुः—(सकष्टम् ।)

अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः ।
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे ॥ २५ ॥

सुमन्त्रः—अहह हृदयमर्मदारणान्येव चन्द्रकेतोर्वचनानि ।

लवः—हन्त मिश्रीकृतो रसक्रमो वर्तते ।

यथेन्दावानन्दं व्रजति समुपोढे कुमुदिनी
तथैवास्मिन्दृष्टिर्मम कलहकामः पुनरयम् ।
रणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालोल्बणरसः ॥ २६ ॥

चन्द्रकेतुः—(अवतरणं रूपयन् ।) आर्य सावित्रश्चन्द्रकेतुरभिवादयते ।

सुमन्त्रः—अहितस्यैव पराजयाय महानादिवराहः कल्पताम् ।

अपि च ।

अपत्यं चन्द्रकेतुः । प्रतिष्ठां कीर्तिम् । गतमिति ध्वनिः ॥ २४ ॥ अप्रतिष्ठे कुलज्येष्ठे इति ॥ २५ ॥ रघवः दशरथादयः ज्येष्ठा यस्य । 'ज्येष्ठोऽतिशस्तः' इत्यमरः । रघुभ्यः भरतलक्ष्मणशत्रुघ्नेभ्य इति वाऽर्थः । रघुश्रेष्ठे इति च पाठः । अप्रतिष्ठे अपवादादिति भावः । तुर्यपादे ध्वनिः ॥ २५ ॥ रसयोः शान्तवीरयोः । क्रमो रीतिः । शान्तिं वर्णयति–यथेन्दावानन्दमिति ॥ २६ ॥ समुपोढे उदिते । अस्मिन् चन्द्रकेतौ । वीररसं वर्णयति–कलहकाम इति । अयमसौ । रणत्कारः शब्दानुकारः । तेन क्रूरं क्वणितं शब्दः यस्य तादृग्गुणः मौर्वी यस्य घण्टासाधनेन गुञ्जद् गुरु अलघु यत् धनुः गुणं च तद्धनुः । तस्मिन् धृतप्रेमा । विकचाः स्फुटाः विकरालाः विशेषेण भयङ्कराः व्रणाः व्याघातसंभवाः मुखे तले यस्य । 'मार्गमध्यस्थयोः सन्धिविशेषतलयोर्मुखम्' इति लिङ्गानुशासनम् । बाहुः स्फुरतीति शेषः ॥ २६ ॥ अहितस्य शत्रोः एवकारेण लवो व्यावर्त्यते । तस्याहितत्वाभावादिति दैवःसिद्धं बोध्यम् । पराजयं भङ्गम् । महान् पूज्यः । आदिवराहः वराहावतारो विष्णुः ॥ 'दार्ढ्यमर्काच्छिद्र्यं शक्रात्सत्यं रामाद्गुरोर्मतिम् । पराजयमभि-

---

१ 'कुलज्येष्ठे' क–ब–न. २ 'मिश्रीकृतक्रमो रसो' न; 'रसः' ब. ३ 'विकरालव्रणमुखः' न–टी. ४ 'ऐक्ष्वाकः' न. ५ अस्य स्थाने 'अजितं पुण्यमूर्जस्वि ककुत्स्थस्येव ते महः । श्रेयसे शाश्वतो देवो वराहः परिकल्पताम्' ॥ २७ ॥ इति क–ब–व–पुस्तकेषु.

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पिता
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि ।
ऐन्द्रावैष्णवमाग्निमारुतमथो सौपर्णमोजोस्तु ते
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम् ॥ २७ ॥

लवः—कुमार अति हि नाम शोभसे रथस्थ एव । कृतं कृतमत्यादरेण ।

चन्द्रकेतुः—तर्हि महाभागोऽप्यन्यं रथमलङ्करोतु ।

लवः—आर्य प्रत्यारोपय रथोपरि राजपुत्रम् ।

सुमन्त्रः—त्वमप्यनुरुध्यस्व चन्द्रकेतोर्वचनम् ।

लवः—को विचारः स्वेषूपकरणेषु । किं त्वरण्यसदो वयमनभ्यस्तरथचर्याः ।

सुमन्त्रः—जानासि वत्स दर्पसौजन्ययोर्यथोचितमाचरितुम् । यदि पुनस्त्वामीदृशमैक्ष्वाको राजा रामभद्रः पश्येत्तदा तस्य स्नेहेन हृदयमभिष्यन्देत ।

लवः—आर्य सुजनः स राजर्षिः श्रूयते । (सलज्जमिव ।)

त्राणां प्रार्थयेदादिकालतः ॥' इति स्मरणात् ॥ देवस्त्वां सवित्तेति ॥ २७ ॥ धिनोति प्रीणयतीति माठरः । मैत्रावरुणः वसिष्ठः । ते तव गुरूणां पित्रादीनाम् । गुरुः पुरोहितः । 'अथागस्त्यवसिष्ठयोर्मैत्रावरुणिमैत्रावरुणौ' इति केदारः । 'मङ्गलेऽथो अथ' इति धरणिः । इन्द्राविष्ण्वोरिदं ऐन्द्रावैष्णवम् । अग्निमरुतोरिदं आग्निमारुतम् । सुपर्णस्येदं सौपर्णम् । ओजः तेजः । ते तुभ्यम् । अस्तु । इन्द्राविष्णू इत्यादिश्रुतिरूपा । ज्याघोष एव मन्त्रः । जयं च देयादेव । रामलक्ष्मणेत्यनेन लवचन्द्रकेत्वोरुभयोरपि जय इत्यर्थात् सिद्धम् । अत्र त्वामिति एत(?)ते चैकं पुनरुक्तम् ॥ २७ ॥ अतिशोभसे इति वक्तव्यमिति पृथक्कथनं प्रमाद इति कश्चित् । तन्न । 'अत्यन्तगति नैकान्तमत्यर्थम्' इति शब्दमालायां व्यस्तरूपेणाभिधानादतीति पृथक् प्रयोगो युज्यते । हिकार उच्चारणप्रीतौ । नाम प्रसिद्धौ । रथमलमिति ध्वनिः । उपकरणेषु रथादिषु । 'साधनमुपकरणं सामग्री च परिच्छदः' इति रत्नाकरः । अरण्ये सीदन्तीति अरण्यसदः । चर्या परिस्थितिः । अनुपदं वयमपीत्यात्मनैवात्मा स्तूयत इति सङ्कोचवशात् सलज्जमित्युक्तम् ॥ यदि

---

१ 'पतिः' ग. २ 'ऐन्द्रं वैष्णवम्' क—घ. ३ 'यदाचरितम्' ग.

वयमपि न खल्वेवंप्रायाः क्रतुप्रतिघातिनः
क इह न गुणैस्तं राजानं जनो बहु मन्यते ।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाकरोत् ॥ २८ ॥

चन्द्रकेतुः—(सस्मितम्) किं नु भवन्तस्तातवाग्रपोत्कर्षेण्यमर्षः ।

लवः—अस्त्विहामर्षो मा भूत्। एतत्तु पृच्छामि । दान्तं हि राजानं राघवं शृणुमः । स किल नात्मना दृप्यति नास्य प्रजा या दृप्ता जायन्ते । तत्किं मनुष्यास्तस्य राक्षसीं वाचमुदीरयन्ति ।

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः ।
सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः ॥ २९ ॥

इति ह स्म तां निन्दन्ति । अथेतरामभिष्टुवन्ति ।

कामं दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्तिं सूते दुष्कृतं या हिनस्ति ।
तां चाप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥ ३० ॥

च वयमपीति ॥ २८ ॥ वयमपि न खल्वेवमिति काकुः । एवं पुनरपि एवेत्यर्थः । किं तत इत्याह–प्राय इति । प्रायः बहुधा । क्रतुक्षिपतां अकुशराक्षसानाम् । अरिं हन्तारम् । तदपि तथापि । 'ससलोकैकवीरस्य' इति तुरङ्गमरक्षिणां व्याहारः उक्तिः । मे विकृतिं विकारम् । अकरोत् खलु । २८ ॥ 'तपःक्लेशसहो दान्तः' इत्यमरः । 'दमशीलो दादः इन्द्रियनिग्रहः' इति भगवान् बोधायनः । अत्र अश्वरक्षकजनायाम् । तस्य रामस्य मनुष्याः ॥ ऋषयो राक्षसीमिति ॥ २९ ॥ सा वाक् योनिः कारणम् । लोकस्य वक्तुर्जनस्य । 'अलक्ष्मीस्तु निर्ऋतिः' इत्यमरः ॥ २९ ॥ इति ह स्म इति कथनमार्षः संप्रदायः । 'तु हि च स्म ह वै पूर्ती' इति केशवः । अत एव 'शरभङ्गं ददर्श ह' इति प्राचेतसः ॥ कामं दुग्धे इति ॥ ३० ॥ कामं मनोरथम् । दुग्धे दोग्धि विप्रकर्षति दूरयति । निष्टघ्नन्ति (?) निरस्यन्ति इति । सूनृतां प्रियाम् वाचं धेनुं कामधेनुम् । आहुः वदन्ति ॥ ३० ॥

---

१ 'यदि च वयमप्येवं°' न. २ 'क्रतुद्विपतामरो' न; 'क्रतुध्वंसि मलगा. ख ३ 'निष्कृतिः' न. ४ 'कामान्दुग्धे' क–व–ग. ५ 'दुर्हृदो निघ्नन्ति' न ६ 'पुण्यां शान्तां' न.

सुमन्त्रः—परिपूर्तस्वभावोऽयं वत्स कुमारः प्राचेतसान्तेवासी । वदत्य-[1]
पैममिसम्पन्नमार्षेण संस्कारेण ।[2]

लवः—यत्पुनश्चन्द्रकेतो वदसि किं नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्ष
इति तत्पृच्छामि किं व्यवस्थितविषयः क्षत्रधर्म इति ।

सुमन्त्रः—नैव खलु जानासि देवमैक्ष्वाकं येनैवं वदसि । तद्विरमाति-
प्रसङ्गात् ।

सैनिकानां प्रमाथेन सत्यमोजार्चितं त्वया ।
जामदग्न्यस्य दमने न[3] हि निर्वन्धमर्हसि ॥ ३१ ॥

लवः—(सहासम् ।) आर्य जामदग्न्यस्य दमनः स राजेति कोऽयमु-
पैर्यादः ।

सिद्धं ह्येतद्वाचि वीर्यं द्विजानां
बाह्वोर्वीर्यं यत्तु तत्क्षत्रियाणाम् ।
शस्त्रग्राही ब्राह्मणो जामदग्न्य-
स्तस्मिन्दान्ते का स्तुतिस्तस्य राज्ञः ॥ ३२ ॥

चन्द्रकेतुः—(सोन्मादमिव ।) आर्य सुमन्त्र कृतमुत्तरोत्तरेण ।

कोऽप्येष संप्रति नवः पुरुषावतारो
वीरो[4] न यस्य भगवान्भृगुनन्दनोऽपि ।
पर्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तातचरितान्यपि यो न वेद ॥ ३३ ॥

लवः—को हि रघुपतेश्चरितं महिमानं च न जानाति । यदि नाम किं-
चिदस्ति वक्तव्यम् । अथवा शान्तम् ।

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते[5]
सुन्दस्त्रीमथनेऽप्यकुण्ठयशसो[6] लोके महान्तो हि ते ।

अभिसंपन्नं सुसत्कृतं यथा तथा । संस्कारेण संप्रदायेन । घ्वनिश्च । इति यद्वदसि ॥ सैनिकानां प्रमाथेनेति ॥ ३१ ॥ दमने विग्रहीतरि रामभद्रे तु विषये निर्वन्धं कर्तुम् ॥३१॥ सिद्धं ह्येतदिति ॥३२॥ 'वीर्यं बले प्रभावे च' इत्यमरः । घ्वनिश्च ॥ ३२ ॥ उन्मादः चित्तविभ्रमः । कोऽप्येष संप्रतीति ॥ ३३ ॥ यस्य लवस्य भृगुनन्दनोऽपि वीरो न । पर्याप्तं यथेप्सितं सप्तभुवनेभ्यः अभयदक्षिणा येभ्यः । पुण्यानि पूतानि रम्याणि च तातः रामः तस्य चरितानि । यः लवः ॥ ३३ ॥ यदिः संभावनायाम् ॥ वृद्धास्ते इति ॥ ३४ ॥ ते रामपादाः वन्द्याः इत्यर्थः । तर्के । वर्तते चरित-

---

१ 'परिभूतोऽयं' न २ 'अभ्युपपन्नानर्पण' न; 'अभ्युपपन्नम्' क. ३ नातिनिर्बन्ध-मर्हसि' ब–घ. ४ 'श्लाघ्यः' ब. ५ 'हुं वर्तते' न. ६ 'दमनेऽप्यपराण्ठयशसः' घ–च.

यानि त्रीण्यपराङ्मुखान्यपि पदान्यासन्खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥ ३४ ॥

चन्द्रकेतुः—आः, तातापवादभिन्नमर्याद, अति हि नाम प्रगल्भसे।

लवः—अये मय्येव भ्रुकुटीमुखः संवृत्तः।

सुमन्त्रः—स्फुरितमनयोः क्रोधेन। तथा हि।

चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः
किंचित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः।
धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रं भ्रुवो-
श्चन्द्रस्योत्कटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ॥ ३५ ॥

कुमारौ—तदितो विमर्दक्षमां भूमिमवतरावः।

(इति निष्क्रान्ताः सर्वे।)

॥ पञ्चमोऽङ्कः ॥

मिति शेषः। दूषणमित्याशयः। सुन्दस्त्री ताटका। हि प्रसिद्धौ। स्त्रीवधकृदिति भावः। यानि त्रीणि पदानि पदक्षेपणानि। कुतः विमुखं (पि मुखं?) मुखं मार्गः येषां तानि कुतोमुखान्यपि आसन्। तत्र तेषु पदेषु। जनोऽभिज्ञः पश्चान्निवृत्त इति भावः। अत एव 'अपासर्पद्धनुर्मात्रम्' इति रामायणे। अथवा इन्द्रसूनुनिधने वालिसंहारे, यत् कौशलं तत्र तस्मिन् कौशलेऽपि। जनोऽभिज्ञः। वञ्चनया वालिनं संजहारेति भावः। तत्रेत्यस्य एकत्र सन्निवेशः अन्यत्रानुषङ्गः। सुन्दस्त्रीति कन्नडेषु ध्वनिः ॥ ३४ ॥ इति एवम्। भ्रुकुटीयुक्तं मुखं यस्य सः भ्रुकुटीमुखः ॥ क्रोधेनोद्धतेति ॥ ३५ ॥ आवेशेन आग्रहेण उद्धतं यथा तथा धूतः चलितः कुन्तलभरः यस्मिन्। वक्त्रं भ्रुवोर्भङ्गेन कौटिल्येन। उत्कटं मत्तं लाञ्छनं हरिणो यस्य तस्य चन्द्रस्य। उद्भ्रान्तः संभ्रान्तः भृङ्गः यस्मिन्। तस्य कमलस्य च कान्ति धत्ते इत्यनेन वक्त्रं चन्द्रकमलबिम्बाकृतिधारीत्येव कवेस्तात्पर्यम्। न तु पाण्डिमा रक्तिमा वा विवक्षितः। अत एव 'किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखम्' इति बिल्हणः ॥ ३५ ॥ विमर्दक्षमां युद्धयोग्याम् इति दिक् ॥ इति महाराजपद*...घनश्यामपण्डितविरचिते उत्तररामचरित-संजीवनाख्यटिप्पणे पञ्चमोऽङ्कः समाप्तः ॥ इति पञ्चमोऽङ्कः ॥

---

१ 'अकुतोभयान्यपि' घ; 'अकुतोमुखानि' न. २ 'तातापवादिन्' च. ३ 'भरः' क-घ-च. ४ 'क्रोधेनोद्धतधूतकुन्तलभरः सर्वाङ्गजो' न-टी. ५ 'कान्तिमिदं च वदनमनयोर्भङ्गेन भिन्नभ्रुवोः' न.

* प्रथमाङ्कटीकासमाप्तौ टीकाकृता यदात्मवृत्तं कथितं तदत्राप्यनुसन्धेयम्.

षष्ठोऽङ्कः ।

(ततः प्रविशति विमानेनोज्ज्वलं विद्याधरमिथुनम् ।)

विद्याधरः—अहो नु खल्वनयोर्विकर्तनकुलकुमारयोरकाण्डकलहप्रचण्डयोरुद्द्योतितक्षत्रलक्ष्मीकयोरत्यद्भुतोक्रान्तदेवासुराणि विक्रान्तचरितानि । तथाहि प्रिये पश्य पश्य ।

रणत्करणझञ्झणत्क्वणितकिङ्किणीकं धनु-
र्ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलम् ।
वितत्य किरतोः शरानविरतं पुनः शूरयो-
र्विचित्रमभिवर्तते भुवनभीममायोधनम् ॥ १ ॥

जृम्भितं च विचित्राय मङ्गलाय द्वयोरपि ।
स्तनयित्नोरिवामन्दं दुन्दुभेर्दुन्दुमायितम् ॥ २ ॥

तत्प्रवर्ततामनयोः प्रवीरयोरनवरतमविरलमिलितविकचकनककमलकमनीयसंहतिरमरतरुतरुणमणिमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः ।

अथ रामकुशलवचन्द्रकेतूनां संलापं वर्णयिष्यन् कविः 'रतोपयामयुद्धादि न साक्षादीरये यदि है (?) इति नाटकलक्षणस्यावश्यकतया विद्याधरमिथुनमुखानुवादेन पञ्चमाङ्कावसानोपक्षिप्तं चन्द्रकेतुलवशस्त्राशस्त्रिसमरघट्टमुट्टङ्कयति—तत इति ॥ विक्रान्तेः शौर्यस्य ॥ रणत्करणझञ्झणेति ॥ १ ॥ रणत्करणेन शब्दानुकरणेन सह झञ्झणन्त्यः दीप्यमानाः । क्वणितयुक्ताः किङ्किण्यो यस्मिन् । ध्वनद्गुरुगुणया अटन्या कोट्या कृतः दारुणकलकलः यस्मिन् । धनुः कर्म । वितत्य प्रसार्य कोटिद्वयकर्षणादुत्तरक्षण इति भावः । अविरतं अनिशं । मुहुः असकृत् । अभिवर्तते समन्ताद्वर्तते ॥ १ ॥ जृम्भितमिति ॥ २ ॥ 'विचित्रं तु विविधेऽपि च विस्मये' इति हलायुधः । द्वयोः मङ्गलाय शुभाय शकुनाय च । स्तनयित्नोर्मेघस्येव । अमन्दं महत् । दुन्दुमायितं शब्दानुकारः कर्तृ । विजृम्भितं आविर्भूतमित्यर्थः ॥ २ ॥ अनवरतं सन्ततम् । अविरलं सान्द्रं यथा तथा । मिलिता कमलानां कमनीया संहतिः सङ्घः यस्मिन् । निकराणां समूहानाम् । मकरन्दैः रम्यश्चासौ पुष्पनिपातः कर्तृपदमेतत् । निपात इति ध्वनिः । तस्मात् किमिति आकाशं

---

१ 'क्षात्र' च–घ. २ 'विलसितानि' न; 'विचरणानि' ग. ३ 'क्षणज्झणितक-कृत' क–ग–घ. ४ 'र्भ रत्नगुरुद्रूयोः' क–घ–च. ५ 'अभिवर्तते' द–न. ६ 'विजृम्भितं च दिव्यता' च–घ–न. ७ 'मन्दं' क–ग–घ. ८ 'शुभाय' क–ग–घ.

विद्याधरी—ता किं ति उण अआण्डविप्फुरिदतडिच्छडाकडारं विअ अम्बरं झत्ति संवुत्तम्। तत्किमिति पुनरकाण्डविस्फुरिततडिच्छटाकडारमिवाम्बरं झटिति संवृत्तम्।

विद्याधरः—तत्किं नु खल्वद्य

त्वष्टृयन्त्रभ्रमिभ्रान्तमार्तण्डज्योतिरुज्ज्वलः।
पुटभेदो ललाटस्थनीललोहितचक्षुषः॥ ३॥

आं ज्ञातम्। जातक्षोभेण चन्द्रकेतुना प्रयुक्तमप्रतिरूपमस्त्रमाग्नेयम्। यस्यायमचिरच्छटासंपातः। संप्रति हि। आश्चर्यम्।

अवदग्धकर्बुरितकेतुचामरै-
रपयातमेव हि विमानमण्डलैः।
दहति ध्वजांशुकपटावलीमिमां
नवकिंशुकद्युतिसविभ्रमः शिखी॥ ४॥

प्रवृत्त एवायमुच्चण्डवज्रखण्डावस्फोटपटुरवस्फुलिङ्गगुरुरुत्तालतुमुललेलिहानोज्ज्वलज्वालासंभारभैरवः भगवानुषर्बुधः। प्रचण्डश्चास्य सर्वतः सन्तापः। तत्प्रियामञ्चलेनाच्छाद्य सुदूरमपसरामि। (तथा करोति।)

ताण्डवितोद्दण्डतरलतटिच्छटाकडारमिव झडिति संवृत्तम्। 'उद्दण्ड' इति बहुलवाचको देशीयश्शब्दः। 'उद्दण्ड' इति महाराष्ट्राः। 'छटा परम्परा' इति जयः॥ **त्वष्टृयन्त्रभ्रमीति**॥ ३॥ **त्वष्टुः** विश्वकर्मणः। **यन्त्रं** शाणचक्रम्। तस्य **भ्रम्या** भ्रमणेन। **भ्रान्तस्य** मार्तण्डस्य। **ज्योतिषा उज्ज्वलः**। 'आकाशगङ्गियाम्' इति रभसः। **नीललोहितस्य** रुद्रस्य। **चक्षुषः** नेत्ररूपाग्नेः। **पुटभेदः**। 'मृत्तिकापञ्जरे पुटः' इति त्रिकाण्डी। 'मूस' इति महाराष्ट्राः। तथा च गगनपुटे आग्नेयास्त्रमिदं मार्तण्डवत् रुद्रनेत्राग्निवद्दुस्सहमिति भावः॥ ३॥ **अप्रतिरूपं** अप्रतिद्वन्द्वम्। अचिरात् झटिति **संपातः** पतनं यस्य॥ **अवदग्धकर्बुरितेति**-॥ ४॥ **अवदग्धानि कर्बुरितानि** संजातचित्रवर्णानि **चामराणि** येषु। **किंशुकद्रुम** इव **सविभ्रमः** सविलासः। अनेनारण्यं सूचितम्। **शिखी** अग्निः॥ ४॥ **खण्डावस्फोटैः** शकलकणैः **पटुः**। **उत्तालाः** उद्धताः। **तुमुललोलाः** रणसंकुलतरलाः। **लेलिहानाः** ये **उज्ज्वलाः** तेषां **संभारैः भैरवः उषर्बुधः** अग्निः। 'उत्ताल-

---

१ 'त्वाष्ट्र' क-ख-च. २ 'अप्रतिरूपम्' इति नास्ति क-घ-च-पुस्तकेषु. ३ 'अचिरच्छर°' न. ४ 'कर्बरित' न. ५ 'दधति ध्वजांशुकपटाञ्चलेष्विमाः क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः' क-घ-च. ६ 'पटुतर' घ-च; 'पटुरटवं' न. ७ 'अंशुकेन' न.

विद्याधरी—दिट्ठिआ एदेण विमलमुत्ताफलअसीदलसिणिद्धमसिणमंसलेण णाहदेहप्फंसेण आणन्दमंदमुउलिदघुण्णन्तलोअणाए अद्धोदिदो जेव्व अन्दरिदो मे संदावो। दिष्टया एतेन विमलमुक्ताफलकशीतलस्निग्धमसृणमांसलेन नाथदेहस्पर्शेनानन्दमन्दमुकुलितघूर्णमानलोचनाया अर्धोदित एवान्तरितो मे सन्तापः।

विद्याधरः—अयि किमत्र मया कृतम्। अथवा।

> अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
> तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥ ५॥

विद्याधरी—कहं अविरलविलोलघुण्णन्तविज्जुल्लदाविलासमंडिदेहिं मत्तमोरकण्ठसामलेहिं ओत्थरीअदि णभोङ्गणं जलहरेहिं। कथमविरलविलोलघूर्णमानविद्युल्लताविलासमण्डितैर्मत्तमयूरकण्ठश्यामलैरवस्तीर्यते नभोङ्गणं जलधरैः।

विद्याधरः—हन्त कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वेषः। कथमविरलप्रवृत्तवारिधारासहस्रसम्पातैः प्रशान्तमेव पावकास्त्रम्।

विद्याधरी—पिअं मे पिअं मे। प्रियं मे प्रियं मे।

स्तूद्वते' इति, 'लेलिहानस्तु भक्षकः' इति। 'सामग्र्यामपि संभारः' इति धरणिहारावलीकेदाराः॥ दिष्ट्या एतेन विमलमुक्ताफलशीतलस्निग्धमसृणमांसलेन नाथदेहस्पर्शेन आनन्दमन्दमुकुलितघूर्णमानलोचनाया अर्धोदित एवान्तरितो मे सन्तापः। **स्निग्धः** चिक्कणः। 'मनोहरे च मसृणम्' इत्यमरमाला। **मांसलो** निबिडः। **आत्मनि उदितः** जातः। **अन्तरितः** अन्तर्हित एव॥ **अकिञ्चिदपि कुर्वाण** इति॥ ५॥ किञ्चिन्न भवतीत्यकिञ्चित्। किञ्चिदपि न कुर्वाण इत्यर्थः। **यः प्रियो जनः। सौख्यैः यस्य दुःखान्यपोहति** दूरीकरोति, **तस्य** दुःखमुक्तस्य तत्सौख्यैः दुःखहर्ता जन इति भावः। **किमपि** अनिर्वाच्यम्। **द्रव्यं** गुणाश्रयो हि। द्रव्यविधेयत्वात्तदिति नपुंसकत्वेन निर्देशः॥ ५॥ कथमविरलविलोलवलगद्विद्युल्लताविलासमण्डितैः मत्तमयूरकण्ठश्यामलैः अवस्तीर्यते नभोऽङ्गणं जलधरैः। वल्गनार्थको 'घोलन्त'शब्दो देशीयः। 'घोळतो' इति **महाराष्ट्राः**॥ प्रियं मे प्रियं मे। **अतिमात्रं** अतिशय इत्यर्थः। **क्षोभेण गम्भीरं** यथा तथा प्रवर्षद्भिर्मेघैः। **नद्धं** संबद्धम्। प्रवासवाचको 'गलगल' शब्दो देशीयः। 'गळगा' इति **महाराष्ट्राः**। 'सान्द्रस्नि-

---

१ 'अप्पोदिदो' (अल्पोदितः) क; एतानि घ–च–पुस्तकयोः. २ 'न किञ्चिदपि' क–न.

विद्याधरः—हन्त हन्त भोः सर्वमतिमात्रं दोषाय। यत्प्रलयवाताचलिक्षोभगम्भीरगुलुगुलायमानमेघमेदुरान्धकारनीरन्ध्रनद्धमिव एकवारविश्वग्रसनविकटविकरालकालमुखकन्दरविवर्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्वद्वारनारायणोदरनिविष्टमिव भूतजातं प्रवेपते। साधु चन्द्रकेतो साधु। स्थाने वायव्यमस्त्रमीरितम्। यतः।

विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्तानां क्वापि प्रविलयः कृतः॥ ६॥

विद्याधरी—णाध को दाणिं एसो संभमुक्खित्तकरब्भमिदोत्तरिआञ्चलो दूरदो जेव्व महुरसिणिद्धवअणपडिसिद्धजुद्धव्वावारो एदाणं कुमाराणं अन्दरे विमाणवरं ओदरावेदि। नाथ क इदानीमेष संभ्रमोत्क्षिप्तकरभ्रमितोत्तरीयाञ्चलो दूरत एव मधुरस्निग्धवचनप्रतिषिद्धयुद्धव्यापार एतयोः कुमारयोरन्तरे विमानवरमवतारयति।

विद्याधरः—(दृष्ट्वा) एष शम्बूकवधात्प्रतिनिवृत्तो रघुपतिः।

शान्तं महापुरुषसङ्गदितं निशम्य
तद्गौरवात्समुपसंहृतसंप्रहारः।

न्धस्तु मेदुरः' इत्यमरः। **एकवारं** सकृत्। **विकटः** कुटिलः। **कन्दरे विवर्तमानं** परिणममानम्। **निद्रया निरुद्धानि** आवृतानि **सर्वद्वाराणि** शरीरस्थनवद्वाराणि यस्य। **निविष्टं** प्रविष्टमिव यत् तद् **भूतजातं** प्राणिसमूहः **प्रवेपते** इति अन्वयो योज्यः॥ **विद्याकल्पेनेति**॥ ६॥ **विद्यायाः** मोक्षसाधनीभूतवेदान्तस्य **कल्पेन** परिशीलनेन। 'कल्पो योगे च परिशीलने' इति धनञ्जयः। **ब्रह्मणि विवर्तानां** जगतां **प्रविलयः** ऐक्यमिव। **मरुता** वायुना **मेघानां क्वापि** प्रकरण इति शेषः। **प्रविलयः** प्रसारणम्। कृतम्॥ ६॥ नाथ क इदानीमेष संभ्रमोत्क्षिप्तोत्तरीयाञ्चलः दूरत एव मधुरस्निग्धवचनप्रतिषिद्धव्यापारः कुमारयोरन्तरे विमानोपरिचरो व्याहरति। वस्त्रधूननं निषेधव्यञ्जकं इति जगदनुभवसिद्धम्। **अन्तरे** मध्ये ध्वनिश्च॥ **शान्तं महापुरुषेति**॥ ७॥ **शान्तं** सौम्यम्। ध्वनिश्च। **महापुरुषस्य** रामस्य। **संगतकं** हृदयङ्गमम्। स्वार्थे कः इति कश्चित्। तन्न, 'शिरोऽम्बुवचनेषु कम्' इति केदारः। कल्यासङ्गतमित्यस्य हृदयङ्गमवचनमित्यर्थं इति कथनस्यैवोचितत्वात्। **संप्रहारः** युद्धम्। शान्तो लव इति ध्वनिः। तुकारः पादपूरणे

---

१ 'गुमगुमायमान' घ; 'गुणगुणायमान' व. २ 'निवद्धम्' व–घ. ३ 'विपद्यते' व. ४ 'शब्दं' व–घ. ५ 'संविहितं' व–ङ.

शान्तो लवः प्रणत एव च चन्द्रकेतुः
कल्याणमस्तु सुतसङ्गमनेन राज्ञः ॥ ७ ॥

तदित्तस्तावदेहि । (इति निष्क्रान्तौ ।)

मिश्रविष्कम्भकः ।

(ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च ।)

रामः—(पुष्पकादवतरन् ।)

दिनकरकुलचन्द्र चन्द्रकेतो
सरभसमेहि दृढं परिष्वजस्व ।
तुहिनशकलशीतलैस्तवाङ्गैः
शममुपयातु ममापि चित्तदाहः ॥ ८ ॥

(उत्थाप्य सस्नेहास्रं परिष्वज्य ।) अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य ।

चन्द्रकेतुः—कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य लवस्य लाभाभ्युदयेन । तद्विज्ञापयामि मामिव विशेषेण वा मत्तः स्निग्धेन चक्षुषा पश्यत्वमुं वीरमनरालसाहसं[2] तातः ।

रामः—(लवं निरूप्य ।) दिष्ट्या अतिगम्भीरमधुरकल्याणाकृतिरयं वयसो वत्सस्य ।

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोशस्य गुप्त्यै ।
सामर्थ्यानामिव समुदयः सञ्चयो वा गुणाना-
माविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥ ९ ॥

लवः—(स्वगतम् ।) अहो पुण्यानुभावदर्शनोऽयं महापुरुषः ।

इति केचित् । चन्द्रकेतुस्त्वित्यन्ये । स चन्द्रकेतुरिति वा पाठः । सुतयोः सङ्गमनेन प्राप्त्या । सङ्गमने इति सप्तमीलाभाय राज्ञ इति ध्वनिः ॥ ७ ॥ मिश्रविष्कम्भ इति 'उदात्तनीचपात्रोक्तौ मिश्रविष्कम्भः' इति लक्षणात् । दिनकरकुलेति ॥ ८ ॥ 'श्रेष्ठार्थे चन्द्रहंसाद्याः' इति मेदिनी । दाहः तापः ॥ ८ ॥ अनरालं मञ्जु ॥ त्रातुं लोकानिवेति ॥ ९ ॥ धर्मः क्षात्रो यः धर्मः आचार एव कोशः अर्थापः । समुदयः संचयश्च समूहः । ध्वनिश्च । जगतः पुण्यनिर्माणानां सुकृतविरचनानाम् । राशिः पुञ्जः ॥ ९ ॥ पुण्यस्य अनुभावः प्रभावः यस्मात् तादृशं दर्शनं आलोकनं यस्य । पुण्या-

---

१ 'संमिलनेन' घ. २ 'महावीरमकाण्डम्' क-घ-प.

आश्वासस्नेहभक्तीनामेकमायतनं महत् ।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्तिसुन्दरः ॥ १० ॥

आश्चर्यम् ।

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।
झटित्यस्मिन्दृष्टे किमिव परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥ ११ ॥

रामः—तत्किमयमेकपद एव मे दुःखविश्रामं ददात्युपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम् । अथवा स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् ।

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते ।

नि पवित्ररम्याणि । अनुभावः सन्मतिनिश्चयः । दर्शनानि शास्त्राणि च यस्मिन् । 'अनुभावः प्रभावे च सतां च मतिनिश्चये' इत्यमरः ॥ आश्वास इवेति ॥ १० ॥ **आश्वासस्नेहयोः** सान्त्वनप्रणययोः स्वनिष्ठयोरिति भावः । **भक्तीनां** परकर्तृकाणामिति भावः । एकं अद्वितीयम् । **आयतनं** स्थानम् । **प्रकृष्टस्य** आवश्यकस्य । **धर्मस्य** अश्वमेधादेः । 'यजेतावश्यकैर्मुख्यैः' इति स्मरणात् । **मूर्त्या सुन्दरः** मूर्तिः शरीरं सुन्दरं यस्येति वा । सौन्दर्येण मूर्त इति भावः । प्रसादः अनुग्रह इव स्थित इति शेषः । तथा चाश्वमेधस्यैव फलं राम इति भावः ॥ १० ॥ **विरोधो विश्रान्त** इति ॥ ११ ॥ सः प्रसिद्धः । **विश्रान्तः** विरतः वीरो **रसः निर्वृतिघनः** सुखसान्द्रः सन् । **प्रसरति** व्याप्तो भवति । तत् परभयङ्करम् । **प्रह्वयति** नक्षयति । **अस्मिन्** महापुरुषे । 'पराधीनः परवान्नाथवानपि' इत्यमरः । **यदि वा** अथवेत्यर्थः । 'यद्वोत यदि वाथवा' इति विक्रमार्कः । **तीर्थानां** गुरूणामिव । **महतां** पूज्यानाम् । **महार्घः** उत्सवपूर्वकपूजाविधिरित्यर्थः । 'मह उत्सवे' इति, 'पूजाविधावर्घः' इति चामरः । **कोऽपि अतिशयो** हि ॥ ११ ॥ 'सहसा स्यादेकपदे' इति नन्दी । **दुःखाय विश्रामं** विरतिं अभावमिति यावत् । **कुतः** कस्मादपि । **निमित्तात्** कारणात् । **निमित्तेन सव्यपेक्षः** सापेक्ष इत्येतत् । **विप्रतिषिद्धं** विशेषेण निषिद्धमित्यर्थः ॥ तदेवोपपादयति ॥ **व्यतिषजति** इति ॥ १२ ॥

---

१ 'आश्वास इव भक्तीनामेकम्' न; 'एकमालम्बनं' क-घ-त. २ '०सुन्दरः' ३ 'किमिति' न; 'किमपि' क.

विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ १२ ॥

लवः—चन्द्रकेतो क एते ।

चन्द्रकेतुः—प्रियवयस्य ननु तातपादाः ।

लवः—ममापि तर्हि धर्मतस्तथैव । यतः प्रियवयस्य इति भवतोक्तम् । किं तु चत्वारः खलु भवतामेवंव्यपदेशभागिनस्तत्रभवन्तो रामायणकथापुरुषाः । तद्विशेषं ब्रूहि ।

चन्द्रकेतुः—ननु ज्येष्ठतातपादा इत्यवेहि ।

लवः—(सोल्लासम् ।) कथं रघुनाथ एव । दिष्ट्या सुप्रभातमद्य यदयं देवो दृष्टः । (सविनयकौतुकं निर्वर्ण्य ।) तात प्राचेतसान्तेवासी लवोऽभिवादयते ।

रामः—आयुष्मन् एह्येहि । (इति सस्नेहमालिङ्ग्य ।) अयि वत्स कृतं कृतमतिविनयेन । अनेकवारमपरिश्लथं परिष्वजस्व माम् ।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः ।
नन्दयति चन्द्रचन्दननिष्यन्दजडस्तव स्पर्शः ॥ १३ ॥

लवः—(स्वगतम् ।) ईदृशो मां प्रत्यमीषामकारणस्नेहः । मया पुनरेभ्य एव द्रोग्धुमज्ञेनायुधपरिग्रहः कृतः । (प्रकाशम् ।) मृष्यन्त्विदानीं लवस्य बालिशतां तातपादाः ।

आन्तरः अन्तःकरणात्मको हेतुः । पदार्थान् प्रतिरूपान् । व्यतिषजति व्यतिषक्तान् संबद्धान् करोतीत्यर्थः । 'व्यतिषजति संबध्नाति' इति श्रीनाथः । 'उपाधिस्तु निमित्ते च' इति हेमचन्द्रः। तत्रोदाहरणमाह—वीति । पतङ्गस्य रवेः । पुण्डरीकं सिताम्भोजम् । हिमरश्मौ चन्द्रे । उद्गते उदिते सति । चन्द्रकान्तशिला । द्रवति स्रवतीति माठरः । तथा च अतिदूरे रवौ चन्द्रेऽप्युदिते यथा पुण्डरीकं विकसति चन्द्रकान्तश्च द्रवति । तथैव केनाप्यान्तरहेतुना प्रीतयो वर्धन्ते। नात्र निमित्तापेक्षेति भावः।'प्रतिस्नेहः प्रेम्णा च' इति वामनः ॥ १२ ॥ क एत इति पूजायां बहुत्वम् । तथैव तातपादा इत्यर्थः। भवतामिति पूजायाम् । कुशलवचन्द्रकेतुप्रमुखानामिति च व्यज्यते । भवत इति च पाठः । एवं व्यपदेशः तातेति व्यवहारः स एव भागः येषामस्ति ते भागिनः । तत्रभवन्तः पूज्याः । 'व्यपदेशस्तु व्यवहारः' इति [illegible]रावर्तः । तेषु विशेषम् । अपरिश्लथं दृढम् ॥ परिणतकठोरेति ॥१३॥ परिणत-

---

१ 'अङ्गेन मामपरिश्लथं परिरम्भस्व' न. २ 'अभिद्रुग्धमनेन मदायुधपरिमर्दं यावदध्यारूढो दुर्योगः' क-घ-व.

रामः—किमपराद्धं वत्सेन ।

चन्द्रकेतुः—अश्वानुयात्रिकेभ्यस्तातप्रतापाविष्करणमुपश्रुत्य वीरायितमनेन ।

रामः—नन्वयमलङ्कारः क्षत्रस्य ।

न तेजस्तेजस्वी प्रसृतमपरेषां वि[1]षहते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति ॥ १४ ॥

चन्द्रकेतुः—अमर्षोऽप्यस्यैव शोभते महावीरस्य । पश्यन्तु हि तातपादाः प्रियवयस्यनि[2]युक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि सर्वतः सैन्यानि ।

रामः—वत्स लव संह्रियतामस्त्रम् । त्वमपि चन्द्रकेतो निर्व्यापारविलक्षितानि सान्त्वय बलानि ।

लवः—यथाज्ञापयति तातः । (इति प्रणिधानं नाटयति ।)

चन्द्रकेतुः—यथादिष्टम् । (इति निष्क्रान्तः ।)

लवः—तात प्रशान्तमस्त्रम् ।

रामः—वत्स सरहस्यप्रयोगसं[3]हाराण्यस्त्राण्याम्नायवन्ति ।

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परः[4]सहस्राः शरदस्तपांसि ।

कठोरपुष्कराणां विकचतरुणारविन्दानाम् । आन्तरपुटवत् पीनः स्थूलः । जडः शिशिरः ॥ द्रोग्धुं द्रोहं कर्तुम् । वालिशतां मौर्ख्यम् । वीरवदाचरितं वीरायितं पौरुषं कृतमित्यर्थः । ध्वनिश्च ॥ न तेजस्तेजस्वीति ॥ १४ ॥ प्रसृतं व्याप्तम् । तस्य तेजस्विनः । प्रकृतिनियतत्वात् जन्मसिद्धत्वात् । 'जन्मस्थितिस्वभावेषु प्रकृतिः' इति कपिलः । अकृतकः अकृत्रिमः । मयूखैः किरणैः । अश्रान्तं अनिशम् । तपति यदि तपति चेत् । आग्नेयग्रावा 'सूर्यकान्तस्त्वग्निमणिः' इति, 'विकृतः स्याद्विप्रकृतः' इति चामरः । 'तस्मिन् विप्रकृताः काले' इति ईश्वरकृष्णमिश्रः ॥१४॥ निर्व्यापाराणि व्यापाररहितानि । अत एव विलक्षणा(क्षिता?)नि । बलानि सैन्यानि । प्रणिधानं ध्यानम् । सरहस्याः जृम्भकाणां प्रयोगोपसंहाराः येषु तानि । पाराय-

---

१ 'प्रसहते' घ–व. २ '०नियुक्तेन जृम्भकास्त्रेण विक्रम्य स्तम्भितानि सर्वसैन्यानि' न. ३ '०संहारजृम्भकास्त्राणि दिष्टया वत्सस्यापि संपद्यन्ते' न. ४ 'परःसहस्रं' क–न.

एतान्यपश्यन्गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि ॥ १५ ॥

अथैतन्मन्त्र[1]पारायणोपनिषदं भगवान्कृशाश्वः परःसहस्रसंव[2]त्सरान्तेवासिने कौशिकाय प्रोवाच । स तु भगवान्मह्यमित्येष गु[3]रुपूर्वानुक्रमः । कुमारस्य कुतः संप्रदाय इति पृच्छामि ।

लवः—स्वतःप्रकाशान्यावयोरस्त्राणि ।

रामः—(विचिन्त्य ।) किं न संभाव्यते । प्रकृष्टपुण्यपरिपाकोपादानः कोऽपि महिमा स्यात् । द्विवचनं तु कथम् ।

लवः—भ्रातरावावां यमौ ।

रामः—स तर्हि द्वितीयः कः ।

(नेपथ्ये ।) दाण्डायन

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै-
रायोधनं ननु किमात्थ सखे तथेति ।
अद्यास्तमेतु भु[4]वनेष्वधिराजशब्दः
क्षत्रस्य शस्त्रशिखिनः शममद्य यान्तु ॥ १६ ॥

रामः—अथ कोऽयमिन्द्रमणिमेचकच्छवि-
र्ध्वनिनैव बद्धपुलकं करोति माम् ।
नवनीलनीरधरधीरगर्जित-
क्षणबद्धकुड्मलकदम्बडम्बरम् ॥ १७ ॥

लवः—अयमसौ मम ज्यायानार्यः कुशो नाम भरताश्रमात्प्रतिनिवृत्तः ।

रामः—(सकौतुकम् ।) वत्स इत एवाहूयैतमायुष्मन्तम् ।

लवः—एवम् । (इति परिक्रामति ।)

णस्य पठनस्य । उपनिषदं । वत्सरेभ्यः प्रभृति । अन्तेवासिने शिष्याय । गुरूणाम् । कुतः कस्मात् । पुण्यानां परिपाकः परिणाम एव उपादानं कारणं यस्य । उपादानमिति यमाविति च ध्वनी । तथा अतिशयेनेत्यर्थः ॥ आयुष्मतः किलेति ॥ १६ ॥ क्षत्रस्य रामस्येति भावः । शस्त्राण्येव शिखिनः अग्नयः ॥ १६ ॥ अथ कोऽयमिन्द्रेति ॥१७॥ इन्द्रमणिवत् मेचका नीला छविः कान्तिः यस्य । धीरगर्जितक्षणे गम्भीरस्तनितक्षणे । बद्धकुड्मलः यः कदम्बो नीपः तस्य डम्बरः आरभटी यस्य तम् ।

---

1 'अथैतामस्त्रमन्त्रोपनिषदम्' ग—क. 2 'सहस्राधिकसंवत्सरपरिचर्यानिरतायान्ते०' ग. 3 'पूर्वानुक्रमः' घ; 'क्रमः' घ. 4 'भुवनेषु च राज०' ग.

(ततः प्रविशति कुशः ।)

कुशः—(साकूतहर्षधैर्यं[1] धनुरास्फालयन् ।)

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादा मनो-
  र्दृप्तानां दहनाय[2] दीपितनिजक्षत्रप्रतापाग्निभिः ।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो
  दीप्तास्त्र[3]स्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः ॥ १८ ॥

(इति विकटं परिक्रामति ।)

रामः—कोऽप्यस्मिन्क्षत्रियपोतके पौरुषातिरेकः ।

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
  धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
  वीरो रसः किमयमेत्युत दर्प एव ॥ १९ ॥

लवः—(उपसृत्य ।) जयत्वार्यः ।

कुशः—नन्वायुष्मन् किमियं वार्ता युद्धं युद्धमिति ।

लवः—यत्किंचिदेतत् । आर्यस्तु दृप्तभावमुत्सृज्य[4] विनयेन वर्तताम् ।

कुशः—किमर्थम् ।

'आर्भटी चारभटीकाडम्बरश्च' इति रुद्रः ॥ १७ ॥ दत्तेन्द्राभयेति ॥ १८ ॥ **वैवस्वतान्मनोरागतैः** जातागमैः । संभूतैरिति यावत् । **दृप्तानां** गर्वितदैत्यानाम् । **आदित्यैः** वैकर्तनैः । 'ऐक्ष्वादिजनकादित्यवैदेहरघवो दिशः' इत्यगस्त्यः । सावित्रैरिति च पाठः । **ततः** विस्तृतः । **विग्रहो यदि** युद्धं चेत् । **धनुः** । **दीप्तास्त्राण्येव स्फुरन्तौ उग्रदीधिती** अग्निसूर्यौ तयोः शिखाभिः ज्वालाभिः । **नीराजिता** कृतनीराजना । गुम्भि(म्फि?)तेति यावत् । **ज्या** मौर्वी यस्मिन् तादृशं शोभतामिति शेषः । धनुर्मे योजितास्त्रं भवत्विति भावः ॥१८॥ **क्षत्रपोते** क्षत्रियडिम्भे । **पौरुषस्य** सामर्थ्यस्य । **अतिरेकः** आधिक्यम् ॥ दृष्टिस्तृणीकृतेति ॥१९॥ **जगत्त्रये** सत्त्वाः । 'बलाधिके च सत्त्वोऽस्त्री' इत्यमरशेषः । **गतिः** गमनम् । पादार्पणकम इति यावत् । 'बाल्ययौवनमध्यस्थं वयः कौमारकं विदुः ।' इति नन्दी । **गुरुतां** गुणत्वं गुणविशेषं महत्त्वं च । **गिरिवदिति** कथनं गुरुतायां सार्वकालिकत्वसूचकम् । **उत** अथवा । 'औद्धत्यव्यञ्जको दर्पः ।' इति शोवर्धनः ॥ १९ ॥ युद्धमित्यनादरे । यत्किञ्चिदिति कथनं आत्मसदृशयुद्धाभावज्ञापकम् । **दृप्तभावं** दर्पम् ।

---

१ 'सक्रोधं कृतधैर्यं' न. २ 'दमनाय' न. ३ 'दीप्तास्त्र०' न–प–च. ४ 'उत्सृज्यार्योऽस्मिन् विनयेन' प–घ.

लवः—यदत्र देवो [1]रघुपतिस्तिष्ठति । स च स्निह्यत्यावयोरुत्कण्ठते च युष्मत्संनिकर्षस्य ।

कुशः—(सतर्कम् ।) स रामायणकथानायको ब्रह्मकोशस्य गोपायिता ।

लवः—अथ किम् ।

कुशः—आशंसनीयपुण्यदर्शनः स महात्मा । किं तु कथमस्माभिरुपगन्तव्य इति न संप्रधारयामि ।

लवः—यथैव गुरुस्तथोपसदनेन ।

कुशः—कथं हि नामैतत् ।

लवः—अत्युदात्तः सुजनश्चन्द्रकेतुरौर्मिलेयः प्रियवयस्येति सख्येन मामुपतिष्ठते । तेन तत्सम्बन्धेन धर्मतात एवायं राजर्षिः ।

कुशः—संप्रत्यवचनीयो राजन्येऽपि प्रश्रयः ।

(उभौ परिक्रामतः ।)

लवः—पश्यत्वेनमार्यो महापुरुषमाकारानुभावगाम्भीर्यसम्भाव्यमानविविधलोकोत्तरसुचरितातिशयम् ।

कुशः—(निर्वर्ण्य ।)

अहो प्रासादिकं रूपमनुभावश्च पावनः ।
स्थाने रामायणकविर्देवीं वाचं [2]व्यवीवृतत् ॥ २० ॥

(उपसृत्य) तात प्राचेतसान्तेवासी कुशोऽभिवादयते ।

रामः—एह्येह्यायुष्मन् ।

आवयोरिति सप्तमीद्विवचनम् । आतङ्कः । ब्रह्माण एव विप्राः त एव कोशः अर्थौघः । 'वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः' इत्यमरः । 'गुरुस्तात उपाध्यायः' इति घटत इति शेषः । उदात्तः महान् । और्मिलेयः ऊर्मिलापुत्रः । 'सख्यं साप्तपदीनम्' इत्यमरः । राजन्ये क्षत्रियविषये । प्रश्रयः विनयः । ...श्रासः इति रभसः । आकारानुभावस्य स्वरूपप्रभावस्य । गाम्भीर्येण ॥ अहो प्रासादिकमिति ॥ २० ॥ प्रासादिकं प्रसादनदानम् । 'माहात्म्ये चानुभावः' इति कपिलः । वाल्मीकिः रामायणमुद्दिश्य । वाचं सरस्वतीम् । व्यवीवृतत् वर्तयति स्मेत्यर्थः । परिणमयति स्मेति यावत् । स्थाने युक्तम्

---

१ 'रघुनन्दनः स्थितः । स रामायणकथानायको ब्रह्मकोशस्य गोप्ता' इति लववाक्यं न-पुस्तके. २ 'अर्वावृतत्' क; 'अर्वावृधत्' न.

अमृताध्मातजीमूतस्निग्धसंहननस्य ते[१] ।
परिष्वङ्गाय[२] वात्सल्यादयमुत्कण्ठते जनः ॥ २१ ॥

(परिष्वज्य । स्वगतम् ।) तत्किमपर्यमयं[३] दारकः ।

अङ्गादङ्गात्स्रुत[४] इव निजस्नेहजो[५] देहसारः
प्राडुर्भूय स्थित इव बहिश्चेतनाधातुरेकः[६] ।
सान्द्रानन्दक्षुभितहृदयप्रस्रवेनेव[७] सृष्टो
गात्रं श्लेषे[८] यदमृतरसस्रोतसा सिञ्चतीव ॥ २२ ॥

लवः—तात ललाटंतपो[९] घर्मांशुः । तदत्र सालवृक्षच्छाये मुहूर्तमासनपरिग्रहं करोतु तातः ।

रामः—यदभिरुचितं वत्सस्य ।

(सर्वे परिक्रम्य यथोचितमुपविशन्ति ।)

रामः—(स्वगतम् ।)

अहो प्रश्रययोगेऽपि गतिस्थित्यासनादयः ।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च ॥ २३ ॥

॥ २० ॥ **अमृताध्मातेति** ॥ २१ ॥ **अमृतेन** सुधया । **आध्मातः** पूरितः यः **जीमूतः** मेघः । तस्येव **स्निग्धं संहननं** वपुः यस्य । 'मसृणश्यामयोः स्निग्धम्' इति शाश्वतः ॥ २१ ॥ **अङ्गादङ्गादिति** ॥ २२ ॥ 'अङ्गादङ्गादिति' श्रुतिः । ...यवः । **निजस्नेहजः** स्वप्रेमसंभवः । **सारो** बलः **एको** मुख्यः । **चेतनायाः धातुः** । 'कामोद्रेके चेतने' इति, 'धातुः स्यादश्मविकृतौ' इति शब्दमालाशब्दार्णवौ । **आनन्देन क्षुभितः** स्थानाद्भ्रष्टश्चासौ **हृदयप्रस्नवः** तेन सिक्तः । प्रस्नवः आर्द्रता । 'पाह्नता' (पान्हा ?) इति **महाराष्ट्राः** । **स** तादृशः सभ...यावत् । **आश्लेषः** आलिङ्गनम् । **मम मे हिमश्च्योतं** तुहिननिर्गलनम् । **आ** समन्तात् **शंसतीव** । एतदालिङ्गनमतिसुखशीतलमिति भावः ॥ २२ ॥ 'कठोर...रूर्ध्वं दृष्टो रविः करैः । यदा ललाटं तपति स्याल्ललाटन्तपस्तदा ॥' इत्यमरशेषः । 'भूर्जस्तु सरलस्सालः' इति **धन्वन्तरिः** । **आसनपरिग्रहं** आसनं गृहाण । ध्वनिश्च ॥ **अहो प्रश्रययोगेऽपीति** ॥ २३ ॥ **प्रश्रययोगे** अनन्यकर्तृकविनययोगेऽपि । स्वस्यैवोपचारकतादशायामपीति भावः । 'योगस्सनहनोपायध्यानसंगतियुक्तिषु' इत्यमरः । **स्थितिः** अवस्थानम् । **आसनं** उपवेशनम् । **आदि**शब्देन भाषणादिकं गृह्यते । **भावाः** चेष्टाः लक्षणानि च ।

---

१ 'सिंह' घ. २ 'परिष्वङ्गस्य' ब. ३ 'तत्किमित्ययं च दारकः' न. ४ 'स्नुत' घ–ब. ५ 'निजो देहजः स्नेहसारः' घ–ब. ६ 'एव' क–घ. ७ 'प्रस्नवेणावसिक्तः' न. ८ 'गाढाश्लेषः स हि मम हिमच्योतमाशंसतीव' न. ९ 'ललाटंतपस्तपति' न.

वपुरवियुतसिद्धा एव लक्ष्मीविलासाः
प्रतिकलकमनीयां कान्तिमुद्भेदयन्ति ।
अमलिनमिव चन्द्रं रश्मयः स्वे यथा वा
विकसितमरविन्दं विन्दवो माकरन्दाः ॥ २४ ॥

भूयिष्ठं च रघुकुलकुमारच्छायामनयोः पश्यामि ।

कठोरपारावतकण्ठमेचकं
वपुर्वृषस्कन्धसुबन्धुरांसकम् ।
प्रसन्नसिंहस्तिमितं च वीक्षितं
ध्वनिश्च मङ्गल्यमृदङ्गमांसलः ॥ २५ ॥

(निपुणं निरूप्य ।) अये न केवलमस्मत्संवादिन्याकृतिः ।

अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।

'भावस्सत्तास्वभावाभि......लक्षणे' इति कपिलः ॥ २३ ॥ भङ्ग्यन्तरेणाहं ॥ **वपुरवियुतसिद्धे**ति ॥ २४ ॥ **वपुषा अवियुताः** अवियुक्ताः सन्तः । **सिद्धाः** सहजसिद्धाः इति यावत् । 'काष्ठा त्रिंशत्तु ताः **कलाः**' इति **हरदत्तः** । **उद्भेदयन्ति** प्रकाशयन्ति । **स्वे** आत्मीयाः । 'स्वो ज्ञातावात्मनि **स्वं** त्रिष्वात्मीये स्वोऽस्त्रियां धने' इत्यमरः । **माकरन्दाः** मकरन्दसंबन्धिनः । **यथा** वेत्युपमानपदम् । 'यथैव वा व यद्वच्च यथा वा' इति केदारः ॥ २४ ॥ 'भूयिष्ठस्थितं' इत्यमरः । रघुकुलस्यैव कुमारमिति विवेकः ॥ **कठोरपारावते**ति ॥ २५ ॥ **कठोरः** तरुण इति यावत् । **'मेचक**श्याम.........मनोहरम्' इति विक्रमार्कः । **सुकारः** पादपूरकः । त्र्यर्थ इति बहवः । **वीक्षितं** अवलोकनं । **प्रसन्नं** च तत् **सिंहस्येव** स्तिमितं निश्चलमित्यर्थः । माङ्गल्य...सौ **मृदङ्गस्येव मांसलः** गम्भीर इति भावः । 'मङ्गले साधु मङ्गल्यं' इति नन्दी । 'सर्वमङ्गलमङ्गल्ये' इति **श्रीसूक्तभाष्ये** स्पष्टमेतत् ॥ **अपि जनकसुताया** इति ॥ २६ ॥ तत्तत् चिह्नमिति धे...यमजागलस्तनोपमम् । **शिशू** इति प्रेमोपचारः बालावित्यर्थः । अपिस्संभावनायाम् । 'धन्यो मातृमुखस्सुतः' इति मयसिद्धान्तमनुसरन् ।

---

१ 'अविहित' क–ध–च. २ 'प्रतिजनकमनीयं' च–घ; 'कमनीयं' क. ३ 'कान्तिमत्केतयन्ति' क–घ–च. ४ 'रत्नं' क–घ–च. ५ 'ते मनोज्ञाः' क–घ–च. ६ 'विकसितमिव पद्मं' क–घ–च. ७ 'भूयिष्ठं च रघुकुलकौमारमनयोः' न. ८ 'बन्धुरांसयोः' न; 'स्कन्धसबन्धुरांसयोः' घ; 'सबन्धुरांसकम्' च. ९ 'असदङ्गसंवादिनी' क–घ; 'असदंग°' न.

ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥ २६ ॥
शुक्लाच्छदन्तच्छविसुन्दरेयं
सैवोष्ठमुद्रा स च कर्णपाशः ।
नेत्रे पुनर्यद्यपि रक्तनीले
तथापि सौभाग्यगुणः स एव ॥ २७ ॥

(विचिन्त्य ।) तदेतत्प्राचेतसाध्युषितमरण्यं यत्र किल देवी परित्यक्ता । इयं चानयोराकृतिर्वयोऽनुभावश्च । यदपि स्वतःप्रकाशान्यस्त्राणीति तत्र विमृशामि । अपि खलु तच्चित्रदर्शनप्रासङ्गिकमस्त्राभ्यनुज्ञानमुद्भूतं स्यात् । न ह्यसांप्रदायिकान्यस्त्राणि पूर्वेषामप्यनुशुश्रुम । अयं च संप्लवमानमात्मानं सुखातिशयो हृदयस्य मे विस्रम्भयते । यमाविति च भूयिष्ठमात्मसंवादः । भूयिष्ठं च मया द्विधा प्रतिपन्नो देव्या गर्भिणीभाव आसीत् । (सास्रम् ।)

पुरा रूढे स्नेहे परिचयविकासादुपचिते
रहो विश्रब्धाया अपि सहजलज्जाजडदृशः ।

मुखं तु तदीय...ह—नन्विति । अभिनवं अम्यानं (?) । श्रीः शोभा । 'श्रीर्वेपादौ' इति विश्वः । तत् अनुपमानं आस्यम् । ननु निश्चये । पुनरिव शब्दालङ्कारौ इति दयालवः ॥ २६ ॥ शुक्लाच्छदन्तेति ॥ २७ ॥ शुक्ला... अच्छा निर्मला । मुद्रा...रेति जयः । कर्ण एव पाशः । कर्णस्येति कल्पलताकारः । रक्तेति । 'नीलरक्तान्तलोचनः' इति महापुरुषलक्षणम् । स एव प्रियासंबन्ध्येवेत्यर्थः ॥ २७ ॥ तत्रापीति—अस्त्राणां स्वतः-प्रकाशकेनेत्यर्थः । प्रासङ्गिकं प्रसङ्गभवम् । शस्त्राभ्यनुज्ञानमिति—सर्वथा एतानि त्वत्प्रसवमुपस्थास्यन्तीति प्रथमाङ्के चित्रपट्टिकादर्शनावसरे मयैवाभ्य-नुज्ञा कृतेति भावः । असांप्रदायिकानि देशिकाभ्यनुज्ञातेतराणीत्यर्थः । सुप्लवमानयोः उल्लोलकल्लोलयोः । विस्रम्भः विश्वासः । आत्मना सह संवाद इत्यर्थः । जीवद्वयरूपे अपत्ये चिह्नं यस्मिन् ॥ परां कोटिं स्नेहे इति ॥ २८ ॥ 'उपचारो बहिस्स्नेहः प्रीतिरान्तरमुच्यते' इति वस्तुनिर्णयः । सहजलज्जा चासौ आ समन्ताद्दल्लभेतरविषय इति यावत् । जडे अचम-

---

१ 'मुक्ताच्छ' क-व-व. २ 'वपुश्च' घ; 'आकृतिर्वत्सयोः' घ. ३ 'इति च । तत्रापि खलु तदपि चित्र°' न. ४ 'प्रवर्द्ध' न. ५ 'अयं विस्मयसंप्लव°' न; 'इत्थं च संप्लव°' घ. ६ 'सुखदुःखातिशयः' न-क. ७ 'विप्रलम्भः' न. ८ 'यमा...वादः' एतन्नास्ति व-व-पुस्तकयोः. ९ 'परां कोटिं स्नेहे' न. १० 'अधिगते' न.

मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥ २८ ॥

(रुदित्वा) तत्किमेतौ पृच्छामि केनचिदुपायेन ।

लवः—तात किमेतत् ।

बाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम् ।
अवश्यायावसिक्तस्य[1] पुण्डरीकस्य चारुताम् ॥ २९ ॥

कुशः—अयि वत्स

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमेवं त्वं पृच्छस्यनधिगतरामायण इव ॥ ३० ॥

रामः—(स्वगतम् ।) अये तटस्थ[2] आलापः । कृतं प्रश्नेन । मुग्धहृदय कोऽयमाकस्मिकस्ते पारिप्लवो[3] विकारः । एवं च निर्भिन्नहृदयावेगः शिशु-

---

त्कारिण्यौ दृशौ नेत्रे यस्याः । कलया चातुर्येण । 'ग्रन्थिर्मर्मणि' इति यादवः । तया सीतयेत्यर्थः ॥ २८ ॥ केनचित् अन्यावेद्येनेत्यर्थः ॥ बाष्पवर्षेणेति ॥ २९ ॥ ते तव । 'बाल्ये सुतानां...त्वङ्कारपूर्वा गिरः' इति भोजचरिते । जगतां मङ्गलं येन यस्माद्वा । अवश्यायैः हिमैः । पुण्डरीकस्य हिममिव त्वन्मुखस्य बाष्पधारापि चारुतेति भावः । अनेन अनितरसाधारणं सौन्दर्यं व्यज्यते । अत एव 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' इत्यस्मद्व्याख्यातशाकुन्तले । पुण्डरीकेति कथनात् पाण्डिमा लक्ष्यते । तथा च–'या दशा विरहे स्त्रीणां सैव पुंसामपि' इति काव्यचिन्तामणौ ॥ २९ ॥ विना सीतादेव्या इति ॥ ३० ॥ सीतैव देवी तया । 'देवी कृताभिषेकायाम्' इत्यमरः । अरण्यमिव दुस्तरमित्यर्थः । यापि ...सस्नेहं हः (?) तावान्वा स्नेह इत्येवालम् । तथापि स्थितस्य गतिश्चिन्तनीयेति न्यायात् । सः प्रसिद्धः । स्नेहः तावान् अगण्य इत्यर्थः ॥ अनधगतं रामायणं येन । अत्र प्रथमो हिकारः पादपूरक इति कश्चित् । तन्न 'नहि नो नापीति' अमरसिंहेनाभिधानात् । द्वितीयस्तु प्रसिद्धवाचकः । कृत्स्नं किलेति भ्रान्तः पाठः । वतेति साधुः । अये इत्याश्चर्ये ॥ ३० ॥ तटस्थः कण्ठतः (?) अनेन ज्ञातोऽस्मीति भावः । आकस्मिकः अकस्माद्भवः । परिप्लवः चञ्चलः । विनिर्भिन्नं भेदितं च तत् हृदयं तस्मिन् आवेगः

---

१ 'अवश्यायाम्बुसिक्तस्य' घ. २ 'तटस्थितः' क–घ–च. ३ 'स्नेहपरिप्लवः' क; 'संप्लवापिकारः' न.

जनेनाप्यनुकम्पितोऽस्मि। भवतु तावदन्तरयामि। (प्रकाशम्।) वत्सौ रामायणं रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिष्यन्दः प्रशस्तिरादित्यवंशस्य। तत्र कौतूहलेन यत्किंचिच्छ्रोतुमिच्छामि।

कुशः—स कृत्स्न एव सन्दर्भोऽस्माभिरावृत्तः। स्मृतिप्रत्युपस्थितौ तावदिमौ बालचरितस्यान्त्येऽध्याये द्वौ श्लोकौ।

रामः—उदीरयतं वत्सौ।

कुशः—

प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः।
प्रियभावः स तु तया स्वगुणैरेव वर्धितः॥ ३१॥
तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम्॥ ३२॥

रामः—कष्टमतिदारुणोऽयं हृदयमर्मोद्घातः। हा देवि एवं किल तदासीत्। अहो निरन्वयविपर्यासविरसवृत्तयो विप्रलम्भपर्यवसायिनस्तापयन्ति संसारवृत्तान्ताः।[1]

संभ्रमः यस्य। शिशुजनेनाप्यनुकम्पितोऽस्मि। वृद्धेनेत्यत्र कैमुतिकन्यायभावः। **अन्तरयामि** छादयामि इत्यर्थः। **निष्यन्दः** गलनम्। **प्रशस्तिः** प्रशस्तता। **स्मृति प्रत्युपस्थितौ** स्मृतौ इति यावत्। **बालेति** बालकाण्डचरित्रस्य। **अन्त्ये** चरमे। 'अध्यायस्सर्गः' इति केदारः। **वत्सा**विति द्विवचनसंबोधनम्॥ **प्रिया तु सीतेति**॥ ३१॥ गुणैः दयादाक्षिण्यादिभिः। रूपाणां सौन्दर्याणां गणैः राशिभिश्च। एवकारश्चकारार्थः। आनेकार्थ्यादव्ययानां यथाप्रकरणं बुधैर्ज्ञेयोऽर्थ इति दण्डिसंमतेः। **प्रीतिः** सन्तोषः। **व्यवर्धत** तस्यामिति शेषः॥ ३१॥ **तथैव राम** इति॥ ३२॥ रामस्य सीता यथा **तथैवे**त्यर्थः। हृदयमित्येकवचनमहिम्ना उभयोर्हृदयमेकमेव, वपुषी परं द्वे इति भावः। **परस्परं प्रीतियोगं तु हृदयमेव जानाती**त्यन्वयः॥ ३२॥ कर्मणः पूर्वानुभूतार्थस्य। 'उद्घात आरम्भः' इत्यमरः। **एवं** श्लोकद्वयानुरूपमित्यर्थः। निर्गतस्य अन्वयस्य **विपर्यासः** वैपरीत्यं यस्मात्। तादृक् **वृत्तं** चरित्रं यस्मिन् स चासौ **विप्रलम्भश्रृङ्गारः** तस्य **स्मृतिः** स्मरणं। **तत्पर्यवसायिनः** स्मरणपर्यवसानवन्तः **तावकाः** त्वदीयाः। **संप्रसादस्य** सम्यक् प्रसन्नतायाः। **वृत्तान्ताः** उदन्ता इत्यर्थः। वंशोदितचरित्रश्रृङ्गारस्मरणपर्यवसायिनी जाता तव प्रसादवार्तेति भावः। 'विपर्यासो वैपरीत्ये' इति, 'अन्वयो वंशे' इति, 'वृत्तं चरित्रे' इति च, 'वि-

---

[1] 'विपर्यासविप्रलम्भस्मृतिपर्यवसायिनस्तावकाः संसारवृत्तान्ताः' न.

क तावानानन्दो निरतिशयविस्रम्भबहुलः
[1]क वाऽन्योन्यप्रेम क च नु गहनाः कौतुकरसाः ।
सुखे वा दुःखे वा क नु खलु तदैक्यं हृदययो-
स्तथाप्येष प्राणः स्फुरति न तु पापो विरमति ॥ ३३ ॥

भोः कष्टम् ।

प्रियागुणसहस्राणामेकोन्मीलनपेशलः ।[2]
य एव दुःसरः[3] कालस्तमेव सारिता वयम् ॥ ३४ ॥

यँदा[4] किंचित्किंचित्कृतपदमहोभिः कतिपयै-
स्तैंदीषद्विस्तारि[5] स्तनमुकुलमासीन्मृगदृशः ।
वयःस्नेहाकूतव्यतिकरघनो यत्र मदनः
प्रगल्भव्यापारः स्फुरति हृदि मुग्धश्च वपुषि ॥ ३५ ॥

लवः—अयं च मन्दाकिनीचित्रकूटवनविहारे[6] सीतादेवीमुद्दिश्य रघुपतेः श्लोकः—

प्रलम्भस्तु शृङ्गारे' इति मेदिन्यमरकपिलसंसारावर्ताः ॥ क तावानानन्द इति ॥ ३३ ॥ विस्रम्भः विश्वासः । वञ्चनाऽस्तीति भावः । चेतः मनः । यत्र यत्र यस्मिन् मनसीत्यर्थः । तद्भेदलेशरहितं प्रसिद्धं वा । हृदययोः आवयोरिति शेषः । 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरानुशासनात् प्राणा इति वक्तव्ये प्राणः इति कवेः प्रमाद इति केचित् । तन्न ॥ 'हृदि प्राणो' इति तस्यैवोक्तेः । विरमति विरतो भवति । एतेन तद्विरहव्यथायां अपानादयो विरताः, पुनराशानुबन्धात् प्राणमात्रं हृदि वर्तत इति भावः ॥ ३३ ॥ प्रियागुणेति ॥ ३४ ॥ उन्मीलनं उदयः । प्रकृते स्मरणमिति यावत् । तं कौमाराविर्भावरूपमेव कालमित्यर्थः ॥ ३४ ॥ यदा किंचित्किंचिदिति ॥ ३५ ॥ स्तनमुकुलं कर्तृ । यदा अहोभिः दिवसैः । कृतपदं कृतस्थानं । चतुर्थपादः संहृदीति (?) मूलम् । तदा ईषत् मनाक् । विस्तारि विस्तारशालि । आसीत् । यस्मिन् यत्र हृदि । वयसः स्नेहे प्रादुर्भावरूपे प्रेम्णि । आकूतं अभिप्रायः । तस्य व्यतिकरेण संबन्धेन । घनः सान्द्रः । मदनः । प्रगल्भव्यापारः प्रकटव्याप्तिः सन् । चरति । वपुषि च मुग्धः मनोज्ञः । चरतीत्यर्थः । तथा च मदनः वयसा सह हृदि वपुषि च प्रौढ

---

१ 'क येऽन्योन्यं यत्नाः' घ–च. २ 'गुणोन्मीलनतत्परः' न; 'गुणोन्मीलन°' घ. ३ 'दुःसहः' न. ४ 'तदा' क–घ–च. ५ 'यदेतद्विस्तारि' न. ६ 'चित्रकूटवर्त्मनि मन्दाकिनीविहारे' न.

त्वदर्थमिव विन्यस्तः शिलापट्टोऽयमग्रतः[1] ।
यस्यायमभितः पुष्पैः प्रवृष्ट इव केसरः ॥ ३६ ॥

रामः—(सलज्जास्मितस्नेहकरुणम्) अति हि नाम[2] मुग्धः शिशुजनः विशेपतस्त्वरण्यचरः । हा देवि स्मरसि वा तस्य[3] प्रदेशस्य तत्समयविस्रम्भातिप्रसङ्गसाक्षिणः ।

श्रमाम्बुशिशिरीभवत्प्रसृतमन्दमन्दाकिनी-
मरुत्तरलितालकाकुलललाटचन्द्रद्युति ।
अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशमुग्धं[4] मुखम् ॥ ३७ ॥

आसीदिति भावः ॥ ३५ ॥ त्वदर्थमिव विन्यस्त इति ॥ ३६ ॥ 'चतुष्कोणा शिला शिलापट्टः' इति त्रिकाण्डी । 'चलोमण्डा' इति महाराष्ट्राः । यस्य शिलापट्टस्य । यममितः इति भावः । 'यं चायमभितः' इति वा पाठः । 'केसरः काञ्चनद्रुमः' इति धन्वन्तरिः । 'घोळसरीवृक्ष' इति महाराष्ट्राः । पुष्पैः प्रवृष्टः प्रकर्षेण वृष्टः । कृतपुष्पवर्ष इति यावत् । द्वितीयतृतीयपादयोर्यमेति ध्वनिः ॥ ३३ ॥ सेति–रहोवृत्ततया लज्जा । वालोक्तमिति स्मितम् । पत्न्या आत्मार्थतया तत्र स्नेहः । ईदृश्यपि त्यक्तेति करुणा दया करुणो रसो वा सर्वत्रैवमूह्यम् ॥ हा देवीत्यादिकथनं हृदयस्थितां सीतां प्रतीति बोध्यम् । वाशब्दः किमर्थः । तस्य वातस्येति ध्वनिः । विस्रम्भः विश्वासः । तेनातिप्रसङ्गः सुरतार्भटीति भावः ॥ तदेवाह—श्रमाम्बुशिशिरीभवदिति ॥ ३७ ॥ श्रमजलैः शीतलीभवन् । प्रसृतः व्याप्तः । मन्दः सूक्ष्मश्च । यः मन्दाकिनीमारुतः । तेन तरलितैः । कम्पितैः । अलकैः चूर्णकुन्तलैः । आकुलं लोलं तदेव चन्द्रः तस्य द्युतिः कान्तिः यस्मिन् । ललाटस्य चन्द्र इति काव्यलक्षणे श्रीनाथः । कुङ्कुमेन कलङ्कितौ लाञ्छितौ न भवत इति अकुङ्कुमकलङ्कितौ । उज्ज्वलौ स्वतः प्रकाशमानौ कपोलौ यस्मिन् । कुङ्कुमं कुङ्कुमादिप्रचुरः रङ्गविशेषः । 'पचे' इति द्राविडाः । प्रकृतेऽवकुङ्कुमेति कथनं वनवासाद्दौर्लभ्यप्रयुक्तमित्यवगन्तव्यम् । एतेन कविना निजद्राविडत्वं सूचितम् । निर्गतौ आभरणे च तौ सुन्दरयोः श्रवणयोः पाशौ तालपत्रे यस्मात् । तादृशं च तन्मुग्धं मनोज्ञम् । अनेन स्नानावसर इति बोध्यम् । मुखं वदनम् । उत्प्रेक्षितं ईदृगिदं तादृगिति चोल्लेखाः कृता इत्यर्थः । मयेति शेषः । तथा च निरुपाधिकं सीतासौन्दर्यमिति भावः ।

---

१ 'आयतः' न. २ 'अति नामायं मुग्धः' घ. ३ 'तस्य तत्समयविस्रम्भातिप्रसङ्गस्य' न. ४ 'सौम्यम्' घ–व.

(स्तम्भित इव स्थित्वा । सकरुणम्) अहो नु खलु भोः ।

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः ।
जगज्जीर्णारण्यं भवति च कलत्रव्युपरमे
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥ ३८ ॥

(नेपथ्ये ।) वसिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः
सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः ।
जराग्रस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रमजडाः ॥३९॥

रामः—कथं भगवत्यरुन्धती वसिष्ठोऽम्बाश्च जनकश्चात्रैव । कष्टं कथं खल्वेते द्रष्टव्याः । (सकरुणं विलोक्य ।) अहह तातजनकोपि दैवादत्रैवा-यात इति वज्रेणेव ताडितोऽस्मि मन्दभाग्यः ।

अकुङ्कुमेति निराभरणेति च ध्वनी । एवमादिषु घट्टेषु परमनधीनार्याः (?) सुधीहिताश्चलमतयश्चोरवत्पलायन्तेतरामव्युत्पन्नजरद्भित्तिखण्डाः, तदत्र व्यु-त्पन्नरसिका एव प्रमाणं इति दिक् ॥ ३७ ॥ संजातः स्तम्भः जडीभावः अस्य स्तम्भितः स्तब्धः कुण्ठित इवेत्यर्थः ॥ चिरं ध्यात्वा ध्यात्वेति ॥ ३८ ॥ चिरं ध्यात्वा निर्माय । प्रवासेऽपि । पुरतः अग्रतः । नगत इवेत्येकं पदम् । निषण्ण इव संभाव्यमान इति शेषः । प्रियजनः यः कोऽपि । निश्वासं सान्त्वनम् । न खलु न करोत्येवेत्यन्वयः । ध्यात्वा स्थित इव चेति क्वचि-त्पाठः । कलत्रस्य प्रकृते सीतायामपि । उपरमे तु उपरतौ अदर्शने इति भावः । जगत् भुवनम् । 'निस्सारे च खिलीभूते जीर्णं शुष्के भयादिदे' इति केदारः । नेदमेकमेवावभासनं, इतरदप्यस्तीत्याह—तदनु तस्मादरण्या-वभासनात् । अनु पश्चात् । हृदयमिति मुख्यतयोक्तम् । अत एव, 'शिवस्य हृदयं विष्णोश्च हृदयं' इति निर्देशः । 'कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले' इत्यमरः । तेषां राशौ पुञ्जे । प्रच्युतं प्रकर्षेण गलितमिवेत्यु-त्प्रेक्षा ॥ ३८ ॥ वसिष्ठो वाल्मीकिरिति ॥ ३९ ॥ महिष्यः कौसल्या-दयः । ध्वनिश्च । शिश्वोः लवचन्द्रकेत्वोः । गात्रैः अवयवैः । अथ खल्वित्यसाधुः । इहेति साधुः पाठः । त्वरितमसा निर्गम्यत इति तेषामध्यव-सायः । तथाऽपि वार्धकदशया चिरेणागच्छन्तीति स्पष्टोऽर्थः ॥ ३९ ॥ पितृ-सखत्वात् तातश्चासौ जनक इति व्यपदेशः । ताडित इति सीतापरित्याग-

---

१ 'विकल्प°' घ-च; 'कलत्रेऽप्युपरते' न. २ '°मनसो विश्लथजटाः' न.

सम्बन्धस्पृहणीयताप्रमुदितैर्जुष्टे वसिष्ठादिभि-
र्दृष्ट्वापत्यविवाहमङ्गलमहे तत्तातयोः सङ्गतम् ।
पश्यन्नीदृशमीदृशः पितृसखं वृत्ते महावैशसे
दीर्ये किं न सहस्रधाहमथवा रामेण किं दुष्करम् ॥४०॥

(नेपथ्ये ।) भो भोः कष्टं कष्टम् ।

अनुभावमात्रसमवस्थितश्रियं
सहसैव वीक्ष्य रघुनाथमीदृशम् ।
प्रथमप्रमूढजनकप्रबोधनाद्
विधुराः प्रमोहमुपयान्ति मातरः ॥ ४१ ॥

रामः—हा तात हा मातरः हा जनक

जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
तत्राप्यकरुणे पापे वृथा वः करुणा मयि ॥ ४२ ॥

पराधादिति भावः ॥ **सम्बन्धस्पृहणीयतेति** ॥ ४० ॥ **स्पृहणीयता** इच्छा । **जुष्टे** सेविते । **अपत्यानां** सीतादीनाम् । **तत्तातयोः** तासां सीतादीनां तातयोः जनककुशध्वजयोः । **सङ्गतं** समागमम् **दृष्ट्वा । महावैशसे** परित्यागरूपे अत्यप्रिये । **वृत्ते** अतीते सति । ईदृशं पश्यन्नहं **न दीर्ये किं** न दलयामि । 'वैशसमप्रियम्' इति, 'वृत्तमतीते' इति लिङ्गानुशासननामनिधाने । 'दलति दीर्यति' इति माठरोक्तेः । अत्र जीर्ये (दीर्ये ?) इति कवेः प्रमादः । 'न विदीर्ये कठिनाः खलु स्त्रियः' इति **कुमारसंभवे ईश्वरकृष्णमिश्रस्येव** दयनीयः ॥ नन्वहं न दीर्ये कुतः पुनरिदं सामर्थ्यमित्याशङ्क्याह—**अथवेति** ॥ **किं दुष्करं** किमपि दुष्करं नेत्यर्थः सर्वं सुकरमिति भावः ॥ ४० ॥ **अनुभावमात्रेति** ॥ ४१ ॥ **अनुभावः** प्रभावः । सुश्रीः शोभा लक्ष्मीर्वा । 'तस्य श्रीरनपायिनी' इति स्मरणात् । 'सीता लक्ष्मीर्भवान्विष्णुः' इति **रामायणे** च । **ईदृशं** सीतावियुक्तम् । **विधुराः** दीनाः । **प्रमोहं** मूर्छातिशयम् ॥ ४१ ॥ **जनकानां रघूणामिति** ॥ ४२ ॥ **तात** मिथिलाधिप इत्यर्थः । यत् भूम्यपत्यमिति शेषः । सीतेत्यर्थः । **कृत्स्नं** अशेषम् । **गोत्रयोः** वंशयोः **मङ्गलम्** । तत्रापि सीतायाम् । **अकरुणे पापे मयि** ।

---

१ 'मङ्गलविधौ' न. २ 'ईदृशे' क-घ-व. ३ 'समुपस्थित' घ-व. ४ 'प्रथमप्रबुद्धजनकप्रबोधिताः' न. ५ 'तस्मिन्नकरुणे' क-घ-व.

यावत्सम्भावयामि । (इत्युत्तिष्ठति ।)

कुशलवौ—इत इतस्तातः ।

(सकरुणाकुलं परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः ।

सप्तमोऽङ्कः ।

(ततः प्रविशति लक्ष्मणः ।)

लक्ष्मणः—भो[1] भो अद्य खलु भगवता वाल्मीकिना सब्रह्मक्षत्रपौरजानपदाः प्रजाः सहास्माभिराहूय कृत्स्न एव सदेवासुरतिर्यग्[2]उरगनायकनिकायः सचराचरो भूतग्रामः स्वप्रभावेण संनिधापितः । आदिष्टश्चाहमार्येण—'वत्स लक्ष्मण भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टु-

---

वः युष्माकम् । करुणा वृथा ॥ ४२ ॥ इति महाराजपद + उत्तररामचरितसंजीवनाख्यटिप्पणे षष्ठोऽङ्कः ॥

॥ षष्ठोऽङ्कस्संपूर्णः ॥

अथ मुखसन्धिप्रभृतिउपक्षिप्तनाटकीययावद्वस्तुक्रोडीकरणरूपं निर्वहणसन्धि प्रपञ्चयिष्यन् वाल्मीक्याश्रमपरित्यक्तजानकीसमनुभूतार्थमन्तर्नाटिकात्मना चमत्करिष्यन् प्राचेतसवचनानुवृत्तिस्थावरजङ्गमप्रायजगद्विनुतपरिशुद्धमैथिलीकुशलवप्रमुखैः श्रीरामभद्रमानन्दयिष्यन् कविरङ्कारम्भवशान् पूर्वसूचनां विनैव सभासन्निवेशोपकरणाङ्गलक्ष्मणप्रवेशं प्रक्रमते—तत इति ॥ षष्ठाङ्कसंविधानानन्तरमित्यर्थः । भो इति मनः प्रति संबोधनम् । जानपदाः देशवासिनः । म्रियते मर्त्यः न म्रियते अमर्त्यः । मर्त्यश्चासावमर्त्यश्च मर्त्यामर्त्यरूप इत्यर्थः । तिर्यञ्चः कामधेन्वादयः पशवः । उरगनायकः वासुकिः तस्य निकायः भुजगानां वर्गः तेषां सन्तानः परम्परा यस्मिन् । 'वर्गो निकाये' इति, 'परम्पराभिजनयोस्सन्तानः' इति नन्दिहेमचन्द्रौ । चराचरैः जङ्गमस्थावरैः सहितः । भूतानां पृथिव्यादीनाम् । 'क्ष्मादावृते भूतं' इति, 'वृन्दे ग्रामः' इति चामरः । आतोद्यस्य स्थानं [illegible], [illegible] प्रक्षालनीतलपावनत्वादिति त्व(त ?)दन्तरालस्य परिलक्षणीतावितानत्वादिति च भावः । अत एव सीतादेवी प्राप्तप्रसववेदना आत्मानमतिदुःखसंवेगात्

---

१ 'भोः किं नु खलु' न. + प्रथमाङ्कटिकायामासां टीकाकृता सदात्मकृतं कथितं तदत्राप्यनुसन्धेयम्. २ '०तिर्यङ्निकायः' न. ३ 'जङ्गमः स्थावरश्च' क-ख-घ.

मुपनिमन्त्रिताः स्मः । तद्गङ्गातीरमातोद्यस्थानमुपगम्य क्रियतां समाजसंनिवेशः' इति । कृतश्च मर्त्यामर्त्यस्य भूतग्रामस्य समुचितस्थानसंनिवेशो मया । अयं तु—

> राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः ।
> वाल्मीकिगौरवादार्य इत एवाभिवर्तते ॥ १ ॥

(ततः प्रविशति रामः ।)

रामः—वत्स लक्ष्मण अपि स्थिता रङ्गप्राश्निकाः ।

लक्ष्मणः—अथ किम् ।

रामः—इमौ पुनर्वत्सौ कुशलवौ कुमारचन्द्रकेतुसमां प्रतिपत्तिं लम्भयितव्यौ ।

लक्ष्मणः—प्रभुस्नेहप्रत्ययात्तथैव कृतम् । इदं चास्तीर्णं राजासनम् । तदुपविशत्वार्यः ।

रामः—(उपविशति ।)

लक्ष्मणः—प्रस्तूयतां भोः ।

गङ्गाप्रवाहे निक्षिप्तवती इति तृतीयाङ्कविष्कम्भे तमसयोक्तम् । सलिलादुपैति इत्यग्रे लक्ष्मणवचसा स्फुटीभविष्यति चेति दिक् ॥ 'ततं वीणादिकम्' इत्यादि, 'वादित्रातोद्यनामकं' इत्यन्तममरः । 'वाजन्त्री' इति महाराष्ट्राः । **समाजः** सभा । मर्त्येति पूर्वमनुवादः । संप्रति स्वतः कथनमिति न पुनरुक्तिः ॥ **राज्याश्रमेति** ॥ १ ॥ **राज्यमेव आश्रमः** सौख्याभावादिति भावः । **कष्टं** च **तन्मुनिव्रतम्** । **वाल्मीकिना** वाल्मीकौ च **गौरवात्** ॥ १ ॥ 'रङ्गो नाट्यस्थलं' इति, 'सामाजिकः प्राश्निकः' इति च त्रिकाण्डशेषः । **प्रतिपत्तिः** मर्यादा । वात्सल्यमिति यावत् । **लम्भयितव्यौ** प्रापणीयौ । **प्रभोः स्नेहेन । प्रत्ययात्** विश्वासात् । कुशलवयोः भवति स्नेहेन अस्मदादीनामपि तयोर्विश्वासः अस्तीति भावः । **तथैव** चन्द्रकेतुवत् । कृतं वात्सल्यमिति शेषः । राजासनमास्तीर्णमिति कवेरिव कस्य न व्याकर्तुरचातुर्यम् । 'नृपासनं यत्तद्भद्रासनं सिंहासनं च तत्' इत्यमरसिंहेनाभिहिततया सिंहासनस्यास्तरणत्वासंभवात् ॥ न च वाच्यमास्तरणोचितमन्यदासनं भवत्विति । तर्हि सभानायकस्य महाराजत्वे जगत्पते इति गङ्गया वक्ष्यमाणे वचसि चास्वरसापत्तेः । तस्माद्दूदतरमूलगुरुव्याख्यानमेव

---

१ 'तद्भागीरथीतीरमनोज्ञस्थानम्' ञ. २ '°स्थानेषु समुपवेशसङ्गो मया' ञ. ३ 'प्रेक्षकाः' क–घ–ञ. ४ '°सदृशीं स्थानप्रतिपत्तिम्' क–ङ–ङ.

सूत्रधारः—(प्रविश्य ।) भो भो भगवान्भूतार्थवादी प्राचेतसः सस्थावरजङ्गमं जगदाज्ञापयति—यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनं वचनामृतं करुणाद्भुतरसं च किंचिदुपनिबद्धं तत्र कार्यगौरवादवधातव्यमिति ।

रामः—एतदुक्तं भवति । साक्षात्कृतधर्माण ऋषयः । तेषाममृतम्भराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचिद्व्याहन्यन्त इत्यनभिशङ्कनीयानीति ।

(नेपथ्ये ।) हा अज्जउत्त हा कुमार लक्खण एआइणिं असरणं रण्णे आसण्णप्पसववेअणं हदासं सावदा मं अहिलसन्दि । साहं दाणिं मन्दभाइणी भाईरईए अत्ताणं णिक्खिविस्सम् । हा आर्यपुत्र हा कुमार लक्ष्मण एकाकिनीमशरणामरण्य आसन्नप्रसववेदनां हताशां श्वापदा मामभिलषन्ति । साहमिदानीं मन्दभागिनी भागीरथ्यामात्मानं निक्षेप्स्यामि ।

शरणमिति दिक्' ॥ **भूतार्थवादी** सत्यवस्तुवादी । 'भूतं त्रिपूचिते सत्ये' इति, 'अर्थोऽर्थनाविषययोर्धनकारणवस्तुषु' इति कपिलकेदारौ । 'कथयामि ते भूतार्थम्' इति अस्मद्याख्यातशाकुन्तले । प्रति उद्दिश्य **आर्षेण** अलौकिकेन । **वचनान्येव अमृतानि** यस्मिन् । **करुणश्चाद्भुतश्चासौ रसो** यस्मिन् । **किञ्चित्** चरितमिति शेषः । **कार्ये** प्रयोजने । आर्षप्रसादे इति भावः । **साक्षात्कृताः धर्माः** यैस्ते । साक्षात्कृतधर्माणः । 'न्यायाचारस्वभावेषु धर्मे पुण्ये जनस्थितौ' इति रत्नमाला ॥ 'वचसि स्थेयमस्माभिः सतां विदितधर्मणाम्' इति **लोलम्बः** । 'ऋषयस्सत्यवचसः' इत्यमरः । अमृतं बिभ्रति **अमृतम्भराणि** इति कवेः प्रमादः । तथापि-'वीणाऽस्तु सा काष्ठमयी प्रिये ते शृणोमि वाक्यान्यमृतम्भराणि ।' इति **श्रीनाथः** । **परोरजांसी**ति–यानि रजसः पराणि तानीत्यर्थः । शुद्धं अरजस्कम् । परोरज इति केदारः । 'प्रमादरहितं ज्ञानं प्रज्ञानम्' इत्यगस्त्यः । **अनभिशङ्कनीयानि** नाक्षेपोचितानि **इत्येतदुक्तं भवतीति** पूर्वेणान्वयः ॥ अथ अन्तर्नाटकपात्रभूतायाः लक्ष्मणपरित्यक्तायाः सीतायाः प्रवेशसूचनमारभते— **नेपथ्ये** इति । हा आर्यपुत्र हा कुमार लक्ष्मण एकाकिनीमशरणामासन्नप्रसवामरण्ये हताशाः श्वापदा अभिलषन्ति । हा इदानीं मन्दभागिनी आत्मानं भागीरथ्यां निक्षिपामि । 'अरण्यक' इति कवेः प्रमादः । 'लोपोऽरण्ये' इत्य-

---

१ एतन्नास्ति क–घ–च–पुस्तकेषु. २ '°धर्माणो महर्षयः' क–घ–न. ३ 'अमृतसाराणि' क–ग–घ. ४ 'इति नाभिशङ्कनीयानि' क; 'न हि शङ्कनीयानि' न. ५ 'हदासा' (हताशाः) टी.

लक्ष्मणः—(आत्मगतम् ।) कष्टं वताऽन्यदेव किमपि ।

सूत्रधारः—विश्वंभरात्मजा देवी राज्ञा त्यक्ता महावने ।
प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति ॥ २ ॥

(इति निष्कान्तः ।)

प्रस्तावना ।

रामः—(सावेगम् ।) देवि देवि लक्ष्[1]मणमवेक्षस्व ।

लक्ष्मणः—आर्य नाटकमिदम् ।

रामः—हा देवि दण्डकारण्यवासप्रियसखि एष ते रामा[2]द्दैवदुर्विपाकः ।

लक्ष्मणः—आर्य दृश्यतां तावत्प्रबन्धार्थः ।

रामः—एष सज्जोऽस्मि वज्रमयः ।

(ततः प्रविशत्युत्सङ्गितैकैकदारकाभ्यां पृथिवीगङ्गाभ्यामवलम्बिता सीता ।)

रामः—वत्स लक्ष्मण असंविज्ञात[3]पदनिबन्धनमन्धतमसमिव प्रविशामि धारय माम् ।

देव्यौ—

समाश्वसिहि कल्याणि दिष्ट्या वैदेहि वर्धसे ।
अन्तर्जले[4] प्रसूतासि रघुवंशधरौ सुतौ ॥ ३ ॥

सीता—(समाश्वस्य ।) दिट्ठिआ दारए पसूदम्हि । हा अज्जउत्त । दिष्ट्या दारकौ प्रसूतास्मि । हा आर्यपुत्र ।

नुशासनादकारलोपेन रण्णे इति संकथनस्य सामीप्यात् । अत एव 'रान' इति महाराष्ट्राः । 'श्वापदा हिंस्रजन्तवः' इति संसारावर्तः । कष्टमिति—यत्किञ्चिदुक्तं अन्यदारब्धमिति भावः । विश्वम्भरात्मजेति ॥ २ ॥ विश्वम्भरायाः भूमेः ॥ २ ॥ प्रस्तावना ॥ सावेगं सभयसंभ्रमम् । लक्ष्मणमवेक्षस्वेति—अहमपराधीति भावः । नाटकमिदमिति—पश्यतां भ्रमनिवारणायेति बोध्यम् । उत्सङ्गितः उत्सङ्गे कृतः एकैकदारको याभ्यामित्यर्थः । अत्र कुशलवौ गङ्गापृथिव्यौ सीता एतत्पात्रपञ्चकमन्तर्नाटकीयम् । तत्र भ्रमं विना तत्तदभिनयव्यवहारभाषणादिकं निपुणमतिभिरवगन्तव्यम् ॥ पदनिबन्धनं स्थानसम्बन्धः ॥ समाश्वसिहि कल्याणीति

---

१ 'क्षण॰' क–घ; 'लक्ष्मण अवेक्षस्व' व. २ 'रामाद्विपाकः' न. ३ 'असंविज्ञातपदनिबन्धने तमसीवाहमद्य प्रविशामि' न. ४ 'अन्तर्जलम्' घ–च.

लक्ष्मणः—(पादयोर्निपत्य ।) आर्ये आर्ये दिष्ट्या वर्धामहे । कल्याणप्ररोहो रघुवंशः । (विलोक्य ।) हा हा कथं क्षुमितबाष्पोत्पीडनिर्भरः प्रमुग्ध एवार्यः । (वीजयति ।)

पृथिवी—वत्से समाश्वसिहि ।

सीता—(समाश्वस्य ।) भअवदीओ का तुम्हे । मं मुञ्चह । भगवत्यौ के युवाम् । मां मुञ्चतम् ।

पृथिवी—इयं ते श्वशुरकुलदेवता भागीरथी ।

सीता—भअवदि णमो दे । भगवति नमस्ते ।

भागीरथी—चारित्रोचितां कल्याणसम्पदमधिगच्छ ।

लक्ष्मणः—अनुगृहीताः स्मः ।

भागीरथी—इयं तु जननी ते विश्वम्भरा ।

सीता—हा अम्ब ईदिसी अहं तुए दिट्ठा । हा अम्ब ईदृश्यहं त्वया दृष्टा ।

पृथिवी—एहि वत्से एहि पुत्रि ।

(उभौ आलिङ्ग्य मूर्च्छतः ।)

लक्ष्मणः—(सहर्षम्) दिष्ट्या गङ्गापृथिवीभ्यामभ्युपपन्नार्या ।

रामः—(अवलोक्य ।) दिष्ट्या खल्वेतत्करुणोत्तरं वर्तते ।

भागीरथी—अत्रभगवती विश्वम्भरापि नाम व्यथत इति जितमपत्य-

॥ ३ ॥ **दिष्ट्या** इदानीं प्रसूतास्मि(सि ?) **कल्याणौ** शुभौ **प्ररोहौ** अङ्कुरौ सुतरूपौ यस्मिन् । **क्षुभितानां** जर्जराणां । **बाष्पाणां उत्पीडः** प्रादुर्भावः **निर्भरः** निरतिशयः यस्मिन् । **प्रकर्षेण मुग्धः** मूढः । भगवत्यौ के युवां मां मुञ्चतम् । **भगवत्यौ** इति संबोधनम् । भागीरथीत्वापादकं हेतुगर्भं नाम । भगवति नमस्ते ॥ हा अम्ब ईदृशी त्वयाऽहं दृष्टा ॥ **मूर्छतः** मुह्यतः । प्रेमावेशेनेति भावः ॥ **आर्या** सीता । **अभ्युपपन्ना** अनुगृहीता ॥ **दिष्ट्या** दैवात् । **एतत्** अभ्युपपादनं अनुग्रह इति यावत् । **करुणो** रसः **उत्तरः** अधिकः यस्मिन् । इदं एतदित्यस्य विधेयविशेषणं बोध्यम् ॥ अत्र सीताविषये । तथा च । एषा विश्वम्भरा । अस्याः सीतेव

---

१ 'भअवदि का तुमं इअं अ' (का त्वम्, इयं च) क–घ–ग. २ 'चारित्रोचितान्' घ–ध. ३ 'करुणान्तरं खल्वेतद्वर्तते' क–च–ध; 'करुणान्तरम्' न.

स्नेहेन । यद्वा सर्वसाधारणो ह्येष मानसो[1] मोहग्रन्थिश्चेतनावतामुपप्लवः[2] संसारतन्तुः । देवि भूतधात्रि वत्से वैदेहि समाश्वसिहि समाश्वसिहि ।

पृथिवी—देवि सीतां प्रसूय कथमाश्वसिमि ।

सोढश्चिरं[3] राक्षसमध्यवास-
स्त्यागो द्वितीयो[4] हि सुदुःसहोस्याः ।

भागी०—को नाम पाकाभिमुखस्य जन्तो-[5]
द्वाराणि दैवस्य पिधातुमीष्टे ॥ ४ ॥

पृथिवी—भगवति भागीरथि युक्तमेतत्सर्वं[6] न वो रामभद्रस्य ।

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः ।
नाहं न जनको नाग्निर्नानुवृत्तिर्न[7] सन्ततिः ॥ ५ ॥

सीता—हा अज्जउत्त सुमराविदम्हि । हा आर्यपुत्र स्मारितास्मि ।

कत्यपत्यानि वा तदपि व्यथते । अतः पत्युः(अपत्य ?)स्नेहेन जितमिति भावः ॥ **मानसः** मनस्संबन्धी । **मोहग्रन्थिः** ममतापाशः । 'ममतामूर्छयोर्मोहः' इति, 'ग्रन्थिर्ना पर्वपाशयोः' इति वामनयादवौ । **चेतनावतां** प्राणिनाम् । '**उपप्लव** उपद्रवे' इति ध्वनिमञ्जरी । गूढेत्यान्तर इति च द्विपदी प्रक्षिप्ता । **भूतधात्रि** इति भूवाचकं संबोधनम् ॥ **सोढश्चिरमिति** ॥ ४ ॥ **सोढः** क्षान्तः । लङ्कायामिति भावः । हि प्रसिद्धौ । अहिस्सर्प इव **सुदुस्सह** इति एकपदं च । **पाकौ** सुखदुःखपरिणामौ तावुद्दिश्य **अभिमुखस्य** । 'पोते च परिणामे च पाकः' इति नानार्थमञ्जरी । **जन्तोर्विषये** । 'तस्य वा तस्य विषये' इति समयपद्धतिः । **दैवस्य** सुखदुःखप्रापकविधेः । **द्वाराणि** प्रवेशमार्गान् । **पिधातुं** आच्छादयितुम् । ईष्टे समर्थो भवति । तथा च—'अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ॥' इति भावः । 'प्रवेशमार्गे च द्वारि छिद्रे च' इति धनञ्जयः ॥ ४ ॥ **न वो रामभद्रस्येति** भिन्नं वाक्यम् । वः युष्माकम् । रामभद्रस्य नेति युक्तमित्यनुषङ्गः । 'सीतालक्ष्मीर्भवान्विष्णुः' इति स्मारितत्वादिति भावः । तदेवाह—**न प्रमाणीकृत** इति ॥ ५ ॥ **अनुवृत्तिः** अनुवर्तनम् । **सन्ततिः** रघूणां वंशः । प्रमाणीकृत इति पदं सर्वत्र यथोचितमूह्यम्

---

१ 'मनसो मूढग्रन्थिरान्तरः' न; 'मनसो मोहग्रन्थिरन्तश्चरः' क–च; 'गूढग्र॰न्थिरन्तश्चरः' घ. २ 'अनुपप्लवः' क–ख–च. ३ 'एकश्चिरम्' व. ४ 'द्वितीयस्तु' न; 'द्वितीयश्च' क–घ–च. ५ 'जन्तुः' न–च. ६ 'सदृशमुक्तम् । युक्तमेतद्वा रामभद्रस्य' क–घ–च; 'सर्वं वो रामभद्रस्य' न. ७ 'न तु वृत्तिः' न.

पृथिवी—आः कलत्रवान्पुत्रः ।

सीता—(सलज्जास्रम् ।) जह वा अम्बा भणादि । यथा वाऽम्बा भणति ।

रामः—अम्ब पृथिवि, ईदृशोऽस्मि ।

भागी०—भगवति वसुन्धरे शरीरमसि संसारस्य । तत्किमसंविदानेव जामात्रे कुप्यसि ।

घोरं लोके विततमयशो या च वह्नौ विशुद्धि-
लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु ।
इक्ष्वाकूणां कुलधनमिदं यत्समाराधनीयः
कृत्स्नो लोकस्तदिति विषमे किं स वत्सः करोतु ॥ ६ ॥

लक्ष्मणः—अव्याहतान्तःप्रकाशा हि देवताः सत्त्वेषु ।

भागी०—तथाप्येष तेऽञ्जलिः ।

रामः—अम्ब अनुवृत्तस्त्वया भगीरथकुले प्रसादः ।

पृथिवी—देवि नित्यं प्रसन्नास्मि वः किं त्वापातदुःसहस्नेहसंवेगेनैवं ब्रवीमि । न पुनर्न जानामि सीतास्नेहं रामभद्रस्य ।

॥ ५ ॥ हा आर्यपुत्र स्मर्यसे । आः कोपे । यथाऽम्बा भणति । 'अम्बा माता गुरुवधूः श्वश्रूर्ज्येष्ठप्रजापती' इति रत्नमाला । **शरीरमसि** शरीरमिव सर्वैः प्रार्थनीयासीत्यर्थः । सर्वाधारत्वादिति भावः ॥ **घोरं लोके विततमिति** ॥ ६ ॥ **विततं** विस्तृतम् । **श्रद्दधातु** दूरवृत्तत्वादिति भावः । **समाराधनीय इति यत् इदं इक्ष्वाकूणां कुलधनमित्यर्थः** । तद्वदावश्यकमिति यावत् । एतेन– 'लब्धा (व्वा ?) कुलधनं राजा लङ्कां प्रायाद्विभीषणः ।' इत्यत्र यत् कैरपि यथेच्छं व्याकृतम्, तत्परास्तम् । **तत्** तस्मात् । **इति** पूर्वोक्तप्रकारेण । **विषमे** सङ्कटे ॥ ६ ॥ **सत्त्वेषु** निश्चयेषु । अथ गङ्गा भूमिं प्रत्याह–**तथापीति** । **ते** तुभ्यम् । **अञ्जलिः** मया क्रियत इति शेषः । **अनुवृत्तः** अनुसृत्य वृत इत्यर्थः । असावित्यस्य अहमिति संप्रदायार्थः । अत एव असावागतोऽस्मीति विक्रमचरिते डिण्डिमः । **आपाते** आकर्णनक्षण एव **दुस्सहं** कौलीनं यस्यास्तादृशी चासौ सुता तस्यां **स्नेहस्य आवेगः** आसमन्तादुद्वेगः आवेगस्तेनेत्यर्थः । 'दर्शनक्षण आपातस्तथैवाकर्णनक्षणः' ।

---

१ 'नदिद' न–क; 'तगमि विषमे' घ; 'नदांगगहनम्' च. २ 'भूतेषु विशेषेन गङ्गा' घ–च. ३ एतदञ्जनमवाक्यं घ–च–पुस्तकयोः. ४ 'दुःसहः शोकावेगोऽस्त्यस्य न पुनर्ने' च; 'किं त्वत्सापातदुःसहः स्नेहसंवेगः' न.

दह्यमानेन मनसा दैवाद्वत्सां विहाय सः ।
लोकोत्तरेण सत्त्वेन प्रजापुण्यैश्च जीवति ॥ ७ ॥

रामः—सकरुणा हि गुरवो गर्भरूपेषु ।

सीता—(रुदती कृताञ्जलिः ।) णेदु मं अत्तणो अङ्गेसु विलअं अम्बा ।
नयतु मामात्मनोऽङ्गेषु विलयमम्बा ।

रामः—किमन्यद्ब्रवीतु ।

भागी०—शान्तम् । अविलीना संवत्सरसहस्राणि भूयाः ।

पृथिवी—वत्से अवेक्षणीयौ ते पुत्रकौ ।

सीता—अणाधम्हि । किं एदेहिं । अनाथास्मि । किमेताभ्याम् ।

रामः—हृदय वज्रमसि ।

भागी०—कथं त्वं सनाथाप्यनाथा ।

सीता—केरिसं मम अभग्गाए सणाहत्तणम् । कीदृशं मे अभाग्यायाः सनाथत्वम् ।

देव्यौ—जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे ।
आवयोरपि यत्सङ्गात्पवित्रत्वं प्रकृष्यते ॥ ८ ॥

लक्ष्मणः—आर्य श्रूयताम् ।

रामः—शृणोतु लोकः ।

(नेपथ्ये कलकलः ।)

रामः—अद्भुततरं किमपि ।

सीता—किंत्ति आवद्धकलकलं अन्तरिक्खं पज्जलदि । किमित्यावद्धकलकलमन्तरिक्षं प्रज्वलति ।

इति, 'कौलीनं लोके च' इति केदारहैमौ । अत एव 'अद्यमापातमधुरम्' इति सार्वभौमः । सीतायां स्नेहम् । 'धैर्ये सत्त्वं' इति जयः ॥ दह्यमानेन मनसेति ॥ ७ ॥ प्रजानां पुण्यैः ॥ ७ ॥ गर्भाणामिव रूपं आकृतिः येषां असास्विति शेषः ॥ नयतु मामात्मनोऽङ्गेषु विलयमम्बा । 'अन्तर्धाने च विलयः' इत्यनस्त्यः । अविलीना अनष्टा । किमेताभ्यामनाथाभ्याम् । वज्रमिति- एवमश्लीलश्रवणादिति भावः । कीदृशं मे अभाग्यायाः सनाथत्वम् । 'नाथस्तातपतिस्वामिदेवाधारेष्वपि' इति नन्दी ॥ जगन्मङ्गलमिति ॥ ८ ॥ यत् यस्मात् आवयोः । सङ्गात् सङ्गतेः । प्रकृष्यते अधि-

---

१ 'धैर्येण' च. २ 'वज्रमयम्' क-घ-च. ३ 'कथं वत्सौ सनाथावप्यनाथौ' च. ४ एतन्नास्ति क-घ-च-पुस्तकेषु.

रामः—हा प्रिये लोकान्तरं गतासि ।

सीता—णेदु मं अत्तणो अङ्गेसु विलअं अम्बा । ण सहिस्सं ईरिसं जीअलोअपरिभवं अणुभविदुं । नयतु मामात्मनोऽङ्गेषु विलयमम्बा । न सहिष्ये ईदृशं जीवलोकपरिभवमनुभवितुम् ।

रामः—किमुत्तरं स्यात् ।

पृथिवी—मन्नियोगतः स्तन्यत्यागं यावत्पुत्रयोरवेक्षस्व । परेण तु यथा रोचिष्यते तथा करिष्यामि ।

भागी०—एवं तावत् ।

(इति निष्क्रान्ते देव्यौ सीता च ।)

रामः—कथं विलय एव वैदेह्याः सम्पन्नः । हा देवि दण्डकारण्यवासप्रियसखि हा चारित्रदेवते लोकान्तरं पर्यवस्थितासि । (मूर्छति)

लक्ष्मणः—भगवन्वाल्मीके परित्रायस्व परित्रायस्व । एष ते काव्यार्थः ।

(नेपथ्ये ।) अपनीयतामातोद्यम् । भो भो सजङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः पश्यतेदानीं महर्षिणा भगवता वाल्मीकिनाऽभ्यनुज्ञातं पवित्रमाश्चर्यम् ।

तथा चात्र रसातलप्रवेशादिकमतीतं चरितं गर्भनाटकव्याजेन दर्शितम् ॥ एतौ हीति पद्यस्थविशेषपञ्चकं प्रपञ्चितम् । वाल्मीकिसमाश्रयचन्द्रकेतुसमरारभटीरामभद्रसंलापगुणादिविशिष्टं कुशलवयोः कौमारप्रकरणं तदिदं नाटकगर्भनाटकात्मना द्विकोटिकं कविचमत्कृतं संविधानरहस्यनारिकेलगतुलमतिशिलातले स्फोटितवानहम् । शिष्यशिशुरनसूयाप्रगुणगुणगणिग्रहयालुभिरनुग्राह्य इति दिक् ॥ लोकान्तरं ध्वनिः ॥ नयत्वात्मनोऽङ्गेषु विलयमम्बा न सहिष्ये रात्रिन्दिवं जीवलोकपरिभवमनुभवितुम् । जीवयुक्तलोकेषु भुवनेषु । 'जीवस्तत्त्वे' इति कपिलः । परिभवं तिरस्कारम् । नियोगतः शासनात् । परेण वयस्तेति शेषः । प्रतिपदं ज्ञातमेव अन्तर्नाटकमिति शेषः । 'तावत् साकल्येऽवधौ मानेऽवधारणे' इत्यमरः । चरित्रेण देवतेत्यर्थः । न मानुषीति भावः । एष ते काव्यार्थः तिष्ठत्विति भावः । एतावत्पर्यन्तं गर्भनाटकमिति सूक्ष्मदृग्भिर्बोध्यम् ॥ प्रकृतमनुसरति-नेपथ्ये इति ॥ आतोद्यं चतुर्विधवाद्यम् । प्राणभृत इति-अनन्यगत्या समगादप्रारम्भप्रपञ्चप्र-

---

१ 'परिवर्त्तं' (परिगतं) क–ख–च. २ 'कथं प्रतिपन्न एव तावत् । हा चारित्रदेवते लोकान्तरे पर्यवसितासि' न. ३ 'एष किं ते काव्यार्थः' घ.

लक्ष्मणः—(विलोक्य ।) मन्थादिव क्षुभ्यति गाङ्गमम्भो
व्याप्तं च देवर्षिभिरन्तरिक्षम् ।
आश्चर्यमार्या सह देवताभ्यां
गङ्गामहीभ्यां सलिलादुदेति ॥ १६ ॥

पुनर्नेपथ्ये । अरुन्धति जगद्वन्द्ये गङ्गापृथ्व्यौ जुषस्व नौ ।
अर्पितेयं तवावाभ्यां सीता पुण्यव्रता वधूः ॥ १७ ॥

लक्ष्मणः—अहो आश्चर्यमाश्चर्यम् । आर्य पश्य पश्य । (विलोक्य) कष्टमद्यापि नोच्छ्वसित्यार्यः ।

(ततः प्रविशत्यरुन्धती सीता च ।)

अरुन्धती—त्वरस्व वत्से वैदेहि मुञ्च शालीनशीलताम् ।
एहि जीवय मे वत्सं सौम्यस्पर्शेन पाणिना ॥ १८ ॥

सीता—(ससंभ्रमं स्पृशन्ती) समस्ससदु समस्ससदु अज्जउत्तो । समाश्वसितु समाश्वसित्वार्यपुत्रः ।

रामः—(समाश्वस्य सानन्दम्) भोः किमेतत् । (दृष्ट्वा सहर्षाद्भुतम् ।) कथं देवी । (सलज्जम् ।) अये अम्बा मे अरुन्धती सर्वे च प्रहृष्यन्त ऋष्यश्रृङ्गशान्तादयोऽस्मद्गुरवः ।

अरुन्धती—वत्स एषा भगवती भगीरथगृहदेवता सुप्रसन्ना गङ्गा । नेपथ्ये । जगत्पते रामचन्द्र स्मर्यतामालेख्यदर्शने मां प्रत्यात्मनो वचनं यथा सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भवेति तत्रानृणास्मि जाता ।

विष्टलक्ष्मणकृतानुवादबलेन च प्राणभृच्छब्दः तिर्यगुरगादिवाचक इति विवक्षितः । प्राणाः असवः प्राणशक्तिर्वा । 'शक्तिः प्राणे' इत्यमरः । पश्यन्त्विति—भवन्त इति शेषः ॥ मन्थादिव क्षुभ्यतीति ॥ १६ ॥ मन्थो मन्थनम् । आर्या सीता ॥ १६ ॥ अरुन्धतीति ॥ १७ ॥ गङ्गापृथिव्यौ नौ च द्वितीयाद्विवचनम् । उद्दिश्येति शेषः । जुषस्व प्रियस्व । तव हस्ते इति शेषः ॥ १७ ॥ त्वरस्व वत्से इति ॥ १८ ॥ शालीनं अधृष्टम् । शीलं स्वभावः यस्याः । 'अधृष्टे तु शालीनः' इत्यमरः । सौम्यः सुकरः स्पर्शः यस्य । यमेति ध्वनिः ॥ १८ ॥ समाश्वसितु आर्यपुत्रः । गङ्गा प्राह जगत्पते इति । सा प्रसिद्धा त्वं अरुन्धतीव स्नुषायां सीतायां, शिवं अनुध्यानं अनुसरणपूर्वकं स (?) वात्सल्यमिति यावत् । ध्यानं चिन्तनं यस्याः ॥

---

१ 'उपैति' न. २ 'भजस्व' न. ३ 'तवाभ्यासे' व. ४ 'प्रिय' कु-घ-व.

अरुन्धती—इयं ते श्वश्रूर्भगवती वसुन्धरा ।

पुनर्नेपथ्ये । उक्तमासीदायुष्मता वत्सायाः परित्यागे यथा भगवति वसुन्धरे श्लाघ्यां दुहितरमवेक्षस्व जानकीमिति । तदधुना कृतवचनास्मि प्रभोर्वत्सस्येति ।

रामः—कथं कृतमहापराधो भगवतीभ्यामनुकम्पितः । प्रणमामि वः ।

अरुन्धती—भो भोः पौरजानपदाः, इयमधुना भगवतीभ्यां वसुन्धराजाह्नवीभ्यामेवं प्रशस्यमाना ममारुन्धत्याः समर्पिता पूर्वं च भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा सब्रह्मकैश्च देवैः संस्तुता सावित्रकुलवधूर्देवयजनसम्भवा सीतादेवी परिगृह्यतामिति कथमिह भवन्तो मन्यन्ते ।

लक्ष्मणः—आर्य एवमार्ययारुन्धत्या निर्भर्त्सिताः पौरजानपदाः कृत्स्नश्च भूतग्राम आर्यां नमस्कुर्वन्ति । लोकपालाः सप्तर्षयश्च पुष्पवृष्टिभिरुपतिष्ठन्ते ।

अरुन्धती—जगत्पते रामचन्द्र

नियोजय यथाधर्मं प्रियां त्वं धर्मचारिणीम् ।
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे ॥ १९ ॥

सीता—(स्वगतम् ।) जाणादि अज्जउत्तो सीदाए दुक्खं पडिमज्जिदुम् । जानात्यार्यपुत्रः सीताया दुःखं परिमार्ष्टुम् ।

रामः—यथा भगवत्यादिशति ।

लक्ष्मणः—कृतार्थोऽस्मि ।

सीता—पच्चुज्जीविदम्हि । प्रत्युज्जीवितास्मि ।

वसुन्धरा प्राह–उक्तमिति वत्सायां सीतायां विषये । प्रभोः तव । कृतं वचनं यया सा ॥ इत्थं रामेण गङ्गावसुन्धरे प्रथमाङ्के संप्रार्थिते । तदेतद् द्वयं दीर्घदर्शिभिरवगन्तव्यम् । अरुन्धत्येति–स्वेन स्वनामग्रहणं माहात्म्यद्योतकम् । अत एव–'स्थितमिव नगरे राक्षसानां सहस्रम्' इति मुद्राराक्षसीये 'दुर्योधनकेसरीन्द्रगृहिणी' इति वेणीसंहारे च । वैश्वानरेण अग्निना । लोकपालाः इन्द्राद्याः ॥ नियोजय यथेति ॥ १९ ॥ धर्ममनतिक्रम्य यथाधर्मम् । प्रतिकृतेः प्रतिमायाः । पुण्या चासौ प्रकृतिः तां प्रधानमित्यर्थः । 'प्रधानं प्रकृतिः स्त्रियाम्' इत्यमरः । 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभौ' इति स्मरणात् ॥ १९ ॥ जानाति आर्यपुत्र सीतादुःखं प्रमार्ष्टुम् । प्रत्युज्जीवि-

---

१ 'कृतापराधोऽपि भगवति त्वयानुकम्पयितव्यो रामः प्रणमति' न. २ 'पुण्यां प्रकृतिम्' क–न.

लक्ष्मणः—आर्ये एष निर्लज्जो लक्ष्मणः प्रणमति ।

सीता—वच्छ[1]सरिसो तुमं चिरं जीअ । वत्ससदृशस्त्वं चिरं जीव ।

अरुन्धती—भगवन्वाल्मीके उपनीयेतामिमौ सीतागर्भसम्भवौ रामभद्रस्य पुत्रकौ कुशलवौ । (इति निष्क्रान्ता ।)

रामलक्ष्मणौ—दिष्ट्या तथैवैतत् ।

सीता—(सबाष्पाकुला) कहिं ते पुत्तआ मे । कुत्र तौ पुत्रकौ मम ।

(ततः प्रविशति वाल्मीकिः कुशलवौ च ।)

वाल्मीकिः—वत्सौ कुशलवौ एष वां रघुपतिः पिता । एष लक्ष्मणः कनिष्ठतातः । एषा सीता जननी । एष राजर्षिर्जनको मातामहः ।

सीता—(सहर्षकरुणाद्भुतं विलोक्य ।) कहं तादो । कथं तातः ।

कुशलवौ—हा तात हा अम्ब हा मातामह ।

रामलक्ष्मणौ—(सहर्षमालिङ्ग्य ।) ननु वत्सौ पुण्यैः प्राप्तौ स्थः ।

सीता—एहि जाद कुस एहि जाद लव चिरस्स परिस्सजह मं लोअन्दर[2]गदं जणणिं । एहि जात कुश एहि जात लव चिरस्य परिष्वजेथां मां लोकान्तरगतां जननीम् ।

कुशलवौ—(तथा कृत्वा) धन्यौ स्वः ।

सीता—भअवं एसा हं पणमामि । भगवन्, एषाहं प्रणमामि ।

वाल्मीकिः—वत्से ईदृश्येव चिरं भूयाः ।

तास्मि । वत्ससदृशो मे चिरं जीव । **वत्सयोः** कुशलवयोः **सदृशः** समानः । 'ज्येष्ठभ्राता पितृसमः' इति स्मृतेः । सदृशो मे इति ध्वनिः । **रामभद्रस्य सीतागर्भे संभूतौ कुशलवौ उपनय** समीपमानय, णीञ् प्रापणे । ध्वनिश्च । **तथैव तत्** उपनयेति...... । **पुत्रकौ** वत्सौ संबोधनम् । **वां** युवयोः । **आकूतं** अभिप्रायः । कथं तातः । 'हर्षाश्चर्याद्भुतेषु हा' इति कपिलः । एहि जात कुश एहि जात लव चिरस्य परिष्वजस्व मां लोकान्तरगतां जननीम् । भगवन् । प्रणमामि । इत्थमिति-पतिपुत्रसमेतेति यावत् । रावणविनाशहेतुश्चेत्यर्थः । 'संभवामि युगे युगे' इति भगवद्वचनात् ॥ अद्यहे तातः

---

१ 'वच्छ ईदिसो' (वत्स ईदृशः) क-घ-च-न. २ 'लोअन्दराओ आअदं' (लोकान्तरादागताम्) न.

सीता—अम्महे तादो कुलगुरु अज्जाअणो सभत्तुआ अज्जा सन्तादेई सलक्खणा सुप्पसण्णा अज्जउत्तचलणा समं कुशलवा वि दीसन्ति ता णिब्भरम्हि आणन्देण । अहो तातः कुलगुरुरार्याजनः सभर्तृकार्या शान्तादेवी सलक्ष्मणाः सुप्रसन्ना आर्यपुत्रचरणाः समं कुशलवावपि दृश्यन्ते तन्निर्भरास्म्यानन्देन ।

(नेपथ्ये कलकलः)

वाल्मीकिः—(उत्थायावलोक्य च ।) उत्खातलवणो मधुरेश्वरः प्राप्तः

लक्ष्मणः—सानुषङ्गाणि कल्याणानि ।

रामः—सर्वमिदमनुभवन्नपि न प्रत्येमि । यद्वा प्रकृतिरियमभ्युदयानाम् ।

वाल्मीकिः—रामभद्र उच्यतां किं ते भूयः प्रियमुपकरोमि ।

रामः—अतः परमपि प्रियमस्ति । किं त्विदं भरतवाक्यमस्तु ।

पापेभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।

कुलगुरुरार्याजनः सभर्तृका आर्या शान्तादेवी सलक्षणा सुप्रसन्ना । सलक्ष्णेति–शान्त्यादिस्वलक्षणविशिष्टेत्यर्थः । आर्यपुत्रलालनेन समं कुशलवावपि दृश्येते । तस्मान्निर्भरास्मि आनन्देन । 'समं सह' इत्यमरः । उत्खातः उन्मूलितः लवणः असुरभेदः येन । मथुरेश्वरः शत्रुघ्नः । माथुरस्य कुम्भीनसीपुत्रस्योन्मूलनाय शत्रुघ्नं प्रेषयामीति प्रथमाङ्कपूर्त्यवसरे रामेणोक्तं संविधानरहस्यमत्र दूरदर्शिभिरनुसन्धेयम् । अनुषङ्गः अनुबन्धः । अनुभवन्नपि न प्रत्येमि न विश्वसिमि । प्रकृतिः स्वभावः । अभ्युदयानां आरम्भे सति अभ्युदयः पुनरुत्तरो भवेदिति भावः । येन नान्दी कृता तस्य भरतस्य वाक्यमिति संप्रदायः ॥ *अथ कविः पूर्वार्धेन रामकथाफलमाह*–पापेभ्यश्चेति ॥ २० ॥ या गङ्गेव पुनाति, जगतो मातेव लक्ष्मीरिव, 'इन्दिरा लोकमाता' इत्यमरः । वर्धयति च, इयं कथा रामस्येति शेषः । मङ्गले ऐहिकफलरूपे साधुः मङ्गल्या । मनोहरा च आमुष्मिकफलदानेनेति भावः । 'स याति ब्रह्मणः स्थानम्' इति स्मरणात् । अत्र चत्रयं पादपूरणे ॥ अथ

---

१ 'तथापीदमस्तु' क–घ–च. २ 'पुनातु वर्धयतु' क–घ–च.

तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम् ॥ २० ॥

(इति निष्क्रान्ताः सर्वे ।)

इति सम्मेलनं नाम सप्तमोऽङ्कः ।

इति महाकविश्रीभवभूतिविरचितं
उत्तररामचरितं नाम नाटकं समाप्तम् ।

उत्तरार्धेन स्ववाणीप्रयोजनमाह–तामिति । **बुधाः** ज्ञातारः । 'ज्ञातृबुधाः' इत्यमरः । **परिणतां** ग्रन्थात्मना परिनिष्ठिताम् । **विन्यस्तरूपां** विशेषेण यथोचितोल्लेखप्रचुरेणेति यावत् । न्यस्तामि ... इति वत् (?) वस्तुचमत्कारानुगुण्येन निवेशितानि रूपाणि पात्राणि यस्याम् । अत एव **एतां** 'चित्रकिर्मीरकल्माषशबलैताश्च' इति 'चित्रैतशबलाः' इत्यमरविक्रमार्कौ । **तां** रामकथां कृतार्थीकृताम्, प्रसिद्धां वा । **इमां प्राज्ञस्य** पदवाक्यप्रमाणज्ञस्येति । शब्दब्रह्म वेत्ति विदः । 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति' इति स्मरणात् । **कवेः** भवभूतिनाम्नो मम । **वाणीं** नाटकमयीं वाचम् । **अभिनयैः** लेखेन पठनपाठनप्रचारणाभिनन्दनादिभिः । 'प्रचारणादौ भावाङ्गदर्शनेऽभिनयो मतः' इत्यगस्त्यः । **परि** परितः । 'परि स्यात्परितोऽर्थेऽपि' इति केदारः। **भावयन्तु** लालयन्तु । 'आदरे लालने च स्याद्भावना' इति जयः । अलमतिविस्तरेण ॥

इतिमहाराजपदमहनीयतुकाजिराजगृहामात्येन मौनभार्गवकुलाकूपारचन्द्रचोण्डोबाळाजीपुत्रेण कौण्डिन्यगोत्रपारावारनिस्तुलकौस्तुभतिम्माजिबाळाजिदौहित्रेण काशीमहादेवतनूजेन शाकम्भरिपरमहंसचिदम्बरब्रह्मानुजेन नवरसभुवातिशायिचतुश्चतुरधिकषष्टिप्रबन्धदशभाषाभव्याष्टपदीपदपद्यवर्णविलसदन्यूनाक्षरमालिकार्यास्तवनकवनधौरन्धरीपारीणेन गीतगाथासहस्रचतुष्टयदिव्यदेवीताटङ्कलिपिकल्पकेन दुर्जनातिनिन्द्येन सज्जनाभिनन्द्येन सुन्दरीकमलजानिना वश्यवचःसर्वज्ञसरस्वतीनामम[ण्]डितेन श्रीरामनवमीनिशीथजागरण एवारब्धपरिपूरिते उत्तररामचरितसंजीवनाख्यटिप्पणे सप्तमोऽङ्कः संपूर्णः ॥

॥ इति घनश्यामपण्डितविरचिते उत्तररामचरितसंजीवनाख्यटिप्पणे सप्तमोऽङ्कः॥

---

१ 'परिणतप्रज्ञस्य' क–घ–च

NOTES.

Act I.

(THE PAGES IN THE NOTES REFER TO THE TEXT.)

P. 1. All Sanskrit writers generally introduce their works with a salutation or benediction. This (Mangala as it is called) is supposed to be necessary for the removal of obstacles and the safe completion of the work undertaken. Bhavabhûti follows this practice. As to the efficacy of Mangala, see Mahâbhâshya 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति' (Kielhorn, Vol I p. 7). Construe:—आत्मनः कलाम् अमृताम् देवतां वाचम् विन्देम (इति) इदं पूर्वेभ्यः कविभ्यः नमोवाकं प्रशास्महे. इदम् is the object of प्रशास्महे and has 'विन्देम—कलाम्' in apposition with it. कविभ्यः...वाकम् having made an obeisance to former poets. The poets referred to are such as Vâlmîki, Vyâsa and others. Some explain that Vâlmîki alone is referred to and that the plural is used only to show the great respect in which the author holds Vâlmîki. This, however, is not a natural way of explanation. V. and R. read गुरुभ्यः for कविभ्यः, which makes very little change in the meaning. नमोवाकम्—is an adverb to प्रशास्महे. It may be explained in several ways. It is a gerund in अम् (णमुल्) from वच्. नम इति उक्त्वा नमोवाकम्. The affix अम् is applied to roots, either standing alone or in conjunction with other words, in various senses such as repetition, entirety &c., *e. g.* स्मारं स्मारं नमति शिवम् (स्मृत्वा-स्मृत्वा), ब्राह्मणवेदं भोजयति (यं यं ब्राह्मणं जानाति तं तं). 'आभीक्ष्ण्ये णमुल् च' पा० 3. 4. 22. and the following Sûtras. नमोवाकम् may also be explained as 'नमः (शब्दस्य) वाकः उच्चारणं यस्मिन्कर्मणि तद्यथा तथा.' In this latter case वाक is a noun formed from वच् with the affix घञ्. प्रशास्महे—we wish, we pray. The root शास् (2nd *conj.*) is परस्मैपदी but when preceded by आ in the sense of 'wish,' it takes आत्मनेपद. "आङः शासु इच्छायाम् । आशास्ते, आशासाने । आङ्पूर्वत्वं प्रायिकम् । तेन 'नमोवाकं प्रशास्महे' इति सिद्धम् ।" सि. कौ. Here though प्र is the उपसर्ग used instead of आ, the sense being the same, the root takes आत्मनेपद. विन्देम (Pot. 1st person *plu.* of विद् 6th *conj.*) may we obtain. अमृताम्—immortal. Speech being called देवता must be said to be immortal. Or we may explain that, as, according to the Pûrvamîmâṃsâ, the relation of

word and meaning is eternal, the goddess of speech which is the अधिष्ठात्री of words must be eternal also. आत्मनः कलाम् which is an aspect (or phase or part) of the Supreme Soul. The Vishṇu-purâṇa says that poetical utterances, songs &c. are the body of the Lord Vishṇu 'काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च । शब्दमूर्तिधरस्यैतद्वपुर्विष्णोर्महात्मनः ॥' विष्णु॰ 1. 22. 84. N. and G. read वन्देमहि च तां वाणीम्. This reading is not bad. With this reading, however, the first half of the verse would cause some difficulty, since we shall have to construe as पूर्वेभ्यः कविभ्यः इदं नमोवाकं प्रशास्महे. प्रशास्महे would simply mean नमामहे. We shall have further to take इदं (which is neuter) with नमोवाकं (either an adverb, or a masculine noun in the accusative).

It will be noticed that G. explains the first half as containing a salutation to Gaṇapati. ब्रह्मणस्पति is addressed in the ऋग्वेद as 'कवीनां कविः' and is identified by G (as many other orthodox writers do) with गणपति. G further says that the plural कविभ्यः is used to show respect. This is not a natural explanation. There is no reason why the plural should not be used with respect to वाणी also. वीर॰ gives various far-fetched explanations of this verse, for which see pp. 7-8 of N. The words *आत्मनः कलाम् may* be taken as suggesting the principal characters of the drama, राम and सीता.

P. 4. नान्द्यन्ते at the end of the नान्दी. नान्दी means a benediction, consisting of one or more verses, which constitutes a sort of prologue to a drama. नन्दन्ति देवताः अस्यामिति नान्दी. It is defined by भरत as 'आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥' (नाट्यशास्त्र 5. 25) or 'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥' साहित्यदर्पण (6th परिच्छेद, 24th verse). From the stage direction (नान्द्यन्ते), it is clear that the verse 'इदं कविभ्यः' &c., is the नान्दी here. As the words नान्द्यन्ते सूत्रधारः occur after the *introductory* verse, a question arises as to who recited that verse and why the words follow the verse and do not precede it. It seems to us that the verse was recited by the सूत्रधार himself, but as that verse was really no part of the drama itself, being intended as a benediction, the word सूत्रधारः does not precede the first verse. The real business of the drama commences after the introductory benediction. These words (नान्द्यन्ते सूत्रधारः) have puzzled many writers and various explanations have been offered. The साहित्यदर्पण says "अत एव प्राक्तनपुस्तकेषु 'नान्द्यन्ते सूत्रधारः' इत्यनन्तरमेव 'वेदान्तेषु' इत्यादिश्लोकलिखनं दृश्यते । यच्च पश्चात् 'नान्द्यन्ते सूत्रधारः' इति लिखनं

तस्यायमभिप्रायः—नान्द्यन्ते सूत्रधार इदं प्रयोजितवान्, इतः प्रभृति मया नाटकमुपादीयते इति कवेरभिप्रायः सूचित इति." Similarly वीरराघव says 'नान्द्याः पूर्वोक्तायाः समाप्तौ सूत्रधारः प्रविश्याहेति शेषः'. जगद्धर, in his comment on मालतीमाधव, gives a long note on the words नान्द्यन्ते सूत्रधारः. भरत distinctly says that the नान्दी is to be recited by the सूत्रधार and that it is to consist of eight or twelve पद्s. 'सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः । नान्दीं पदैर्द्वादशभिरष्टभिर्वाप्यलङ्कृताम् ॥' (नाट्य° 5. 98.). What पद् means here is a disputed question. The ordinary meaning is 'a word' (सुप्तिङन्तं पदम् । पा° I. 4. 14). This would mean that नान्दी is not to exceed 8 or 12 words. But in many dramas there are नान्दीs containing two or three verses. Hence some interpret पद् to mean a quarter of a verse. There are dramas, however, where none of these meanings will do; *e. g.* the first verse of the विक्रमोर्वशीय, of the शाकुन्तल &c. It seems probable that N. and G. read 'वन्देमहि च तां वाणीं' to satisfy the definition of नान्दी. The verse in the text contains only eleven words, while as read by N. and G. it contains twelve. अल...रेण enough of prolixity. अलम्, in the sense of 'enough of' 'away with', governs the instrumental. काल...यात्रायाम् in the fair held in honour of S'iva. Most editions read कालप्रियनाथस्य. काल means शिव and कालप्रिया would mean पार्वती. कालप्रियानाथ would thus be शिव. वीर° commenting on महावीर° says "कालप्रियानाथस्य कालप्रियानामिकाम्बिकापतेः । कालप्रियनाथस्येति ह्रस्वान्तप्रियशब्दयुक्तः पाठः प्रचुरो दृश्यते । तत्राप्यर्थः पूर्ववत् । 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' इति वैकल्पिकह्रस्वप्रवृत्तेः". राजशेखर in his काव्यमीमांसा (p. 94) says that कालप्रिय is a city to the north of which is गाधिपुर (*i. e.* Kanoj). So कालप्रिय is probably उज्जयिनी, where there is a famous shrine of S'iva. In ancient India it was usual to exhibit dramatic performances at the time of fairs and other festivals. The मालतीमाधव also was introduced to the audience for the first time at the fair of S'iva. R. comments 'कालप्रियनाथो नाम विदर्भेषु पद्मनगरे प्रतिष्ठितो देवमूर्तिविशेषः । तस्य यात्रायामुत्सवे नाटकमिदं भगवतः कालप्रियनाथस्य पुरतः प्रथममभिनीतमासीत्'. आर्यमिश्रान्—*vide com.* जगद्धर quotes from भरत 'कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता । अद्रोह इति येष्वेतत्तानार्यान् संप्रचक्षते ॥'. मिश्र is an honorific title affixed to the names of famous scholars *e. g.* मण्डनमिश्र, वाचस्पतिमिश्र, पार्थसारथिमिश्र. अत्रभवन्तः—The words अत्रभवत् and तत्रभवत् are epithets of honour, the former applied to a person who is present, the latter to one who is not present. 'पूज्ये तत्रभवानत्रभवांश्च भगवानपि'. G. seems to have separated अत्रभवन्तः into अत्र भवन्तः. वीर° also says 'अत्रभवन्तः पूज्याः यूयम् ।...यद्वा अत्र अस्मिन्नगरे भवन्तः यूयमित्यर्थः.' श्रीकण्ठपदलाञ्छनः

who had the title श्रीकण्ठ by way of distinction. श्रीकण्ठ इति पदं लाञ्छनं यस्य. G. explains in another way 'who was devoted to the feet of S'iva.' It seems that the poet's original name was भवभूति and that later on he was given the title of श्रीकण्ठ. वीर० reverses this order and says that श्रीकण्ठ was his real name and that he was called भवभूति by a king who was pleased with a verse of the poet. *Vide com.* R. says 'लोकातिगकविशक्तिदर्शनाद्वाग्देवी नित्यकालमस्य कण्ठे वसतीति मत्वा तदानींतनैः भवभूतेः श्रीकण्ठ इति विशेषणं परिकल्पितम्.' पद...ज्ञः who knows the sciences of Grammar, Logic and Mîmâṇsâ. पदं means 'an inflected word' and stands for Grammar which deals with words. वाक्य a sentence. Logic deals with sentences and the fallacies that lurk in them. प्रमाण means 'authoritative means of knowledge'. The मीमांसा (both पूर्व and उत्तर) deals with शब्द and other प्रमाणs. वीर० on महावीरचरित says 'पदवाक्यप्रमाणज्ञो व्याकरणतर्कमीमांसाभिज्ञः.' According to others वाक्य stands for मीमांसा (because मीमांसा helps one to understand Vedic passages which often appear contradictory) and प्रमाण for तर्क (logic). Compare 'पदावगतिहेतुत्वात्पदं व्याकरणम् । वाक्यसमन्वयावसायहेतुत्वाद्वाक्यं मीमांसा । प्रमाणप्रतिपत्तिकारित्वात्प्रमाणं तर्कः ।' मुकुल in अभिधावृत्तिमातृका (verse 13). जातूकर्णीपुत्र son of a woman who was sprung from जातूकर्ण्यगोत्र.

भरत says that the poet's name should be mentioned 'प्रसाद्य रङ्गं विधिवत्कवेर्नाम च कीर्तयेत् । प्रस्तावना ततः कुर्यात्काव्यप्रख्यापनाश्रयाम् ॥' (नाट्य० 5. 154). Similarly the साहित्यदर्पण says 'रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः । रूपकस्य कवेराख्या गोत्राद्यपि स कीर्तयेत् ॥'.

Verse 2—ब्रह्माणं = ब्राह्मणम्. 'वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः' इत्यमरः. The propriety of the word is twofold. भवभूति wants to place emphasis on the fact that he scrupulously performed the six duties of a ब्राह्मण *viz.* यजन, याजन, अध्ययन, अध्यापन, दान and प्रतिग्रह. The word ब्रह्माणं also suggests प्रजापति, whose wife सरस्वती is represented to be. इयम्—This may mean 'well known to all. वश्ये...वर्तते follows like an obedient wife or like a woman enamoured. N. reads अन्ववर्तत (Imperfect of वृत् with अनु) which is bad, as the word अस्ति has been already used. N. reads वश्यैव. We may then construe एव with यम्; यमेव (नान्यं कमपि कविं) इयं देवी वाग् वश्या (सती) अनुवर्तते. But this is not quite happy and there is दूरान्वय. उत्तरं...चरितं—The latter part of the life or history of Râma. This drama is a complement of the महावीरचरित which deals with the events of Râma's life up to his installation on the throne of Ayodhyâ. तत्प्रणीतं—तेन ब्राह्मणा प्रणीतं—composed by that (ब्राह्मण

भवभूति). *Vide* comment of G. which disapproves of the reading in the text and prefers यत्प्रणीतम्. The idea of G. is that भवभूति, the antecedent, being mentioned in the words 'अस्ति &c.' the verse should contain only relative clauses. The reading in the text may be defended as follows:—भवभूति is no doubt already mentioned. But there is no harm if we take the first half of the verse by itself and understand तत्प्रणीतं &c., as a separate co-ordinate sentence to 'अस्ति खलु &c.' प्रयोक्ष्यते Will be represented (by us). The reading प्रयुज्यते is not bad. The present is also used when an act which is to happen immediately in the future is intended to be expressed. With the words वाग्वश्येवानुवर्तते, compare महावीरचरित I. 4. 'वश्यवाचः कवेर्वाक्यं सा च रामाश्रया कथा ।'

5. कार्यवशात्...संवृत्तः here have I become a sojourner in Ayodhyâ for some purpose as well as one living at the time (when Râma was crowned). The Sûtradhâra throws off his real character as a person belonging to the place where the drama was acted and says that he is now an inhabitant of Ayodhyâ, where he has accidentally come for some business. This would explain his words on p. 6. 'वैदेशिकोऽस्मीति' &c. R. explains 'कार्यवशात् नाटकप्रयोगानुरोधात्.' This would not properly account for the words 'वैदेशिकोऽस्मीति' on p. 6 below. N. reads कविवशात् (at the poet's bidding), which would come to the same thing as the explanation of R. There are various ways in which the business of the drama can be introduced on the stage. Here the dialogue between the Sûtradhâra and Nata refers to Râma and Sitâ in the 7th verse and paves the way for their appearance. आयोध्यकः—from अयोध्या by the affix वुञ् according to 'धन्व—योपधाद्वुञ्' पा० 4. 2. 121. (धन्वविशेषवाचिनो वृद्धाद्वुञ् स्यात् । सि. कौ.) and 'अवृद्धादपि बहुवचनविषयात्' पा० 4. 2. 125. आयोध्यिकः (अयोध्यासम्बन्धी) may be explained on the analogy of आध्यात्मिक. तदानींतनः—रामपट्टाभिषेककालीनः. अत्रभवतः goes with रामस्य. पौलस्त्य... केतोः (रामस्य) who is the fire (destroyer) of the family of रावण. रावण was the son of विश्रवस्, who was the son of पुलस्त्य, one of the प्रजापतिs. 'प्रजापतीनां षण्णां तु चतुर्थोऽयं प्रजापतिः । मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः । नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः ॥ तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः ।' रामायण सुन्दर० 23. 6–8. धूमकेतुः fire (धूमः केतुः लिङ्गं चिह्नं वा अस्य) 'अग्न्युत्पातौ धूमकेतू' इत्यमरः. धूमकेतु means also 'comet', the appearance of which was supposed to be a precursor of calamities. Râma may be also called a comet to the family of पौलस्त्य (indicating the destruc-

tion of that family). रात्रिंदिवम् (रात्रौ च दिवा च रात्रिंदिवम् irregular द्वन्द्व according to the Sûtra, 'अचतुर' &c. पा० 5. 4. 77, which is a very long one) by day and night, constantly. असं...नान्दीकः (an adj. of समयः) in which the joyful music was not to be discontinued. असंहता आनन्दनान्दी (आनन्दसूचिका नान्दी मङ्गलं) यस्मिन् (बहुव्रीहि). The affix क is added to बहुव्रीहि compounds when the last member is a feminine noun ending in ई or ऊ or a noun ending in ऋ. 'नद्यृतश्च' पा० 5. 4. 153. रङ्गराज cited by Gh. explains नान्दी as the 'symphony of 12 drums beaten at the same time' (एकदा द्वादशमृदङ्गघोषो नान्दी). तद् therefore. किमि...स्थानानि why is it that the squares (public streets) are now without the singing of bards? विश्रान्ताः चारणाः येषु. चारणः a wandering singer, actor (चारयति कीर्तिम्). 'भरता इत्यपि नटाश्चारणास्तु कुशीलवाः' इत्यमरः. चत्वरः (मराठी चव्हाटा) a place where four roads meet; also 'royal court-yard.' 'अङ्गनं चत्वराजिरे' अमरः; 'चत्वरं स्यात्पथां श्लेषे स्थण्डिलाङ्गनयोरपि' हैमः. G. seems to have read ०चरणानि; the meaning, then, would be 'in which there are no people moving about'. भाव—is a term of address used in dramas showing respect. 'भावो विद्वान्' इत्यमरः. 'मान्यो भावेति वक्तव्यः किंचिन्न्यूनस्तु मारिषः' quoted by जगद्धर. प्रेषिताः were sent (this goes with ०राक्षसाः, ब्रह्मर्षयः, राजर्षयः). Separate हि इतः (from this place *i. e.* from अयोध्या). स्वगृहान् (*accu. plu. mas.* of स्वगृह) is the object of प्रेषिताः. गृह is ordinarily neuter; but may be masculine when the plural is used. महाराजेन = रामेण. लङ्का... सुहृदः friends in the war in Lankâ (against रावण). प्लवङ्गमः a monkey. सभाजनाय or सभाजने उपतिष्ठन्ति ते सभा...स्थायिनः who waited upon him for greeting or congratulating him (राम). This qualifies ब्रह्मर्षयः and राजर्षयः. The reading समाजोपस्थायिनः would mean 'who waited upon him in groups' or 'who waited upon him in the assembly'. This is not a happy reading. सभाजनम् is derived from the root सभाज् 10th *conj.* 'अथ द्वे आनन्दनसभाजने। आप्रच्छनम्' अमरः. नाना...गताः that had come from various quarters (नानादिगन्तेभ्यः आगताः). The reading नाना...पावनाः (purifiers of various quarters) is not appropriate here. ब्रह्मर्षयः वसिष्ठगौतमादयः, राजर्षयः जनकादयः. There were various grades of sages, ऋषि, महर्षि, देवर्षि (like नारद) &c. यत्समाराधनाय for pleasing whom (येषां समाराधनाय). इयतो दिवसान् (accusative of time) for so many days.

P. 6. आः is an interjection implying 'recollection' here. 'आः स्मरणेऽपाकरणे कोपसन्तापयोस्तथा' मेदिनी. निमित्तम् reason (why there was no music in the squares). As all the guests had gone away, the festivities came to an end. अन्यच्च and there is

another (reason). **Verse 3.** वसिष्ठेन अधिष्ठिताः headed by वसिष्ठ. He was the family priest of the solar race. G. takes वसिष्ठाधिष्ठिताः as बहुव्रीहि, but we expect in that case अधिष्ठितवसिष्ठाः. देव्यः queens. The word देवी is applied to a crowned queen. राघवमातरः mothers of Râma *viz.* कौसल्या, सुमित्रा and कैकयी. राघव *lit.*, a descendant of रघु, here राम. अरुन्धतीं पुरस्कृत्य having placed in their front अरुन्धती (the wife of वसिष्ठ). The word जामातुः may be connected both with यज्ञे and आश्रमम्. Or we may supply सति after यज्ञे, the meaning being 'there being a sacrifice.' आश्रमं is to be connected with गताः.

वैदेशिको...पृच्छामि I am a foreigner; therefore I ask.

Some Mss change the order of speakers here. After the third verse the सूत्रधार is made to say एवमेतत् and the words वैदेशिकोऽस्मि &c. are put in the mouth of the नट and the passage from कन्यां दशरथो राजा to उपतिष्ठावः is assigned to the सूत्रधार. This does not seem to us to be proper. The नट does not appear to be वैदेशिक. When the सूत्रधार inquires why the squares are silent, it is the नट that gives him the information that राम's mothers are gone to the आश्रम of the son-in-law. Having given that information himself it does not seem proper that he should himself ask who the जामाता was. **Verse 4.** व्यजीजनत्—Aorist of the causal of जन् with वि. अपत्यकृतिकाम्—who was treated as a child. अपत्यस्य कृतिर्व्यापारः यस्याः or अपत्याय कृतिः ग्रहणं यस्याः. The affix क is optionally added to all बहुव्रीहि compounds. रोमपाद् was king of अङ्गदेश. The रामायण seems to say that शान्ता was the daughter of रोमपाद himself and not of दशरथ. 'एवमंङ्गाधिपेनैव गणिकाभिर्ऋषेः सुतः। आनीतोऽवर्षयद्देवः शान्ता चास्मै प्रदीयते॥ ऋष्यशृङ्गस्तु जामाता पुत्रांस्तव विधास्यति।' बालकाण्ड 9. 18–19. See also बालकाण्ड 11. 2–5. It is the विष्णुपुराण that distinctly says that दशरथ gave his daughter to रोमपाद. 'यस्मादजपुत्रो दशरथः शान्तां नाम कन्यामनपत्याय दुहितृत्वे युयोज।' विष्णु० IV. 18. ऋष्यशृङ्गः—According to रामायण बालकाण्ड (chapter 9 ff) he was brought up by his father in the forest and he saw no other human being till he reached manhood. When a great drought devastated the country of अङ्ग, the king रोमपाद caused ऋष्यशृङ्ग to be brought to him through the seductive charms of damsels and gave शान्ता to him in marriage. ऋष्यशृङ्ग being pleased caused copious rain in अङ्ग. It was this sage who performed the sacrifice for दशरथ which caused the birth of राम and his three brothers. उपयेमे married. यम् is Parasmaipadi, but when preceded by उप in the

sense of 'marrying' or (according to some) 'accepting' it takes आत्मनेपद. 'उपाद्यमः स्वकरणे' पा० 1. 3. 56. तेन...रब्धम् he has commenced a sacrificial session lasting for twelve years. द्वादशवार्षिकम्—द्वादशवर्षाणि भावि (भविष्यति) इति—according to 'तमधीष्टो भृतो भूतो भावी' पा० 5. 1. 80 (मासमधीष्टः मासिकोऽध्यापकः। मासं भृतः मासिको व्याधिः। मासं भावी मासिक उत्सवः। सि. कौ.). We see from the second Act that the सत्र was only begun when this was spoken and was finished twelve years after this time. आत्रेयी says in the second Act 'संप्रति परिसमाप्तं द्वादशवार्षिकं सत्रम्'. At the time when आत्रेयी spoke this, the sons of सीता, कुश and लव, were about twelve years old. Therefore the explanation of Gh 'द्वादशसु वर्षेषु भूतं' does not seem to be correct. तदनुरोधात् in compliance with his (ऋष्यशृङ्ग's) request. तस्य अनुरोधात्. अनुरोधः acting according to the wishes (of another). 'अनुरोधोऽनुवर्तनम्' इत्यमरः. कठोरगर्भाम्—कठोरः गर्भः यस्याः—who was far advanced in pregnancy. गुरुजनः elderly persons (such as कौसल्या, वसिष्ठ and others). तत्किमनेन—then what is the use of this? He refers to the topic of the द्वादशवार्षिक सत्र. राज...तिष्ठाव: Let us wait at the royal gate itself in conformity with the practice of our caste (profession). It is not clear what जाति is particularly referred to. R explains स्वजात्याः चारणजात्याः समयेन राजस्तुतिरूपेण आचारेण.' Gh. explains 'स्वजातेः नटजातेः समयेन.' The latter seems to us to be preferable. There is nothing to show that the सूत्रधार had assumed the character of a चारण. समय means 'आचार'. 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः. स्था with उप to wait upon, serve. स्था, when preceded by उप in the sense of 'worship of a deity,' 'joining together,' 'making friendship with' and 'road', takes Atmanepada necessarily. 'उपाद्देवपूजा-संगतिकरण-मित्रकरण-पथिष्विति वाच्यम्' वार्तिक on 'उपान्मन्त्रकरणे' पा० 1. 3. 25. Here the meaning is different and so we have उपतिष्ठावः. तेन हि therefore, if that be so. निरूप... भाव: let your honour think (find out) of some very correct mode of panegyric proper for (the time of) waiting upon the king. राज्ञः is to be connected with उपस्थान in the compound उप...पद्धतिम्. उपस्थाने (कर्तव्यस्य) स्तोत्रस्य प्रशस्तेः पद्धतिः प्रकारः तां पद्धतिम्. उपस्थानम् going near to and waiting upon. मारिषः a worthy or respectable person. This is a term of address used by the सूत्रधार when talking with the actors. 'आर्यस्तु मारिषः' इत्यमरः. **Verse 5.** सर्वथा.. वचनीयता One should do (his duty) by all means; for whence can there be exemption from blame? The meaning is:—One should do one's duty to the best of one's ability without caring for the censure of some person or other. G. seems to have read व्यवह

र्तव्ये for व्यवहर्तव्यम्. The meaning in that case is 'whence (how) can there be freedom from blame in matters that must be done (by one) absolutely (or in any case)'? The idea, when G.'s reading is taken, is that, when one must do a thing (whether one wills it or not) he must do it and cannot hope to escape censure, because that is the lot of all. The reading in the text is happier than that of G. यथा...जनः men are wicked as regards the chastity of women and speech (*i. e.* men always indulge in scandals about women and are always prone to find blemishes in compositions, whatever pains the author may have taken to write in a chaste style). The author here is preparing the ground for introducing the slander about Sitâ. There is also a further suggestion in that the poet here seems to enjoy a fling at the critics of his plays. अति...वक्तव्यम् you should say very wicked (instead of using the comparatively mild expression 'wicked').

P. 7. Verse 6. देव्या—जनः—this verse constitutes the reason why people must be called very wicked. देव्या...जनः since among men there is a scandal about the queen, daughter of the king of विदेह. The word वैदेह्यां is significant. Even the daughter of a noble and sage king like जनक does not escape popular scandal. सापवादः—अपवादेन सह (बहुव्रीहि)—qualifies जनः. सापवादः one who spreads a scandal. रक्षसः (राक्षसस्य रावणस्य) गृहे स्थितिः. रक्षो...निश्चयः (her) residence in the house of the demon is the root (of the scandal); but as regards her purification in fire, there is unbelief (nobody believes in it). As regards the incidents leading to अग्निशुद्धि, see रामायण युद्धकाण्ड सर्ग 115–118. After the defeat and death of रावण, राम welcomed सीता rather coldly and said that he could not take her back as she had dwelt in another's house very long. Sitâ then called upon लक्ष्मण to prepare the funeral pyre in which she desired to cast herself. After going round Râma and calling upon fire not to harm her if she were chaste, she entered it. Then fire assumed bodily form and handed over सीता to Râma who then joyfully received her. We give a few verses from the above Sargas 'तद्गच्छ त्वानुजानेऽद्य यथेष्टं जनकात्मजे। एता दश दिशो भद्रे कार्यमस्ति न मे त्वया॥ कः पुमांस्तु कुले जातः स्त्रियं परगृहोषिताम्। तेजस्वी पुनरादद्यात्सुहृल्लोभेन चेतसा॥ सर्ग 115. 18–19; शनैर्गद्गदया वाचा भर्तारमिदमब्रवीत्॥ किं मामसदृशं वाक्यमीदृशं श्रोत्रदारुणम्। रूक्षं श्रावयसे वीर प्राकृतः प्राकृतामिव।' ... यदहं गात्रसंस्पर्शं गतास्मि विवशा प्रभो। कामकारो न मे तत्र दैवं तत्रापराध्यति॥ मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते। पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरी॥ ... चितां मे कुरु

सौमित्रे व्यसनस्यास्य भेषजम् । मिथ्यापवादोपहता नाहं जीवितुमुत्सहे ॥ ... अधोमुखं स्थितं रामं ततः कृत्वा प्रदक्षिणम् । उपावर्तत वैदेही दीप्यमानं हुताशनम् ॥ ... बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपतः । यथा मे हृदयं नित्यं नापसर्पति राघवात् । तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥ यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः । तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥ एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनम् । विवेश ज्वलनं दीप्तं निःशङ्केनान्तरात्मना ॥ सर्ग 116. 4–5, 8–9, 18, 24–27; विधूयाथ चितां तां तु वैदेहीं हव्यवाहनः । उत्तस्थौ मूर्तिमानाशु गृहीत्वा जनकात्मजाम् ॥... अब्रवीत्तु तदा रामं साक्षी लोकस्य पावकः । एषा ते राम वैदेही पापमस्यां न विद्यते ॥ सर्ग 118 . 2, 5. किंवदन्ती—popular report (evil report). 'किंवदन्ती जनश्रुतिः' इत्यमरः. The word seems to be derived from 'किं वदन्ति' (what do the people say). महाराजं...स्यन्देत were to reach (lit. flow to) His Majesty (Râma). तत्...स्यात् it would be woeful. The various readings presented by the editions are many but they all mean the same thing. G. seems to read प्रतिष्ठते for प्रति स्यन्देत. सर्वथा...विधास्यन्ति the sages and the gods will by all means bring about what is good. These two speeches of the सूत्रधार and the actor suggest respectively the बीज of the whole drama and its termination. परिक्रम्य walking about (on the stage). आकर्ण्य the actor represents that he listens to what people say. एवं refers to the following श्लोक. **Verse 7.** स्नेहा...त्य having come through affection for congratulating (राम on his coronation). दिनानि अमूनि is the object of नीत्वा. नीत्वा उत्सवेन having passed in festivities. विदेहान्—is to be connected with गतः. Names of countries are to be used in the plural. विदेह lay to the north-east of मगध and contained the northern part of the modern district of Tirhoot and part of Nepal also. जनक found सीता in the ground ploughed for sacrificial purposes and brought her up as his daughter. See रामायण बालकाण्ड 66. 13–14. 'अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः । क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ॥ भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा ॥.' विमनसः qualifies देव्याः (सीतायाः). ततः on account of that (*viz.* her father's departure). विमनसः—खिन्नायाः—who is distracted in mind (विगतं मनः यस्याः). धर्मासनात् from the seat of justice. वासगृहम् inner apartments of a house. 'गर्भागारं वासगृहम्' इत्यमरः. नरेन्द्रः king (राम here). This verse prepares the audience for the entry of राम and सीता. It is a canon of Sanskrit dramaturgy that no character should enter or leave the stage without previous intimation to the audience. See com. निष्क्रान्तौ—the dual indicates the सूत्रधार and the actor. Where the सूत्रधार holds conversation with नटी or विदूषक or other actors and where that conversation suggests the matter in hand, that is आमुख, also called प्रस्तावना. 'नटी विदूषको वापि पारिपार्श्वक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ चित्रै-

